पूजाराधनस्तवः

रुवटुकायह्रीँ॥ मंत्रोद्धारमिमंदेवित्रैलोक्येचातिदुर्लभम्॥ अप्रकाश्यमिमंमन्त्रंसर्वशक्तिसमन्वित
म्॥११॥ स्मरणादेवमंत्रस्यभूतप्रेतपिशाचकाः॥ विद्रवन्त्यतिभीतावैकालरुद्रादिवप्रजाः॥१२॥ प
ठेद्वापाठयेद्वापिपूजयेद्वापिपुस्तकम्॥ नाग्निचौरभयंतत्रग्रहराजभयंतथा॥१३॥ नचमारीभयंकि
ञ्चित्सर्वत्रसुखवान्भवेत्॥ आयुरारोग्यमैश्वर्यंपुत्रपौत्रादिसंपदः॥१४॥ भवन्तिसततंतस्यपुस्तक
स्यापिपूजनात्॥ श्रीपार्वत्युवाच॥ यएषभैरवोनामआपदुद्धारणोमतः॥१५॥ त्वयाचकथितोदेवभै
रवःकल्पउत्तमः॥ तस्यनामसहस्त्राणिअयुतान्यर्बुदानिच॥१६॥ सारमुद्धृत्यतेषांवैनामाष्टशत
कंवद॥ यानिसंकीर्त्तयेन्मर्त्यःसर्वदुःखविवर्जितः॥१७॥ सर्वान्कामानवाप्नोतिसाधकःसिद्धिमेव

व॰भै॰ च॰ ॥ श्रीईश्वर उवाच॰ ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ॥ १८ ॥ आपदुद्धारणस्येह नामा
२ ष्टशतमुत्तमम्॰ ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम्॰ ॥ १९ ॥ सर्वकामार्थदं देवि साधका
नां सुखावहम्॰ ॥ सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम्॰ ॥ २० ॥ आयुःकरं पुष्टिकरं श्रीकरं च य
शस्करम्॰ ॥ नामाष्टशतकस्यास्य छन्दोनुष्टुप्प्रकीर्तितम्॰ ॥ २१ ॥ बृहदारण्यको नाम ऋषिर्देवोथ भै
रवः ॥ अष्टबाहुं त्रिनयनं मितिवीजं समीरितम्॰ ॥ २२ ॥ शक्तिकं कीलकं शेषमिष्टसिद्धौ प्रयोजयेत्॰ ॥
रुद्रमङ्गुष्ठयोर्न्यस्य तर्जन्योश्च शिखीसखम्॰ ॥ २३ ॥ शिवं मध्यमयोर्न्यस्यानामयोस्तु त्रिशूलिनम्॰ ॥ ब्र रामः
ह्मणं तु कनिष्ठायां नलयोस्त्रिपुरान्तकम्॰ ॥ २४ ॥ मांसाशिनं करग्रे तु करपृष्ठे दिगम्बरम्॰ ॥ भैरवं मूर्ध्नि २

विन्यस्यललाटेभीमदर्शनम्॥२५॥नेत्रयोर्भूतहननंसारमेयानुगंभ्रुवोः॥कर्णयोर्भूतनाथञ्चप्रेतवा
हंकपोलयोः॥२६॥नासापुटोष्ठयोश्चैवभस्माङ्गंसर्वभूषणम्॥अनादिनाथमास्येचशक्तिहस्तंगलेन्यसे
त्॥२७॥स्कन्धयोर्दैत्यशमनंबाह्वोरतुलतेजसम्॥पाण्योःकपालिनंन्यस्यहृदयेमुण्डमालिनम्॥२८॥
शान्तंवक्षस्थलेन्यस्यस्तनयोःकामचारिणम्॥उदरेचसदातुष्टंक्षेत्रेशंपार्श्वयोस्तथा॥२९॥क्षेत्रपालं
पृष्ठदेशेक्षेत्रज्ञंनाभिदेशके॥पापौघनाशनंकट्यांबटुकंलिङ्गदेशके॥३०॥गुदेरक्षाकरंन्यस्यतथोर्वो
रक्तलोचनम्॥जानुनोर्घुर्घुरारावंजङ्घयोरक्तपायिनम्॥३१॥गुल्फयोःपादुकासिद्धंपादपृष्ठेसुरेश्व
रम्॥आपादमस्तकंचैवआपदुद्धारणंन्यसेत्॥३२॥पूर्वेडमरुहस्तंचदक्षिणेदण्डधारिणम्॥खड्गह

व.भै. स्तंपश्चिमेचघराग्रावारिदनमुत्तरे॥२३॥आग्नेयामग्निवर्णाचनैर्ऋत्यांचदिगम्बरम्॥वायव्यांसर्वभूतस्थमी
४ शान्यांचाष्टसिद्धिदम्॥२४॥ऊर्ध्वंखेचरिरंग्न्यस्यपातालेरौद्रूरूपणम्॥एवंविन्यस्यदेहस्यषडङ्गुनततो
न्यसेत्॥२५॥हृदयेभूतनाथायआदिनाथायमूर्द्धनि॥आनन्दपदपूर्वायनाथायार्थशिखासुच॥२६॥सि
द्धसाधकनाथायन्यसेच्चकवचेतथा॥सहजानन्दनाथायन्यसेन्नेत्रत्रयेतथा॥२७॥निसीमानन्दना
थायअस्त्रेचैवप्रयोजयेत्॥शिखाशोधनम्॥ॐ ह्रूँ ह्रैँ श्रीँ शिखानाथायह्रीँस्वाहा॥ॐ अस्यश्रीआपदु
द्धारणवटुकभैरवाष्टोत्तरशतनामस्तोत्रमन्त्रस्यबृहदारण्यकऋषिरनुष्टुप्छन्दः श्रीआपदुद्धारणवटुक राम:
भैरवोदेवताअष्टवाहुंत्रिनयनमितिवीजंकंशक्तिः शेषंकीलकंममेष्टसिद्धौजपेविनियोगः॥ॐ बृहदा ४

रणायकऋषयेनमः शिरसि ॥ ॐ अनुष्टुप्छन्दसेनमो मुखे ॥ ॐ श्रीआपदुद्धारणायबटुकभैरवदेवता
यनमो हृदि ॥ ॐ अष्टवाहुं त्रिनयनमितिबीजायनमो गुह्ये ॥ ॐ कंशक्तयेनमः पादयोः ॥ ॐ श्रीसमि
तिकीलकायनमः सर्वाङ्गे ॥ ॐ रुद्रायनमः अङ्गुष्ठयोः ॥ ॐ शिखिसखायनमः तर्जन्योः ॥ ॐ शिवायनमः
मध्यमयोः ॥ ॐ त्रिशूलिनेनमः अनामिकयोः ॥ ॐ ब्रह्मणेनमः कनिष्ठयोः ॥ ॐ त्रिपुरान्तकायनमः करतलयोः
॥ ॐ मांसाशिनेनमः कराग्रयोः ॥ ॐ दिगम्बरायनमः करपृष्ठयोः ॥ ॐ भैरवायनमः मूर्द्ध्नि ॥ ॐ भीमदर्शनाय
नमः ललाटे ॥ ॐ भूतदहनायनमः नेत्रयोः ॥ ॐ सारमेयानुगायनमः भ्रुवोः ॥ ॐ भूतनाशायनमः कर्णयोः
॥ ॐ प्रेतवाहायनमः कपोलयोः ॥ ॐ भस्माङ्गायनमः नासापुटयोः ॥ ॐ सर्वभूषणायनमः ओष्ठयोः ॥ ॐ

व·भै·　अनादिनाथायनमः मुखे॥ॐशक्तिहस्तायनमः गले॥ॐदैत्यशमनायनमः स्कन्धयोः
५　॥अतुलतेजसेनमः बाह्वोः॥ॐकपालिनेनमः हस्तयोः॥ॐमुण्डमालिनेनमः हृदये॥ॐशा
न्तायनमः वक्षस्थले॥ॐकामचारिणेनमः स्तनयोः॥ॐसदातुष्टायनमः उदरे॥ॐक्षेत्रेशाय
नमः पार्श्वयोः॥ॐक्षेत्रपालायनमः पृष्ठे॥ॐक्षेत्रज्ञायनमः नाभौ॥ॐपापौघनाशनायन
मः कट्याम्॥ॐवटुकायनमः लिङ्गे॥ॐरक्षाकरायनमः गुदे॥ॐरक्तलोचनायनमः ऊर्वोः॥
ॐघुर्घुरारावायनमः जानुनोः॥ॐरक्तपायिनेनमः जङ्घयोः॥ॐपादुकासिद्धायनमः गुल्फयोः॥　रामः
ॐसुरेश्वरायनमः पादपृष्ठे॥ॐआपदुद्धारणाय बटुकभैरवायनमः आपादमस्तकं सर्वाङ्गे॥ॐइम　५

स्हस्तायनमः पूर्वे॥ॐ दण्डधारिणेनमः दक्षिणे॥ॐ खड्गहस्तायनमः पश्चिमे॥ॐ घण्टावादिने
नमः उत्तरे॥ॐ अग्निवर्णायनमः आग्नेये॥ॐ दिगम्बरायनमः नैर्ऋत्ये॥ॐ सर्वभूतस्थायनमः
वायव्ये॥ॐ अष्टसिद्धिदायनमः ऐशान्ये॥ॐ खेचरिणेनमः ऊर्द्ध्वे॥ॐ रौद्ररूपिणेनमः अधः॥ॐ
भूतनाथायनमः हृदये॥ॐ आदिनाथायनमः मूर्ध्नि॥ॐ आनन्दनाथायनमः शिखायां॥ॐ सिद्ध
साधकनाथायनमः कवचे॥ॐ सहजानन्दनाथायनमः नेत्रत्रये॥ॐ निःसीमानन्दनाथायनमः अस्त्रे
चैवप्रयोजयेत्॥एवंन्यासविधिंकृत्वाध्यात्वाचतदनन्तरम्॥२८॥ध्यानंतस्यप्रवक्ष्यामियथाध्यात्वापठे
न्नरः॥शुद्धस्फटिकसंकाशंसहस्रादित्यवर्चसम्॥२९॥नीलजीमूतसंकाशनीलाञ्जनसमप्रभम्॥

व·भै· अष्टबाहुंत्रिनयनंचतुर्बाहुंद्विबाहुकम्॥४०॥दंष्ट्राकरालवदनंनूपुरारावसंकुलम्॥भुजङ्गमेखलंदेवमग्
६ निवर्णशिरोरुहम्॥४१॥दिगम्बरंकुमारेशंवटुकाख्यंमहाबलम्॥खड्गमसिपाशंचशूलंदक्षिणभाग
तः॥४२॥डमरुंचकपालंचवरदंचाभयंतथा॥अग्निवर्णसमोपेतंसारमेयसमन्वितम्॥४३॥इतिसाधारण
ध्यानम्॥ॐवन्देबालंस्फटिकसदृशंकुण्डलोद्भासिवक्त्रंदिव्याकल्पैर्नवमणिमयैःकिङ्किणीनूपुराढ्यैः॥
दीप्ताकारंविशदवसनंसुप्रसन्नंमहेशंहस्ताब्जाभ्यांवटुकमनिशंशूलदण्डौदधानम्॥४४॥इतिसात्त्विकध्या
नम्॥उद्यद्भास्करसन्निभंत्रिनयनंरक्ताङ्गरागस्रजंस्मेरास्यंवरदंकपालमभयंशूलंदधानंकरैः॥नीलग्रीव राम:
मुदारभूषणयुतंशीतांशुखण्डोज्ज्वलंबन्धूकारुणवाससंभयहरंदेवंसदाभावये॥४५॥इतिराजसध्यानम्॥ ६

ध्यायेत्त्रैलोक्यकान्तंशशिसकलधरंमुण्डमालांमहेशंदिग्वस्त्रंपिङ्गकेशंडमरुमथसृणिंखड्गशूलाभयानि॥
नागंघण्टांकपालंकरसरसिरुहैर्बिभ्रतंभीमदंष्ट्रंसर्पाकल्पंत्रिनेत्रंमणिमयविलसत्किङ्किणीनूपुराढ्यम्॥
॥४६॥इतितामसध्यानम्॥करकलितकपालःकुण्डलीदण्डपाणिस्तरुणतिमिरनीलव्यालयज्ञोपवीती॥क्र
तुसमयसपर्याविघ्नविच्छेदहेतुर्जयतिवटुकनाथःसिद्धिदःसाधकानाम्॥४७॥इतिसर्वसाधारणध्यानम्॥ध्या
त्वाजपेत्सुसंहृष्टःसर्वान्कामानवाप्नुयात्॥आयुरारोग्यमैश्वर्यंसिद्ध्यर्थंविनियोजयेत्॥४८॥ॐअस्यश्रीआ
पदुद्धारणवटुकभैरवाष्टोत्तरशतनामस्तोत्रमन्त्रस्यबृहदारण्यकऋषिरनुष्टुप्छन्दःश्रीभैरवोदेवताह्रींबीजं
वटुकायेतिशक्तिःप्रणवःकीलकंममाभीष्टसिद्ध्यर्थेजपेविनियोगः॥ॐबृहदारण्यकऋषयेनमःशिरसि॥

ॐ अनुष्टुप्छन्दसे नमः मुखे ॥ ॐ भैरवदेवताय नमः हृदये ॥ ॐ ह्रीं बीजाय नमः गुह्ये ॥ ॐ वटुकशक्तये नमः
पादयोः ॥ ॐ प्रणवकीलकाय नमः सर्वाङ्गे ॥ ॐ ह्रां वां अङ्गुष्ठाभ्यां नमः ॥ ॐ ह्रीं वीं तर्जनीभ्यां स्वाहा ॥ ॐ ह्रूं वूं मध्य
माभ्यां वषट् ॥ ॐ ह्रैं वैं अनामिकाभ्यां हुम् ॥ ॐ ह्रौं वौं कनिष्ठिकाभ्यां वौषट् ॥ ॐ ह्रः वः करतलकरपृष्ठाभ्यां फट् ॥
ॐ ह्रां वां हृदयाय नमः ॥ ॐ ह्रीं वीं शिरसे स्वाहा ॥ ॐ ह्रूं वूं शिखायै वषट् ॥ ॐ ह्रैं वैं कवचाय हुम् ॥ ॐ ह्रौं वौं नेत्रत्र
याय वौषट् ॥ ॐ ह्रः वः अस्त्राय फट् ॥ ॐ अतिक्रूर महाकाय कल्पान्तदहनोपम ॥ भैरवाय नमस्तुभ्यमनु
ज्ञां दातुमर्हसि ॥ ४६ ॥ अथ ध्यानम् ॥ ॐ शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं खड्गं च वज्रं पर

शुमुशलके दक्षिणाङ्गे वहन्तम् ॥ नागं पाशं च घण्टां प्रलयहुतवहं साङ्कुशं वामभागे नानालङ्कारयुक्तं स्फटिक

मणिनिभंनौमिनन्दीशिवाख्यम्॥अक्षतशर्षपोदक्षिणवामपादयोन्यस्यदक्षिणाभिमुखोभूत्वापठेत्॥

॥ॐह्रींह्रौंनमःशिवाय॥ॐह्स्ख्फ्रेंह्सौंह्रौंतत्पुरुषायविद्महेश्रीवटुकायधीमहि॥तन्नोदण्डिःप्रचो

दयात्॥ॐशिखानाथायविद्महेह्रींस्वच्छन्दायधीमहि॥ॐतन्नोरुद्रप्रचोदयात्॥ॐनागपाशयु

तंकपालवरदंखट्वाङ्गमेकंकरेखड्गंशूलमथस्रजं[redacted]डमरुकंबिभ्रत्करैरङ्कुशम्॥नग्नःकालवपुर्धरस्त्रि

नयनोदंष्ट्राकरालाननःपायादूर्ध्वशिरोरुहःफणिगलसद्वक्षःस्थलोभैरवः॥५१॥आनीलकुन्तलमसृ

करंकपालुंमौञ्जीवनंस्मितमनोज्ञमुखारविन्दम्॥कल्याणदण्डकमनीयकपालपाणिंवन्दामहेवटुक

नाथमभीष्टसिद्ध्यै॥५२॥क्वाकाशःक्वसमीरणःक्वदहनःक्वाम्बुःक्वविश्वंभराक्वब्रह्माक्वजनार्दनःक्वतर


व॰भै॰ शिराःश्चेन्दुःक्षदेवासुराः॥विश्वाजारभटीनटःप्रमुदितःश्रीसिद्धयोगीश्वरःक्रीडानाटकनायकोविजयतेदेवो
८ महाभैरवः॥५३॥एवंध्यात्वाततोदेवीनामाष्टशतमुत्तमम्॥भैरवोपिप्रहृष्टोभूत्स्वयंभूःसमहेश्वरः॥५४॥
॥ ॥श्रीईश्वरउवाच॥ ॥ॐभैरवोभूतनाथश्चभूतात्माभूतभावनः॥क्षेत्रज्ञःक्षेत्रपालश्चक्षेत्रदःक्ष
त्रियोविराट्॥५५॥१॥स्मशानवासीमांसाशीखर्पराशीमखान्तकृत्॥रक्तपःपानपःसिद्धःसिद्धिदःसि
द्धसेवितः॥५६॥२॥ॐहुँकङ्कालःकालशमनःकलाकाष्ठातनुःकविः॥त्रिनेत्रोबहुनेत्रश्चतथापिङ्गल
लोचनः॥५७॥३॥ॐश्रीँक्लीँह्रीँशूलपाणिःखड्गपाणिःकपालीधूम्रलोचनः॥अभीरुर्भैरवीनाथोभूतपो राम
योगिनीपतिः॥५८॥४॥धनदोधनहारीचधनवान्प्रीतिभाववान्॥नागहारोनागपाशोव्योमकेशः ८

कपालभृन्नरः॥५९॥५॥कालःकपालमालीचकमनीयःकलानिधिः॥त्रिलोचनोज्वलन्नेत्रस्त्रिशिखी
चत्रिलोकपः॥६०॥६॥त्रिनेत्रस्तनयोडिम्भःशान्तःशान्तजनप्रियः॥वटुकोवहुवेषश्चखट्वाङ्गव
रधारकः॥६१॥७॥भूताध्यक्षःपशुपतिर्भिक्षुकःपरिचारकः॥धूर्त्तोदिगम्बरःशूरोहरिणःपाण्डुलोच
नः॥६२॥८॥प्रशान्तःशान्तिदःशुद्धःशङ्करप्रियबान्धवः॥अष्टमूर्त्तिर्निधीशश्चज्ञानचक्षुस्तपोमयः॥
६३॥९॥अष्टाधारःषडाधारःसर्पयुक्तःशिखीसखः॥भूधरोभूधराधीशोभूपतिर्भूधरात्मजः॥६४॥१०॥
कंकालधारीमुण्डीचनागयज्ञोपवीतकः॥जृम्भणोमोहनस्तम्भीमारणःक्षोभणस्तथा॥६५॥११॥शु
द्धोनीलाञ्जनप्रख्योदैत्यहामुण्डभूषितः॥वलिभुग्वलिभुङ्नाथोवालोवालपराक्रमः॥६६॥१२॥सर्वापत्तार

व॰भै॰ कोदुर्गोदुष्टभूतनिसेवितः॥कामीकलानिधिःकान्तःकामिनीवशकृद्वशी॥६७॥१३॥सर्वसिद्धिप्रदोवैद्यःप्र
६ भुर्विष्णुरितिवहि॥१४॥अष्टोत्तरशतंनाम्नांभैरवस्यमहात्मनः॥६८॥मयातेकथितंदेविरहस्यंसर्वकाम
दम्॥यइदंपठतेस्तोत्रंनामाष्टशतमुत्तमम्॥६९॥नतस्यदुरितंकिञ्चिन्नचभूतभयंतथा॥नचमारीभ
यंतस्यग्रहराजभयंतथा॥७०॥नशत्रुभ्योभयंकिञ्चित्प्राप्नुयान्मानवःक्वचित्॥पातकानांभयंनैवयःपठे
त्स्तोत्रमुत्तमम्॥७१॥मारीभयेराजभयेतथाचौराग्निजेभये॥औत्पातिकेमहाघोरेतथादुःस्वप्नजेभये॥७
२॥बन्धनेचतथाघोरेपठेत्स्तोत्रमनुत्तमम्॥सर्वंप्रशममायातिभयंभैरवकीर्तनात्॥७३॥एकादश रामः
सहस्रंतुपुरश्चरणमुच्यते॥यस्त्रिसन्ध्यंपठेद्देविसम्वत्सरमतन्द्रितः॥७४॥ससिद्धिंप्राप्नुयादिष्टांदुर्लभ ६

॥ अथ पूजासमुच्चयप्रारंभः ॥

मूल्यं १ रूप्यकः ।



॥ १ ॥ मंगलाचरणम् ॥ श्रीगणेशायनमः ॥ यंनिर्जरासुरनराअखिलार्थसिद्ध्यैभूयंतरायहतयेनुदिनंनमंति ॥ तंभक्तकामपरिपूरणकल्पवृक्षंभक्त्यागणेशमखिलार्थदमानतोस्मि ॥ १ ॥ प्राक्कृप्तसर्वसंग्राह्यब्रह्मकर्मसमुच्चये ॥ नकृतोविस्तरभियानानापूजादिसंग्रहः ॥ २ ॥ अतोऽसावारब्धःसुरनिकरपूजासमुदयोनृणांनित्याःकाम्याअनियतनिमित्तादिविषयाः ॥ सपर्यादेवानांपुरुषमहिलासंघविहितास्तथानामावल्योऽवसरमनुलक्ष्यात्ररचिताः ॥ ३ ॥ पूजाव्रतादिविषयाबहवोनिबंधाःसंत्येवयद्यपिनतेऽखिललोकलभ्याः ॥ निष्कृष्यसारमखिलार्थमिहापितेभ्यःपूजासमुच्चयममुंलघुमातनोमि ॥ ४ ॥

॥ २ ॥ ध्वजारोपणंपंचांगश्रवणंच ॥ श्रीगणेशायनमः ॥ संवत्सरप्रतिपदिप्रातर्गृहांगणाद्युपलिप्यरंगवल्लीतोरणादिभिरलंकृत्यसपरिवारस्तैलाभ्यंगंकृत्वामांगलिकस्नानंविधायकृतनित्यक्रियोवस्त्रालंकारभूषितोगृहद्वारदेशेसुशोभितंपुष्पपत्रमालादिविभूषितमारक्तवस्त्रनिर्मितंध्वजमुच्छ्रित्य आचम्यप्राणानायम्यदेशकालोत्कीर्तनांतेअस्मिन्प्राप्तनूतनवत्सरेऽस्मद्गृहेऽब्दांतर्नित्यमंगलावाप्तयेध्वजारोपणपूर्वकंपूजनंतथाआरोग्यावाप्तयेनिंबपत्रभक्षणंचकरिष्ये ॥ गणपतिंसंपूज्यन्यासादिविधाय ॥ ॐब्रह्मध्वजायनमःइतिषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ ब्रह्मध्वजनमस्तेस्तुसर्वाभीष्टफलप्रद ॥ प्राप्तेऽस्मिन्वत्सरेनित्यंमद्गृहेमंगलंकुरु ॥ इति ॥ ततोमरीचहिंगुलवणजीरकाजमोदादिसंस्कृतंनिंबपत्रंभक्षयेत् ॥ ततोदेशकालौनिर्दिश्यपंचांगश्रवणकल्पोक्तफलावाप्तयेज्योतिर्विन्मुखात्पंचांगश्रवणंकरिष्ये ॥ गणपतिंज्योतिर्विदंचसंपूज्यतन्मुखात्पंचांगस्थराजावल्यादिश्रुत्वातंवस्त्रदक्षिणादिभिःसंतोष्यपंचांगदानंकृत्वाविप्रसुहृद्युतोमिष्टान्नंभुंजीत ॥ इतिसंवत्सरप्रतिपद्विधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ३ ॥ आसनविधिर्भूशुद्धिः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुककर्मपूजांवाकरिष्ये ॥ तत्रादौशरीरशुद्ध्ये
भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकान्यासांश्चकरिष्ये ॥ इतिसंकल्प्य ॥ उत्पतंत्विहभूतानिपृथिव्यंतरवासिनः ॥
आसनादौनमस्कृत्यब्रह्मकर्मसमारभे ॥ अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञया ॥ अप
क्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामवरोधेनब्रह्मकर्मसमारभे ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायन
मस्तुभ्यमनुज्ञांदातुमर्हसि ॥ इतिवामपादपार्ष्णिनाभूमिंत्रिस्ताडयेत् ॥ समुद्रवसनेदेविपर्वतस्तनमंडिते ॥ विष्णुपत्निनमस्तुभ्यं
पादस्पर्शंक्षमस्वमे ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदः आसनेविनियोगः ॥ पृथ्वित्वयाधृतालोकादेवित्वंवि
ष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अनंतासनायनमः विमलासनाय० योगासनाय० कूर्मासनाय० आधारशक्त
ये० दुष्टविद्रावणनृसिंहाय० मध्येपरमसुखाय० ॐभूर्भुवःस्वः इत्यासनेउपविश्य ॥ अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरं ॥ म
ध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं ॥ कनिष्ठिक्यांन्यसेद्विष्णुंकरमध्येतुमाधवं ॥ एवंचकरविन्यासंसर्वपापप्रणाशनं ॥ (ॐ
कारःसर्वत्रादौ) ॐभूःपादाभ्यांनमः भुवःजानुभ्यां० स्वःकटिभ्यां० महःनाभ्यै० जनःहृदयाय० तपःकंठाय० सत्यंललाटा
य० परब्रह्मशिरसेस्वाहा ॥ स्वशिरसि गुंगुरुभ्यो० पंपरमगुरुभ्यो० पंपरात्परगुरुभ्यो० पंपरमेष्ठिगुरुभ्योनमः ॥ दक्षिणभुजे ॥ १ ॥
गंगणपतये० ॥ वामभुजे दुंदुर्गायै० ॥ दक्षिणजानुनि क्षंक्षेत्रपालाय० ॥ वामजानुनि संसरस्वत्यै० ॥ हृदये अंआत्मने० पंप
रमात्मने० संसत्त्वात्मने० रंरजआत्मने० तंतमआत्मने० ॥ नमोस्त्वनंतायनमोस्तुवेधसेनमोवसिष्ठायनमोस्तुशक्तये ॥ पराशरा

याथनमोस्तुसात्वतेनमोस्तुतेसत्यवतीसुताय॥ नमोगुरुभ्योगुरुपादुकाभ्योनमःपरेभ्यःपरपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्योनमोस्तुलक्ष्मीपतिपादुकाभ्यः ॥ ॐ नमोमहद्भ्योनमो० सर्वभूतनिवारणायसशरायहः सशार्ङ्गायसुदर्शनायास्त्रराजायहुंफट् इतिछोटिकाबंधंकृत्वा उदकोपस्पर्शः प्राणायामः॥ धर्मकंदसमुद्भूतंज्ञाननालंसुशोभितं ॥ ऐश्वर्याष्टदलोपेतंपरंवैराग्यकर्णिकं ॥ अधोमुखंतुहृत्पद्मंप्रणवेनोर्ध्वमुन्नयेत् ॥ ॐ इतिप्रणवेनविकसितंकृत्वातत्रत्यजीवात्मानंहंसइतिमंत्रेणांकुशमुद्रयासुषुम्नानाडीमार्गेणब्रह्मरंध्रंनीत्वा तत्रत्यसहस्रदलपद्मकर्णिकांतर्गतेनपरमात्मनासहैक्यभावमापादयेत् हंसःसोहं ॥ ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं ॥ तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरोमाणंरक्तश्मश्रुविलोचनं ॥ अधोमुखंकृष्णवर्णमंगुष्ठपरिमाणकं ॥ खड्गचर्मधरंपापंवामकुक्षौविचिंतयेत् ॥ एवंलक्षणंपापपुरुषंवामकुक्षौविचिंत्य यमितिवायुबीजेन १६ षोडशबारंवामनासापुटेनसंशोष्य रमित्यग्निबीजेन ६४ चतुःषष्टिवारंकुंभकेनसंदह्य पुनर्यमितिबीजेन ३२ द्वात्रिंशद्वारंतद्भस्मदक्षिणनासापुटेनबहिर्निःसार्य वमित्यमृतबीजेन १६ षोडशवारममृतीकुर्यात् ॥ इतिभूशुद्धिः॥

॥ ४ ॥ भूतशुद्धिः ॥ पादादिजानुपर्यंतंपृथिवीस्थानंचतुरस्रंचतुर्दिक्षुलांछितंतन्मध्येपीतवर्णलंबीजयुक्तंध्यायेत् ॐस्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथः ॥ लंभूम्यैनमः जान्वादिनाभिपर्यंतमपांस्थानंधनुराकारमुभयोःकट्योःश्वेतपद्मलांछितंतन्मध्येश्वेतवर्णवंबीजयुक्तंध्यायेत् ॐ अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः॥वंअद्भ्योनमः नाभ्यादिहृदयपर्यंतमग्निस्थानंत्रिकोणंस्वस्तिकलांछितंतन्मध्येरक्तवर्णरंबीजयुक्तंध्यायेत् ॐअग्निंदूतंवृणीमहे

होतारंविश्ववेदसं ॥ अस्ययज्ञस्यसुक्रतुं ॥ रंअग्नयेनमः हृदयादिभ्रूमध्यपर्यंतंवायुस्थानंषट्कोणंषड्बिंदुलांछितंतन्मध्येधूम्रवर्णं यंबीजयुक्तंध्यायेत् ॐवायोशुतंहरीणांयुवस्वपोष्याणां ॥ उतवांतेसहस्रिणोरथआयांतुपाजसा ॥ यंवायवेनमः भ्रूमध्यादिब्रह्म रंध्रपर्यंतमाकाशस्थानंवृत्ताकारंध्वजलांछितंनीलवर्णंहंबीजयुक्तंध्यायेत् ॐआदित्प्रत्नस्यरेतसोज्योतिंष्पश्यंतिवासरं ॥ परोयदि ध्यतेदिवा ॥ हंआकाशायनमः ॥ पृथिवींपंचगुणांलंबीजेनषड्डुद्घातप्रयोगेणाप्सुप्रविलापयामि लंलंलंलंलंलं ॥ चतुर्गुणाअपःवं बीजेनपंचोद्घातप्रयोगेणाग्नौप्रविलापयामि वंवंवंवंवं ॥ त्रिगुणंवह्निंरंबीजेनचतुरुद्घातप्रयोगेणवायौप्रविलापयामि रंरंरंरं ॥ द्वि गुणंवायुंयंबीजेनत्रिरुद्घातप्रयोगेणाकाशेप्रविलापयामि यंयंयं ॥ एकगुणमाकाशंहंबीजेनद्विरुद्घातप्रयोगेणाहंकारेप्रविलापया मि हंहं ॥ तमहंकारंमहत्तत्त्वेप्रविलापयामि तन्महत्तत्त्वंप्रकृतौप्रविलापयामि तांप्रकृतिंपरब्रह्मणिप्रविलापयामि इतिप्रविलाप्य शुद्धोहंमुक्तोहंसच्चिदानंदस्वरूपोहंब्रह्माहमस्मीतिचिरंभावयेत् ॥ तस्मात्सर्वज्ञात्सर्वशक्तेःपरब्रह्मणःसकाशात्प्रकृतिःप्रकृतेर्महान् महतोहंकारःअहंकारादाकाशःआकाशाद्वायुःवायोरग्निःअग्नेरापःअद्भ्यःपृथिवीपृथिव्याओषधयःओषधीभ्योन्नंअन्नाद्रेतःरेतसः पुरुषःसवाएषपुरुषोन्नरसमयःइतिदेहोत्पत्तिंविभाव्यपुनर्जीवात्मानंहंसइतिमंत्रेणांकुशमुद्रयासुषुम्नानाडीमार्गेणब्रह्मरंध्रादानीय हृदिप्रतिष्ठापयेत् ॥ हंसःसोहं ॥ इतिभूतशुद्धिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ५ ॥ प्राणप्रतिष्ठा ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामाथर्वाणिछंदांसि पराप्राणशक्ति र्देवता आंबीजं ह्रींशक्तिः क्रोंकीलकं स्वशरीरेप्राणप्रतिष्ठापनेविनियोगः ॥ तत्रऋष्यादिन्यासः ॥ ब्रह्मविष्णुमहेश्वरऋषिभ्यो

नमः शिरसि ऋग्यजुःसामाथर्वछंदोभ्योनमःमुखे पराप्राणशक्तिदेवतायैनमःहृदये आंबीजायनमःगुह्ये ह्रींशक्तयेनमःपादयोः क्रौंकीलकायनमःसर्वांगे प्राणप्रतिष्ठापनेविनियोगः ॥ ॐ आंह्रींक्रौंअंकंखंगंघंङंआंक्रौंह्रींआं पृथिव्यप्तेजोवाय्वाकाशात्मने अंगुष्ठाभ्यांनमःहृदयायनमः ॥ ॐआंह्रींक्रौंइंचंछंजंझंञंईंक्रौंह्रींआं शब्दस्पर्शरूपरसगंधात्मनेतर्जनीभ्यांनमःशिरसेस्वाहा॥ॐआं ह्रींक्रौंउंटंठंडंढंणंऊंक्रौंह्रींआं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेमध्यमाभ्यांनमःशिखायैवषट् ॥ ॐआंह्रींक्रौंएंतंथंदंधंनंऐंक्रौंह्रींआं वाक्पाणिपादपायूपस्थात्मनेअनामिकाभ्यांनमःकवचायहुं ॥ ॐआंह्रींक्रौंओंपंफंबंभंमंऔंक्रौंह्रींआं वक्तव्यादानगमनविसर्गानंदात्मनेकनिष्ठिकाभ्यांनमःनेत्रत्रयायवौषट् ॥ ॐआंह्रींक्रौंअंयंरंलंवंशंषंसंहंक्षंअःक्रौंह्रींआं मनोबुध्यहंकारचित्तविज्ञानात्मने करतलकरपृष्ठाभ्यांनमःअस्त्रायफट्॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैःपाशंकोदंडमिक्षूद्भवमथगुणमप्यंकुशं पंचबाणान्॥बिभ्राणासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः॥चत्वारिवाक्० इतिजप्त्वा ॐ लं पृथिव्यात्मकंप्राणशक्त्यैगंधंकल्पयामि ॐ हं आकाशात्मकंप्राणशक्त्यैपुष्पंक० ॐ यं वाय्वात्मकंप्राणशक्त्यैधूपं क० ॐरं वह्न्यात्मकंप्राणशक्त्यैदीपं० ॐवं अमृतात्मकंप्राणशक्त्यैनैवेद्यंक० ॐसंसर्वात्मकान्प्राणशक्त्यैसर्वोपचारान्क० ॐआंह्रींक्रौंअंयंरंलंवंशंषंसंहंक्षंअःक्रौंह्रींआं हंसःसोहं ममप्राणाइहप्राणाः॥ॐआंह्रींक्रौंअंयंरंलंवंशंषंसंहंक्षंअःक्रौंह्रींआंहंसः सोहंममजीवइहस्थितः ॥ ॐआंह्रींक्रौंअंयंरंलंवंशंषंसंहंक्षंअःक्रौंह्रींआंहंसःसोहंममसर्वेंद्रियाणि॥ॐआंह्रींक्रौंअंयंरंलंवंशंषंसंहंक्षंअःक्रौंह्रींआंहंसःसोहंममवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतुस्वाहा इतिशिरसिहृदिवाकरंद

त्वात्रिःसकृद्वाजस्त्वा ॥ ॐ असुनीतेपुनरस्मासुचक्षुःपुनःप्राणमिहनोंधेहिभोगं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानःस्व
स्ति ॥ गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थपंचदशप्रणवावृत्तीःकरिष्ये ॐकारंपंचदशवारंजपेत् ॥ इतिप्राणप्रतिष्ठा ॥ ॥
॥ ६ ॥ अंतर्मातृकान्यासः ॥ अस्यश्रीअंतर्मातृकासरस्वतीमंत्रस्य ब्रह्माऋषिः गायत्रीछंदः अंतर्मातृकासरस्वतीदेवता ॥ ६ ॥
हलोबीजानि स्वराःशक्तयः बिंदवःकीलकं मातृकान्यासेविनियोगः ॥ तत्रऋष्यादिन्यासः ॥ ब्रह्मर्षयेनमःशिरसि गायत्रीछं
दसेनमोमुखे अंतर्मातृकासरस्वतीदेवतायैनमोहृदये हल्बीजेभ्योनमोगुह्ये स्वरशक्तिभ्योनमःपादयोः बिंदुकीलकायनमःसर्वा
गे मातृकान्यासेविनियोगः ॥ ॐ अंकंखंगंघंङंआंअंगुष्ठाभ्यांनमः ॥ ॐइंचंछंजंझंञंईतर्जनीभ्यांनमः ॥ ॐ उंटंठंडंढंणंऊंम
ध्यमाभ्यांनमः ॥ ॐएंतंथंदंधंनंऐंअनामिकाभ्यांनमः ॥ ॐ ओंपंफंबंभंमंऔंकनिष्ठिकाभ्यांनमः ॥ ॐ अंयंरंलंवंशंषंसंहंक्षंअः
करतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादिन्यासः ॥ आधारेलिंगनाभौहृदयसरसिजेतालुमूलेललाटेद्वेपत्रेषोडशारेद्विदशदशदले
द्वादशार्धेचतुष्के ॥ वासांतेबालमध्येडफकठसहितेकंठदेशेस्वराणांहंक्षंतत्त्वार्थयुक्तंसकलबुधनुतंवर्णचक्रंनमामि ॥ चत्वारिवा
क्० ऋ० १ अग्रेसर्वत्रादौप्रणवःअंतेहंसःसोहंएवंसर्वत्र ॥ यथा ॥ ॐ अंनमःहंसःसोहं आंनमःहंसःसोहं इं ईं उं ऊं ऋं ॠं ऌं ॡं
एं ऐं ओं औं अं अः एतांस्तत्त्वार्थयुक्तान्षोडशस्वरान्कंठस्थानगतपद्मेषोडशदलेषुविन्यसामि ॥ कंनमः खं गं घं ङं चं छं जं

झं ञं टं ठं एतांस्तत्त्वार्थयुक्तान्द्वादशवर्णान्हृदयस्थानगतपद्मेद्वादशदलेषुविन्यसामि ॥ डं ढं णं तं थं दं धं नं पं फं एतांस्त
त्त्वार्थयुक्तान्दशवर्णान्नाभिस्थानगतपद्मेदशदलेषुविन्यसामि ॥ बं भं मं यं रं लं एतांस्तत्त्वार्थमध्यान्षड्वर्णांलिंगस्थानगतपद्मे

षड्दलेषुविन्यसामि ॥ वं शं षं सं एतांस्तत्त्वार्थयुताश्चतुर्वर्णानाधारस्थानगतपद्मेचतुर्दलेषुविन्यसामि ॥ हं क्षं एतत्तत्त्वार्थयु क्तंवर्णद्वयंभ्रूमध्यगतपद्मेद्विदलयोर्न्यसामि ॥ इत्यंतर्मातृकान्यासः ॥ ॥ छ ॥ ॥ छ ॥

॥ ७ ॥ अथबहिर्मातृकान्यासः ॥ अस्यश्रीबहिर्मातृकासरस्वतीमंत्रस्य ब्रह्माऋषिः गायत्रीछंदः बहिर्मातृकासरस्वतीदे वता हलोबीजानि स्वराःशक्तयः बिंदवःकीलकं बहिर्मातृकान्यासेविनियोगः ॥ तत्रऋष्यादिन्यासः ॥ ब्रह्मर्षयेनमःशिरसि गायत्रीछंदसेनमोमुखे बहिर्मातृकासरस्वतीदेवतायैनमोहृदि हल्बीजेभ्योनमोगुह्ये स्वरशक्तिभ्योनमःपादयोः बिंदुकीलकाय नमःसर्वांगे बहिर्मातृकान्यासेविनियोगः ॥ पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशांभास्वत्कपर्दाकलितशशिकला मिंदुकुंदावदातां ॥ अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांपद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतींतांनमामि ॥ ॐ चत्वारिवाक्परिमिता० अंनमःशिरसि आंनमोमुखे इं. दक्षिणनेत्रे ईं. वामनेत्रे उं. दक्षिणकर्णे ऊं. वामकर्णे ऋं. दक्षनासापुटे ॠं. वामनासापुटे ऌं. दक्षकपोले ॡं. वामकपोले एं. ऊर्ध्वोष्ठे ऐं. अधरोष्ठे ओं. ऊर्ध्वदंतपंक्तौ औं. अधोदंतपंक्तौ अं. जिह्वायां अः. कंठे कं खं गं घं ङं दक्षिणहस्तसंध्यग्रेषु. ॥ चं छं जं झं ञं वामहस्तसंध्यग्रेषु. ॥ टं ठं डं ढं णं दक्षिणपादसंध्यग्रेषु. ॥ तं थं दं धं नं वामपादसंध्यग्रेषु. ॥ पं. दक्षिणकुक्षौ फं. वामकुक्षौ बं. पृष्ठे भं. नाभौ मं. उदरे यं. हृदि रंनमःकंठे लंनमः ककुदि वंनमः स्कंधयोः शंनमः हृदादिदक्षिणकरे षंनमः हृदादिवामकरे संनमःहृदादिदक्षिणपादे हंनमःहृदादिवामपादे ळंक्षं व्यापकं ॥ इतिबहिर्मातृकान्यासः ॥ ॥ छ ॥ ॥ छ ॥

॥ ८ ॥ सामान्यतःपंचायतनपूजा ॥ तत्रोदयात्पूर्वंनिर्माल्यमपसार्ययथाकालेपूजारंभः ॥ येभ्योमातेत्यस्यगयःप्लातो
विश्वेदेवाजगती एवापित्रइत्यस्यवामदेवोबृहस्पतिर्विश्वेदेवास्त्रिष्टुप् मनुष्यगंधनिवारणेवि० ॥ ॐ येभ्योमातामधुमत्पिन्वतेप
यःपीयूषंद्यौरदितिरद्रिबर्हाः॥ उक्थशुष्मान्वृषभरान्त्स्वप्नसस्ताँआदित्याँअनुमदास्वस्तये ॥ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेम
नमसाहविर्भिः॥ बृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयीणां ॥ इतिपठन्घंटानादंकृत्वाआचम्यप्राणानायम्यदेशकालादिकी
र्तनांतेममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्रीमहाविष्णुपूजांकरिष्यइतिपंचायतनपक्षेश्रीरुद्रविनायकसूर्यशक्तिपरिवृत
श्रीमहाविष्णुपूजांकरिष्ये ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिःकूर्मोदेवतासुतलंछंदःआसनेविनियोगः ॥ ॐ पृथ्वित्वयाधृतालोकादे
वित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनम् ॥ अपसर्पंतुवामदेवोभूतान्यनुष्टुप् भूतोत्सादनेविनियोगः ॥ ॐ
अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञया ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशम् ॥
सर्वेषामवरोधेनपूजाकर्मसमारभे ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ इतिभैरवं
नमस्कृत्यवामपादतलपार्ष्णिनभूमिंत्रिःप्रहृत्य देवाआयांतु यातुधानाअपयांतु विष्णोदेवयजनंरक्षस्व भूमौप्रादेशंकुर्यात् ॥ सहस्र
शीर्षेतिषोडशर्चस्यसूक्तस्यनारायणःपुरुषोनुष्टुबंत्यात्रिष्टुप् न्यासेपूजायांचविनियोगः ॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपा
त् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ वामकरे ॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोह
ति ॥ दक्षिणकरे ॥ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ वामपादे ॥ त्रिपादू

र्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ दक्षिणपादे ॥ तस्माद्विराळजायतविराजोऽअ
धिपूरुषः॥सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥वामजानुनि॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोऽअस्यासीदाज्यं
ग्रीष्मइध्मःशरद्धविः॥दक्षिणजानुनि॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥ तेनदेवाऽअयजंतसाध्याऋषयश्चये॥वामकट्यां ॥
तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशून्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ दक्षिणकट्यां ॥ तस्माद्यज्ञात्सर्वहुतऋचःसा
मानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ नाभ्यां ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मा
त्तस्माज्जाताऽअजावयः ॥ हृदये ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहूकाऊरूपादाउच्यते ॥ कंठे ॥
ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत ॥ वामभुजे ॥ चंद्रमामनसोजातश्चक्षोःसू
र्योऽअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ दक्षभुजे ॥ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमि
र्दिशःश्रोत्रात्तथालोकाँऽअकल्पयन् ॥ मुखे ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंप
शुं ॥ नेत्रयोः ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥
शिरसि ॥ पंचांगन्यासः ॥ ॐ ब्राह्मणोस्यमुखं० हृदयायनमः ॥ चंद्रमामनसोजातः० शिरसेस्वाहा ॥ नाभ्याऽआसी० शिखा
यैवषट् ॥ सप्तास्यासन्० कवचायहुं ॥यज्ञेनयज्ञमयजंत० अस्त्रायफट् इतिदिग्बंधः ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥
मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥

अंगैश्चसहिताःसर्वेकलशांबुसमाश्रिताः ॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा ॥ आयांतुदेवपूजार्थंदुरितक्षयकारकाः ॥
गंगेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधोकावेरिजलेस्मिन्संनिधिंकुरु ॥ कलशेवरुणमावाहयामिचंदनंपुष्पंस० ॥ प्रक्षा
लितंशंखंप्रणवेनापूर्य ॥ शंखादौचंद्रदैवत्यंकुक्षौवरुणदेवता ॥ पृष्ठेप्रजापतिश्चैवअग्रेगंगासरस्वती ॥ त्रैलोक्येयानितीर्थानिवासु
देवस्यचाज्ञया ॥ शंखेतिष्ठंतिविप्रेंद्रतस्माच्छंखंप्रपूजयेत् ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ॥ नमितःसर्वदेवैश्चपांचजन्य
नमोस्तुते ॥ पांचजन्यायविद्महेपावमानायधीमहि ॥ तन्नःशंखःप्रचोदयात् ॥ शंखायचंदनंपुष्पं० ॥ आगमार्थंतुदेवानांगम
नार्थंचरक्षसां ॥ कुर्वेघंटारवंतत्रदेवताह्वानलक्षणं ॥ घंटायैचंदनंपुष्पं० ॥ शंखोदकेनात्मानंप्रोक्ष्यपूजासंभारंप्रोक्षेत् ॥ कलशंशं
खघंटेचपाद्यार्घ्याचमनीयकं ॥ संपूज्यप्रोक्ष्यचात्मानंपूजासंभारमेवच ॥ ध्यायेदभिमतांविष्णुमूर्तिंसंपूजयेत्ततः ॥ शांताकारं
इत्यादिध्यात्वा सहस्रशीर्षा० आवाहयामि ॥ (शालग्रामादावावाहनाभावान्मंत्रपुष्पं ऋगंतेश्रीमहाविष्णवेश्रीकृष्णायेत्येवमभि
मतमूर्तिंचतुर्थ्योद्दिश्यसर्वोपचारार्पणं पंचायतनेतुश्रीविष्णवेशिवविनायकसूर्यशक्तिभ्यश्चेत्येवंयथोपास्यमुच्चारः नैवेद्यादौपा
र्थक्याभावेयथांशतइतिवदेत्) पुरुषएवेदं० आसनं ॥ एतावानस्य० पाद्यं ॥ त्रिपादूर्ध्व० अर्घ्यं ॥ तस्माद्विराळ० आचमनीयं ॥
यत्पुरुषेण० स्नानं ॥ संभवेपंचामृतस्नानान्याप्यायस्वेत्यादिमंत्रैः चंदनोशीरकर्पूरकुंकुमागरुवासितजलैःसुवर्णघर्मानुवाकमहा ॥ ५ ॥
पुरुषविद्यापुरुषसूक्तराजनसामभिरभिषेकः ॥ आचम० ॥ तंयज्ञंबर्हिषि० वस्त्रं ॥ आचम० ॥ तस्माद्यज्ञात्०यज्ञोपवीतं ॥ आच० ॥
तस्माद्यज्ञात्सर्वहुतऋचः० गंधं० ॥ अहिरिव० परिमलद्रव्याणि ॥ तस्मादश्वा० पुष्पाणि ॥ तुलसीबिल्वाद्यर्पणं० ॥ यत्पुरुषं० धूपं० ॥

ब्राह्मणोस्य० दीपं॥स्नानेधूपेचदीपेचघंटादेर्नादमाचरेत्॥ चंद्रमामनसो० नैवेद्यं॥ आचम०॥संभवेतांबूलंदक्षिणांश्रियेजातइ
तिनीराजनंच॥ नाभ्याआ० नमस्कारः॥सप्ता० प्रदक्षिणाः॥यज्ञेनयज्ञ० विसर्जनंपुष्पांजलिर्वा॥ दत्वाषोडशभिर्ऋग्भिःषोडशा
न्नस्यचाहुतीः॥ सूक्तेनप्रत्यृचंपुष्पंदत्वासूक्तेनसंस्तुयात्॥ ततःपौराणैःप्राकृतैश्चस्तुत्वा॥ शिरोमत्पादयोःकृत्वाबाहुभ्यांचप
रस्परं॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात्॥ इतिवदन्नमेत्॥ निर्माल्यंदेवदत्तंभावयित्वाशिरसिधारयेत्॥ विष्णुमू
र्ध्निस्थितंपुष्पंशिरसानवहेन्नरः॥ शंखोदकंशिरसिधृत्वादेवतीर्थंपूजांतेवैश्वदेवांतेवाशिरसिधार्यपेयंचतत्रक्रमः॥ विप्रपादोदकं
पीत्वाविष्णुपादोदकंपिबेत्॥ शालग्रामशिलातोयमपीत्वायस्तुमस्तके॥ प्रक्षेपणंचकुरुतेब्रह्महासनिगद्यते॥ पात्रांतरेणवैग्रा
ह्यंनकरेणकदाचनेतिकमलाकरःक्षालनेनएकस्यैववस्त्रस्यप्रतिदिनंदानेदोषोन॥ स्वर्णादिभूषणानामप्येवमाचारः॥ इतिपूजा॥

॥ ९॥ सर्वसामान्यपूजा॥ आचमनादिदेशकालकीर्तनांतेममेहजन्मनिजन्मांतरेचाखिलसौभाग्यपुत्रपौत्रधनधान्यादि
समस्तमंगलावाप्त्यर्थंसमस्तदुरितोपशांत्यर्थंसमस्ताभ्युदयार्थंचअमुकदेवतापूजनंकरिष्ये॥ तदंगत्वेनकलशाद्यर्चनंनिर्विघ्नता
सिद्ध्येगणपतिपूजनंस्मरणंवाकरिष्ये॥ वक्रतुंडमहाकायकोटिसूर्यसमप्रभ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा॥ मंगलमूर्तये
नमः॥ गंगेचयमुनेचैवगोदावरिसरस्वति॥नर्मदेसिंधोकावेरिजलेस्मिन्संनिधिंकुरु॥ अस्मिन्कलशेगंगादिनदीःवरुणंचावाह
यामि गंधाक्षतपुष्पंसमर्पयामि॥ आगमार्थंतुदेवानांगमनार्थंचरक्षसां॥ कुर्वेघंटारवंतत्रदेवताह्वानलक्षणं॥ घंटायैनमःगंधा
क्षत०॥ भोदीपब्रह्मरूपस्त्वंज्योतिषांप्रभुरव्ययः अतस्त्वांस्थापयाम्यत्रममशांतिप्रदोभव॥ दीपदेवतायैगंधाक्षत०॥ अप

वित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ कलशोदकेनात्मानंपूजाद्रव्याणिचप्रोक्षेत् ॥
अथध्यानं ॥ ध्यायेत्पद्मासनारूढंसायुधंसुचतुर्भुजं ॥ नानालंकारशोभाढ्यंदिव्यमाल्यांबरान्वितं ॥ ध्यानं० ॥ आवाहयामिभ
क्त्यात्वांशिबिकाभिर्हयैर्गजैः ॥ पूजार्थंमंडपेनानामणिहाटकनिर्मिते ॥ आवाहनं० ॥ आसनंस्वर्णरत्नाढ्यंमृदुतूलपरिच्छदं ॥
ददामिभक्त्यास्थित्वास्मिन्नुपचारान्गृहाणभोः ॥ आसनं० ॥ पाद्यंस्वीकुरुमद्दत्तंचरणांबुरुहद्वये ॥ युक्तंसुगंधपुष्पाब्जमणिहेम
नवांकुरैः ॥ पाद्यं० ॥ अर्घ्यंहस्तद्वयेदत्तंचंदनोशीरवासितं ॥ यवदूर्वांकुरफलंपुष्परत्नान्वितंमुदा ॥ अर्घ्यं० ॥ आचम्यतांतो
यमिदंवस्त्रपूतंसुगंधितं ॥ आनीतंयमुनागंगातीर्थेभ्योतिप्रयत्नतः ॥ आचमनीयं० ॥ दुग्धंकामदुघोत्पन्नंदेवानांप्रीतिकारकं ॥
स्नानार्थंतेमयानीतंगृहाणघटसंभृतं ॥ पयःस्नानं० ॥ दधिस्नानंददाम्येतदानीतंदधिसागरात् ॥ गृहाणमसृणंस्वर्णघटस्थंचा
रुशीतलं ॥ दधिस्नानं० ॥ घृतंपितृमनुष्याणांदेवानांप्रीतिकारणं ॥ स्नातुंगृहाणतत्कालंप्रतप्तनवनीतजं ॥ घृतस्नानं० ॥ मधु
भ्रमरसंघुष्टंनानापुष्परसोद्भवं ॥ भक्त्यामयाहृतंशुद्धंस्नानार्थंप्रतिगृह्यतां ॥ मधुस्नानं० ॥ शर्करांगुडसंभूतांशुभ्रांमलनिवारि
णीं ॥ तुभ्यंददामिस्नानार्थंस्वादुस्वादुतरामहं ॥ शर्करास्नानं० ॥ मधुपर्कंगृहाणेमंकांस्यसंपुटसंस्थितं ॥ मध्वाज्यदधिरूपं
त्वंविधिपूर्वकमर्पितं ॥ मधुपर्कं० ॥ तैलंपुष्पसुगंधाढ्यंभ्रमद्भ्रमरनादितं ॥ विलेपयामिसर्वांगेसुवर्णचषकस्थितं ॥ तैलाभ्यंगं० ॥ ॥ ६ ॥
उन्मर्दनंतवांगेस्मिन्लेपयामिसुभक्तितः ॥ काश्मीरागरुकर्पूरमृगनाभिविनिर्मितं ॥ उन्मर्दनं० ॥ स्नानार्थंजलमानीतंशीतमु
ष्णंयथारुचि ॥ सुगंधितंसर्वनदीतीर्थेभ्यःप्रतिगृह्यतां ॥ स्नानं० ॥ पूर्वपूजांसमाप्य ॥ अभिषेकंकुर्यात् ॥ ततः ॥ वस्त्रयुग्मं

गृहाणेदंरत्नकिंकिणिकायुतं ॥ श्वेतंपीतंतथारक्तंनीलंचित्रंयथारुचि ॥ वस्त्रोपवस्त्रे० ॥ यज्ञसूत्रंत्रिवृत्सौत्रंराजतंकांचनंनवं ॥ रत्नग्रंथियुतंशुद्धंमंत्रितंप्रतिगृह्यतां ॥ यज्ञोपवीतंस० ॥ कंचुकींसूचिकावेधरहितांविश्वकर्मणा ॥ निर्मितांविलसन्मुक्तागुच्छां स्वीकुरुमंगले ॥ कंचुकीं० ॥ हरिद्रांमंगलेकार्येगृहीतांमुनिदैवतैः ॥ मातर्गृहाणसुस्निग्धांमुखचंद्रानुरंजनीं ॥ हरिद्रां० ॥ कुंकुमंसर्वसौभाग्यसूचकंभालभूषणं ॥ स्वीकुरुष्वजगन्मातर्जपाकुसुमभास्वरं ॥ कुंकुमंस० ॥ कज्जलंनवनीताढ्यंशुद्धकर्पूरमिश्रितं ॥ गृहाणनेत्रभूषार्थंदत्तंस्वर्णशलाकया ॥ कज्जलं० ॥ कंठसूत्रंकंकणानिताटंकेमौक्तिकंतथा ॥ मंजीरपदकादीनिस्वीकुरुत्वं जगन्मये ॥ सौभाग्यालंकारान्० ॥ अलंकारान्कंठकर्णशिरोहस्तनिवेशितान् ॥ गृहाणस्वर्णरत्नाढ्यान्बहुकौशल्यनिर्मितान् ॥ शेषालंकारान्० ॥ सिंदूरंनागसंभूतंस्त्रीणांसीमंतभूषणं ॥ मातर्ददामितेप्रीत्यैगृहाणजगदंबिके ॥ सिंदूरं० ॥ चंदनंमलयोद्भूतंकुंकुमागरुमिश्रितं ॥ अष्टगंधसमायुक्तमंगेभालेविलेपय ॥ चंदनं० ॥ अक्षतान्हीरकनिभान्रक्तान्पीतान्यथारुचि ॥ शोभार्थंसंप्रदास्यामिगृहाणसुमनोहरान् ॥ अक्षतान्० ॥ सुगंधचूर्णकाश्मीरकस्तूरीचंद्रगंधितं ॥ पटवासाभिधंमुस्तासंभूतमुररीकुरु ॥ सुगंधद्रव्यं० ॥ मालतीचंपकजपाबकुलाशोकदाडिमीः ॥ यथाप्रीतिसिताःपीताःपुष्पजातीर्गृहाणभोः ॥ नानाविधपुष्पाणि० ॥ तुलसीबिल्वदूर्वाम्रशमीबकुलपल्लवान् ॥ मयादत्तान्गृहाणेमान्सहस्रपरिसंमितान् ॥ पत्राणि० ॥ अंगपूजा ॥ पूज्यपादायनमः पादौपूजयामि ॥ सुगुल्फाय० गुल्फौ० ॥ अनघाय० जंघे० ॥ अजाय० जानुनी० ॥ व्यापकाय० ऊरू० ॥ स्वंगाय० कटिं० ॥ पूज्याय० नाभिं० ॥ विश्वभृते० उदरं० ॥ कृपावते० हृदयं० ॥ विश्वधात्रे० स्तनौ० ॥ चारुभूषाय०

कंठं० ॥ नानायुधाय० बाहू० ॥ सुमुखाय० मुखं० ॥ पद्मनेत्राय० नेत्रे० ॥ सुश्रुताय० कर्णौ० ॥ भक्तिप्रियाय० ललाटं० ॥ सर्वेशाय० शिरःपूजयामि ॥ धूपंनानापरिमलंयक्षकर्दममिश्रितं ॥ दशांगद्रव्यसंयुक्तमंगीकुरुमयार्पितं ॥ धूपं० ॥ दीपंकांचनपात्रस्थंनवगोघृतसाधितं ॥ अर्पयामिमहाध्वांतगजपंचास्यसन्निभं ॥ दीपं० ॥ नैवेद्यमन्नसूपाज्यशाकपक्वान्नसंयुतं॥ स्वर्णपात्रस्थितंस्वादुभुक्त्वात्वंतृप्तिमाप्नुहि॥ नैवेद्यं०॥ फलानिजंबूनारिंगनिंबाम्रकदलानिच ॥ गृहाणबदरीद्राक्षानारिकेलानि भक्षितुं ॥ फलानि० ॥ तांबूलंमुखरागार्थंलवंगैलादिसंयुतं ॥ पर्णक्रमुककर्पूरमुक्ताचूर्णान्वितंमुदा॥ तांबूलं० ॥ दक्षिणांनवरत्नाढ्यांस्वर्णरौप्यपरिष्कृतां॥ विपुलांबहुतोषार्थंस्थापयामितवाग्रतः॥ दक्षिणां० ॥ आरार्तिक्यंतवपुरःकरोम्युज्ज्वलदीपकैः॥ मणिकर्पूरतैलाज्यसंभवैर्लक्षसंमितैः ॥ नीराजनं० ॥ मंत्रपुष्पांजलिंपूजान्यूनत्वाधिक्यपूरणं ॥ ददामितंत्रपौराणमंत्रोच्चारणपूर्वकं ॥ मंत्रपुष्पांजलिंसमर्प० ॥ पदेपदेऽश्वमेधस्यफलंभवतिकुर्वतां ॥ ताःकरोमितवप्रीत्यैध्यानपूर्वप्रदक्षिणाः ॥ प्रदक्षिणाः० ॥ नमस्कारान्प्रकुर्वेहंमनसावचसादृशा ॥ भूमिसंलग्नहृत्पादललाटकरजानुकान् ॥ नमस्कारान्० ॥ गंधरत्नसुवर्णाब्ज दूर्वाक्षतफलान्वितं॥ विशेषार्घ्यंमयादत्तंव्रतसंपूर्तिहेतवे ॥ इतिविशेषार्घ्यंदत्वाप्रार्थयेत् ॥ आवाहनंनजानामिनजानामिविसर्जनं ॥ पूजांचैवनजानामिक्षम्यतांपरमेश्वर ॥ यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ॥ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ॥ अनेनयथाशक्तियथाज्ञानतःकृतपूजनेन

॥ ७ ॥

परमेश्वरःप्रीयतां ॥ ब्राह्मणंसंपूज्य ॥ वायनंवंशपात्रस्थंसवस्त्रंदक्षिणान्वितं ॥ ददामिद्विजमुख्यायव्रतसांगत्वसिद्धये ॥ इति वायनंदक्षिणांचदत्वाशिषोगृह्णीयात् ॥ इतिसामान्यपूजाविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ १० ॥ रामनवमीपूजा ॥ आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्यश्रीप० त्यर्थंममसमस्तपापक्षयद्वाराश्रीरामप्रीतयेरामनवमीव्रतांगत्वेनयथामिलितोपचारैः रामपूजांकरिष्ये ॥ तत्रादौनिर्विघ्न० गणपतिपू० पंचशब्दैःपुण्याहवाचनं तथाराममंत्रेणषडंगन्यासंकलशाद्यर्चनंचकरिष्ये ॥ गणपतिपूजनंपुण्याहवाचनादिचकृत्वा ॥ ततःफलपुष्पाक्षतसहितंजलपूर्णताम्रपात्रंगृहीत्वा ॥ उपोष्यनवमींत्वद्ययामेष्वष्टसुराघव ॥ तेनप्रीतोभवत्वंमेसंसारात्राहिमांहरे ॥ इतिमंत्रेणपात्रस्थंजलंक्षिपेत् ॥ अथध्यानं ॥ कोमलांगंविशालाक्षमिंद्रनीलसमप्रभं ॥ दक्षिणांगेदशरथंपुत्रावेक्षणतत्परं ॥ पृष्ठतोलक्ष्मणंदेवंसच्छत्रंकनकप्रभं ॥ पार्श्वेभरतशत्रुघ्नौचामरव्यजनान्वितौ ॥ अग्रेऽव्यग्रंहनूमंतंरामानुग्रहकांक्षिणं ॥ इतिध्यायेत् ॥ सहस्रशीर्षा० ॥ आवाहयामिविश्वेशंजानकीवल्लभंप्रभुं ॥ कौसल्यातनयंविष्णुंश्रीरामंप्रकृतेःपरं ॥ इत्यावाहनं ॥ श्रीरामागच्छभगवन्रघुवीरनृपोत्तम ॥ जानक्यासहराजेंद्रसुस्थिरोभवसर्वदा ॥ रामचंद्रमहेष्वासरावणांतकराघव ॥ यावत्पूजांसमाप्येहंतावत्त्वंसन्निधौभव ॥ इतिसन्निधापनं ॥ रघुनायकराजर्षेनमोराजीवलोचन ॥ रघुनंदनमेदेवश्रीरामाभिमुखोभव ॥ इतिसंमुखीकरणं ॥ पुरुषएवेदं० ॥ राजाधिराजराजेंद्ररामचंद्रमहीपते ॥ रत्नसिंहासनंतुभ्यंदास्यामिस्वीकुरुप्रभो ॥ आसनं० ॥ एतावानस्य० ॥ त्रैलोक्यपावनानंतनमस्तेरघुनायक ॥ पाद्यंगृहाणराजर्षेनमोराजीवलोचन ॥ पाद्यं० ॥ त्रिपादूर्ध्व० ॥ परिपूर्णपरानंदनमोरामायवेधसे ॥ गृहाणार्घ्यंमयादत्तंकृष्णविष्णोज

नार्दन॥अर्घ्यं॥तस्माद्विराळ०॥नमःसत्यायशुद्धायनित्याययज्ञानरूपिणे ॥ गृहाणाचमनंनाथसर्वलोकैकनायक ॥ आचमनीयं ॥
यत्पुरुषेण० ॥ ब्रह्मांडोदरमध्यस्थैस्तीर्थैश्वरघुनंदन ॥ स्नापयिष्याम्यहंभक्त्यात्वंगृहाणजनार्दन ॥ स्नानं ॥ मधुवाता० ॥ नमः
श्रीवासुदेवायतत्त्वज्ञानस्वरूपिणे॥ मधुपर्कंगृहाणेमंजानकीपतयेनमः ॥ मधुपर्कं ॥ आप्यायस्वेत्यादिपंचमंत्रैःपंचामृतं ॥ पंचामृ
तंमयानीतंपयोदधिघृतंमधु ॥ शर्करासहितंचैवरामत्वंप्रतिगृह्यतां ॥ शुद्धोदकस्नानं॥ चंदनं पुष्पं धूपं दीपं नैवेद्यं समर्प्य सं
प्रार्थ्यनिर्माल्यंविसृज्य ॥ पुरुषसूक्तेनविष्णुसूक्तैश्चाभिषिंचेत् ॥ आचमनीयं ॥ तंयज्ञंबर्हिं० ॥ तप्तकांचनसंकाशंपीतांबरमिदंह
रे ॥ संगृहाणजगन्नाथरामचंद्रनमोस्तुते॥ वस्त्रोपवस्त्रे० ॥ तस्माद्यज्ञा० ॥ श्रीरामाच्युतयज्ञेशश्रीधरानंतराघव ॥ ब्रह्मसूत्रंसोत्त
रीयंगृहाणरघुनंदन ॥ यज्ञोपवीतं० ॥ तस्माद्यज्ञात्सर्वहुतऋचः० ॥ कुंकुमागरुकस्तूरीकर्पूरंचंदनंतथा ॥ तुभ्यंदास्यामिराजेंद्र
श्रीरामस्वीकुरुप्रभो॥ गंधं० ॥ अक्षताःपरमादिव्याःकुं० ॥ अलंकारार्थेअक्षतान्॥ तस्मादश्वा० ॥ तुलसीकुंदमंदारजातीपु
न्नागचंपकैः॥ कदंबकरवीरैश्चकुसुमैःशतपत्रकैः॥ नीलांबुजैर्बिल्वपत्रैश्चंपकैराघवंविभुं ॥ पूजयिष्याम्यहंभक्त्यासंगृहाणजनार्द
न॥पुष्पपत्राणि० ॥ तुलसीकुंदमंदारपारिजातांबुजैर्युतां ॥ वनमालांप्रदास्यामिगृहाणजगदीश्वर ॥ वनमालांस०॥ अथांग
पूजा॥ श्रीरामचंद्रायनमः पादौपूजयामि ॥ राजीवलोचनाय० गुल्फौ० ॥ रावणांतकाय० जानुनी० ॥ वाचस्पतये० ऊरू० ॥
विश्वरूपाय० जंघे० ॥ लक्ष्मणाग्रजाय० कटिं० ॥ विश्वमूर्तये० मेढ्रं० ॥ विश्वामित्रप्रियाय० नाभिं० ॥ परमात्मने० हृदयं० ॥
श्रीकंठाय० कंठं० ॥ सर्वास्त्रधारिणे० बाहू० ॥ रघूद्वहाय० मुखं० ॥ पद्मनाभाय० जिह्वां० ॥ दामोदराय० दंतान्० ॥ सी

तापतये० ललाटं ॥ ज्ञानगम्याय० शिर० ॥ सर्वात्मने सर्वांगंपूजयामि ॥ अत्रशक्तौसहस्रतुलसीसमर्पणंकार्यं ॥ यत्पुरुषं०॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः ॥ रामचंद्रमहीपालधूपोयंप्रतिगृह्यतां ॥ धूपं ॥ ब्राह्मणोस्य० ॥ ज्योतिषांपतयेतुभ्यंनमोरामायवेधसे ॥ गृहाणदीपकंचैवत्रैलोक्यतिमिरापहं ॥ दीपं ॥ चंद्रमामनसो० ॥ इदंदिव्यान्नममृतंरसैःषड्भिःसमन्वितं ॥ लेह्यंपेयंच नैवेद्यंसीतेशप्रतिगृह्यतां ॥ नैवेद्यं ॥ मध्येपानीयं० उत्तरापोशनं० हस्तप्रक्षालनं० मुखप्रक्षालनं करोद्वर्तनार्थेचंदनं० ॥ नागवल्लीदलैर्युक्तंपूगीफलसमन्वितं ॥ तांबूलंगृह्यतांरामकर्पूरादिसमन्वितं ॥ तांबूलं ॥ इदंफलमितिफलं ॥ हिरण्यगर्भेतिदक्षिणा ॥ मंगलार्थंमहीपालनीराजनमिदंहरे ॥ संगृहाणजगन्नाथरामचंद्रनमोस्तुते ॥ नीराजनं० ॥ कर्पूरगौरमितिकर्पूरार्तिक्यं० ॥ नाभ्याआसी० ॥ नमोदेवाधिदेवायरघुनाथायशार्ङ्गिणे ॥ चिन्मयानंतरूपायसीतायाःपतयेनमः ॥ नमस्कारः॥ सप्तास्यासन्० यानिकानिच० प्रदक्षिणाः ॥ यज्ञेनयज्ञ० कोमलांगं० ॥ पुष्पांजलिं० ॥ नृत्यैर्गीतैश्चवाद्यैश्चपुराणपठनादिभिः ॥ पूजोपचारैरखिलैःसंतुष्टोभवराघव ॥ समस्तराजोपचारार्थेअक्षता० ॥ अशोककुसुमैर्युक्तंरामायार्घ्यंसमर्पयेत् ॥ दशाननवधार्थायधर्मसंस्थापनायच ॥ राक्षसानांवधार्थायदैत्यानांनिधनायच ॥ परित्राणायसाधूनांजातोरामःस्वयंहरिः॥ गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ ॥ श्रीरामचंद्रायसांगायसपरिवारायनमःइदमर्घ्यंसमर्पयामि ॥ यस्यस्मृत्या० आवाहनंनजा० मंत्रहीनं० ॥ अनेनयथाज्ञानेनकृतपूर्वोक्तराराधनेनभगवान्श्रीरामचंद्रःप्रीयतां ॥ इतिरामनवम्यांश्रीरामपूजासमाप्ता ॥ ॥ ७ ॥

॥ ११ ॥ दमनपूजा ॥ चैत्रशुक्लद्वादश्यांविष्णोर्दमनोत्सवः ॥ सचपारणाहे ॥ पारणाहेनलभ्येतद्वादशीघटिकापिचेत् ॥

तदात्रयोदशीग्राह्यापवित्रदमनार्पणे ॥ इत्युक्तेः ॥ शिवस्यतुचतुर्दश्यांकार्यः ॥ अथप्रयोगः ॥ उपवासदिनेनित्यपूजांकृत्वादम
नकस्थानंगत्वाक्रयेणतमादायचंदनादिनासंपूज्यश्रीकृष्णपूजार्थंत्वांनेष्येइतिप्रार्थ्यप्रणमेत् ॥ अन्यदेवतासुयथादैवतमूहः ॥
ततोदमनकंगृहमानीयपंचगव्येनशुद्धोदकेनचप्रक्षाल्यदेवाग्रेस्थापयित्वा तस्मिन्दमनकेअशोककालवसंतकामान्काममात्रंवा
गंधादिभिःपूजयेत् ॥ तत्र नमोस्तुपुष्पबाणायजगदाह्लादकारिणे ॥ मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायते ॥ इतिकामावाहनमंत्रः ॥
कायभस्मसमुद्भूतरतिबाष्पपरिप्लुत ॥ ऋषिगंधर्वदेवादिविमोहकनमोस्तुते ॥ इतिदमनकमुपस्थाय ॥ ॐ कामायनमइतिमंत्रेण
सपरिवारायकामरूपिणेदमनकायगंधाद्युपचारान्दद्यात् ॥ ततोरात्रौदेवंसंपूज्याधिवासनंकुर्यात् ॥ तदित्थं ॥ देवाग्रेसर्वतो
भद्रंसंपाद्यतत्रकलशंसंस्थाप्यतत्रधौतवस्त्राच्छन्नंदमनकंवैणवपटलेस्थापितंनिधाय ॥ पूजार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेःप्रभो ॥
दमनत्वमिहागच्छसान्निध्यंकुरुतेनमः ॥ इतिदमनकदेवतामावाह्यप्रागाद्यष्टदिक्षुक्लींकामदेवायनमोह्रींरत्यैनमः १ क्लींभस्मश
रीरायनमोह्रींरत्यैनमः २ क्लींअनंगायनमोह्रींरत्यै० ३ क्लींमन्मथायनमोह्रींरत्यै० ४ क्लींवसंतसखायनमोह्रींरत्यै० ५ क्लींस्मरा
यनमोह्रींरत्यै० ६ क्लींइक्षुचापायनमोह्रींरत्यै० ७ क्लींपुष्पबाणास्त्रायनमोह्रींरत्यै० ८ इतिपूजयेत् ॥ तत्पुरुषायविद्महेकामदे
वायधीमहि ॥ तन्नोऽनंगःप्रचोदयात् ॥ इतिगायत्र्यादमनकमष्टोत्तरशतमभिमंत्र्यगंधादिभिःसंपूज्य ॥ ह्रींनमइतिपुष्पांजलिं ॥ ९ ॥
दत्वा नमोस्तुपुष्पबाणायेतिपूर्वोक्तावाहनमंत्रेणनमेत् ॥ क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ प्रातस्त्वांपूजयिष्यामिसन्नि
धौभवतेनमइतिदेवंप्रार्थ्यपुष्पांजलिंदत्वातस्यामेकादश्यांरात्रौजागरणंकुर्यात् ॥ प्रातर्नित्यपूजांकृत्वापुनर्देवंसंपूज्यदूर्वागंधाक्षत

युतांदमनकमंजरीमादायमूलमंत्रंपठित्वा॥ देवदेवजगन्नाथवांछितार्थप्रदायक ॥ हृत्स्थान्पूरयमेविष्णोकामान्कामेश्वरीप्रिय ॥ इदंदमनकंदेवगृहाणमदनुग्रहात् ॥ इमांसांवत्सरींपूजांभगवन्परिपूरय ॥ पुनर्मूलंजप्त्वादेवेदमनमर्पयेत् ॥ ततोयथाशोभंद त्वांगदेवताभ्योदत्वादेवंप्रार्थयेत् ॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः ॥ इयंसांवत्सरीपूजातवास्तुगरुडध्वज ॥ वनमा लांयथादेवकौस्तुभंसंततंहृदि ॥ तद्वद्दामनकींमालांपूजांचहृदयेवह ॥ जानताजानतावापिनकृतंयत्तवार्चनं ॥ तत्सर्वंपूर्णतांया तुत्वत्प्रसादाद्रमापते ॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन ॥ हृषीकेशनमस्तेस्तुमहापुरुषपूर्वज ॥ मंत्रहीनंक्रियाहीनमित्यादि चसंप्रार्थ्यपंचोपचारैर्देवंसंपूज्यनीराज्यब्राह्मणेभ्योदमनंदत्वास्वयंशेषंसंधार्यसुहृद्युतःपारणांकुर्यात् ॥ मंत्रदीक्षारहितैर्नाम्नार्पणी यं ॥ अस्यगौणकालःश्रावणमासावधिः ॥ नेदंमलमासेभवति ॥ शुक्रास्तादौतुकर्तव्यं ॥ इतिदमनारोपणविधिः ॥ अस्यामेव भारते ॥ अहोरात्रेणद्वादश्यांचैत्रेविष्णुरितिस्मरन् ॥ पुंडरीकमवाप्नोतिदेवलोकंचगच्छतीति ॥ इतिदमनपूजा ॥ ॥ छ ॥

॥ १२ ॥ हनूमज्जयंतीपूजा ॥ आचमनादिदेशकालकीर्तनांतेऽस्माकमित्यादिआचरितहनूमज्जयंतीव्रतकल्पोक्तफलावा प्तयेश्रीरुद्रस्वरूपिहनूमत्प्रीत्यर्थंषोडशोपचारैःपूजमहंकरिष्ये ॥ आसनविधिंन्यासान्कलशाद्यर्चनंचविधायपीठदेवताआवाहये त् ॥ ॐ विमलायैनमः उत्कर्षिण्यै० ज्ञानायै० योगायै० प्रह्वायै० ईशान्यै० सरस्वत्यै० अनुग्रहायै० ॥ तद्बाह्ये पूर्वादिषुराम भक्ताय० महातेजसे० कपिराजाय० महाबलाय० द्रोणाद्रिहारकाय० मेरुपीठिकार्चनहारकाय० दक्षिणाशाभास्कराय० सर्वविघ्ननिवारकाय० ॥ तद्बाह्ये सुग्रीवाय० अंगदाय० नीलाय० जांबवते० नलाय० सुषेणाय० द्विविदाय० मैंदाय०

इत्यावाह्यपीठदेवताभ्योनमइतिसंपूज्यध्यायेत् ॥ बालार्कायुततेजसंत्रिभुवनप्रक्षोभकंसुंदरंसुग्रीवाद्यखिलप्लवंगनिकरैराराधितं सांजलिं ॥ नादेनैवसमस्तराक्षसगणान्संत्रासयंतंप्रभुंश्रीमद्रामपदांबुजस्मृतिरतंध्यायामिवातात्मजं ॥ इतिध्यात्वापुरुषसूक्तेन श्रीरुद्रस्वरूपिणेहनूमतेनमइतिषोडशोपचारैःपूजयेत् ॥ अस्यरुद्रांशत्वाद्रुद्राभिषेकःकार्यः ॥ गोष्पदीकृतवारीशं० ॥ मनोजवंमारुततुल्यवेगमित्यादिप्रार्थना ॥ इतिहनूमज्जयंतीपूजासंक्षेपः ॥ ॥ छ ॥ ॥ छ ॥

॥ १३ ॥ सोमवतीपूजा ॥ आचम्यदेशकालौसंकीर्त्यममेहजन्मनिजन्मांतरेचसकलपापक्षयार्थं पुत्रपौत्राद्यभिवृद्ध्यासंतति चिरजीवितपरमसौभाग्यप्राप्तिकामा अस्यांसोमवत्यमायांब्रह्मविष्णुशिवात्मकाश्वत्थवृक्षेयथामिलितोपचारैःलक्ष्मीनारायण पूजनमहंकरिष्ये ॥ तदादौनिर्विघ्नकामोगणपतिपूजनंकलशाद्यर्चनंचकरिष्येइ० सं० गणपतिंकलशंघंटांदीपंचसंपूज्य ॥ अपवित्रःपवित्रइतिकलशोदकेनपूजाद्रव्याणिप्रोक्ष्यात्मानंप्रोक्षेत् ॥ अश्वत्थमूलेउदकसिंचनंकृत्वादेवंध्यायेत् ॥ शांताकारं० सर्वलोकैकनाथं ॥ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे ॥ अग्रतःशिवरूपायअश्वत्थायनमोनमः ॥ अश्वत्थवृक्षेश्रीलक्ष्मीनारायणाभ्यांनमः ध्यानं ॥ विश्वव्यापकविश्वेशकृपयादीनवत्सल ॥ मयोपपादितांपूजांगृहाणेमांहिमाधव ॥ आवाहनं ॥ मूलानिब्रह्मणोयस्यऋग्वेदांगानिपल्लवाः ॥ फलानियज्ञशाखाश्चनारायणदयांकुरु ॥ सूर्यकोटिप्रभानाथसर्वव्यापिन्रमापते ॥ आसनं कल्पितंभक्त्यागृहाणपुरुषोत्तम ॥ आसनं ॥ नारायणजगद्व्यापिन्जगदानंदकारक ॥ विष्णुक्रांतादिसंयुक्तंगृह्णपाद्यंमयार्पितं ॥ पाद्यं ॥ फलगंधाक्षतैर्युक्तंपुष्पपूगसमन्वितं ॥ अर्घ्यंगृहाणभगवन्विष्णोसर्वफलप्रद ॥ अर्घ्यं ॥ कर्पूरैलालवंगादिशीतलं

सलिलंप्रभो ॥ रमारमणदेवेशाचमनंप्रतिगृह्यतां ॥ आचमनीयं ॥ पंचामृतंमयानीतंपयोदधिघृतंमधु ॥ शर्करादिसमायुक्तं स्नानार्थंप्रतिगृह्यतां ॥ पंचामृतस्नानं ॥ गंगाकृष्णागौतमीचकावेरीचशतह्रदा ॥ ताभ्यआनीतमुदकंस्नानार्थंप्रतिगृह्यतां ॥ स्नानं ॥ गंधादिपूर्वपूजांसमाप्य अभिषेकं कुर्यात् ॥ ततः ॥ पीतवासस्त्वयिविभोमयान्यत्समुदाहृतं ॥ वासःप्रीत्यागृहाणेदंपुरु षोत्तमकेशव ॥ वस्त्रं ॥ उपवीतंसोत्तरीयंमयादत्तंसुशोभनं ॥ विश्वमूर्तेगृहाणेदंनारायणजगत्पते ॥ उपवीतं ॥ अश्वत्थहुतभु ग्वासगोविंदस्यसदाश्रय ॥ अशेषंहरमेपापंवृक्षराजनमोस्तुते ॥ अलंकारान् ॥ सूत्रवेष्टनं ॥ मलयाचलसंभूतंघनसारंमनोहरं ॥ विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां ॥ गंधं ॥ अक्षताश्चसुरश्रेष्ठकुं० परमेश्वर ॥ अक्षतान् ॥ तुलसीजातिकमलमल्लिकाचंपका निच ॥ पुष्पाणिहरगोविंदगृहाणपरमेश्वर ॥ पुष्पाणि ॥ वनस्पतिरसो० धूपं ॥ आज्यंच० दीपं ॥ भक्ष्यंभोज्यंलेह्यपेयंचोष्यं खाद्यंमयाहृतं ॥ प्रीतयेपरमेशस्यदत्तंमेस्वीकुरुप्रभो ॥ नैवेद्यं ॥ प्राणापानव्यानोदानसमानाः ॥ मध्येपानीयं उत्तरापोश नं हस्तप्रक्षालनं मुखप्रक्षालनंच करोद्वर्तनार्थेचंदनं इदंफलमितिफलानि पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां ॥ त्व द्भासाभासतेलोकःकोटिसूर्यसमप्रभ ॥ नीराजयिष्येत्वांविष्णोकृपांकुरुममप्रभो ॥ नीराजनं ॥ चक्षुर्दंसर्वलोकानांतिमिरस्यनि वारणं ॥ आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वर ॥ कर्पूरगौरं० कर्पूरार्तिक्यदीपं ॥ मयाकायेनमनसावाचाजन्मशतार्जितं ॥ पापंप्रशमयश्रीशप्रदक्षिणपदेपदे ॥ प्रदक्षिणां ॥ व्यक्ताव्यक्तस्वरूपायसृष्टिस्थित्यंतकारिणे ॥ आदिमध्यांतहीनायविष्टरश्रवसे नमः ॥ नमस्कारं ॥ मूलतोब्रह्म० अश्वत्थायनमोनमः ॥ मंत्रपुष्पांजलिं ॥ अमासोमपूजा ॥ अमायैचनमस्तुभ्यंसोमायचन

मोस्तुते ॥ उभयोःसंगमेविष्णुपूजाफलमवाप्नुयात् ॥ अमायैसोमायचनमः सर्वोपचारार्थेगंधाक्षतपुष्पं० ॥ अनेनमंत्रेणषोड
शोपचारैःपंचोपचारैर्वापूजयेत् ॥ इत्यमासोमपूजा ॥ आवाहनं०तदस्तुमे ॥ यन्मयामनसावाचानियमात्पूजनंकृतं ॥ सर्वं
संपूर्णतांयातुतद्विष्णोश्वप्रसादतः ॥ इतिप्रार्थना ॥ अनेनकृतपूजनेनश्रीलक्ष्मीनारायणौप्रीयेतां ॥ अद्येत्यादिपुराणोक्तफलप्रा
प्त्यर्थंश्रीलक्ष्मीनारायणप्रीत्यर्थंअश्वत्थमूले अमुकद्रव्येणाष्टोत्तरशतप्रदक्षिणाख्यंकर्मकरिष्येइतिसंकल्प्य उक्तद्रव्यंप्रतिप्रदक्षि
णंवृक्षस्याग्रेस्थाप्यैवमष्टोत्तरशतप्रदक्षिणाःकार्याः ॥ तद्द्रव्यंब्राह्मणायदद्यात् ॥ इतिसोमवतीपूजा ॥ ॥ ७ ॥

॥ १४ ॥ समुद्रस्नानविधिः ॥ कृतनित्यक्रियःआचम्यप्राणानायम्यदेशकालौसंकीर्त्य ममसर्वपापक्षयद्वाराश्रीअपांपति
विष्णुप्रीतये अद्यामुकपर्वणिसर्वतीर्थसागरेस्नानमहंकरिष्ये ॥ पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरे ॥ पाषाणस्तेमयादत्तआहा
रार्थंप्रकल्प्यतां ॥ इतिसागरेपाषाणंवालुकापिंडंवाप्रक्षिप्यप्रार्थयेत् ॥ विश्वाचीचघृताचीचविश्वयोनेविशांपते ॥ सान्निध्यंकुरु
मेदेवसागरेलवणांभसि ॥ नमस्तेविश्वगुप्तायनमोविष्णोअपांपते ॥ नमोजलधिरूपायनदीनांपतयेनमः ॥ समस्तजगदाधारशं
खचक्रगदाधर ॥ देवदेहिममानुज्ञांतवतीर्थनिषेवणे ॥ त्रितत्वात्मकमीशानंनमोविष्णुमुमापतिं ॥ सान्निध्यंकुरुदेवेशसागरेल
वणांभसि ॥ अग्निश्चयोनिरनिलश्चदेहोरेतोधाविष्णुरमृतस्यनाभिः ॥ एतद्ब्रुवन्पांडवसत्यवाक्यंततोवगाहेतपतिंनदीनां ॥ इति
भारतोक्तमंत्रान्पठित्वासागरंसंपूज्यविधिवत्स्नात्वा ॥ सर्वरत्नोभवान्श्रीमान्सर्वरत्नाकरोयतः ॥ सर्वरत्नप्रधानस्त्वंगृहाणार्घ्यंम
होदधे ॥ इत्यर्घ्यंदत्वापिप्पलादादींस्तर्पयेत् ॥ यथोक्तंपृथ्वीचंद्रोदयेस्कांदे अद्येत्यादि० स्नानांगत्वेनपिप्पलादादितर्पणंकरिष्ये

इ० सं० सव्येनदेवतीर्थेनयवाक्षतैस्तर्पणंकुर्यात् ॥ पिप्पलादंतर्पयामि विकण्वं० कृतांतं० जीवकेश्वरं० वसिष्ठं० वामदेवं० पराशरं० उमापतिं० वाल्मीकिं० नारदं० वालखिल्यांस्त० नलं० नीलं० गवाक्षं० गवयं० गंधमादनं० जांबवंतं० हनूमंतं० सुग्रीवं० अंगदं० मैंदं० द्विविदं० ऋषभं० शरभं० रामं० लक्ष्मणं० सीतां० ॥ एतांस्तुतर्पयेद्विद्वान्जलमध्येविशेषतः ॥ आब्रह्मस्तंबपर्यंतंयत्किंचित्सचराचरं ॥ मयादत्तेनतोयेनतृप्तिमेवाभिगच्छतु ॥ इतिप्रार्थ्य ॥ अनेनसागरस्नानाख्येनकर्मणा परमेश्वरःप्रीयतां ॥ अयमेवविधिर्महोदयार्धोदयग्रहणाद्यन्यतमपर्वसुज्ञेयः ॥ इतिसमुद्रस्नानम् ॥ ॥ छ ॥

॥ १५ ॥ अक्षय्यतृतीयोदकुंभदानम् ॥ अस्यांश्राद्धमत्यावश्यकं तच्चपितृत्रयंमातामहादित्रयंचसपत्नीकमुद्दिश्यषट्दैवत्यमपिंडकंकुर्यात् ॥ तत्रोदकुंभदानंविहितं श्राद्धासंभवेतत्स्थानेवोदकुंभदानं ॥ आचम्यदेशकालौसंकीर्त्यपितृणामाब्दमक्षय्यतृप्त्यर्थंउदकुंभदानंकरिष्ये ॥ तदंगमुदकुंभपूजनंब्राह्मणपूजनंचकरिष्यइतिसंकल्प्यकृत्वा ॥ दानमंत्रौ ॥ एषधर्मघटोदत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः ॥ गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं ॥ पितृभ्यःसंप्रदास्यामिह्यक्षय्यमुपतिष्ठतु ॥ श्राद्धासंभवेतिलतर्पणमपिकार्यं ॥ पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः ॥ श्राद्धंकृतंतेनसमाःसहस्रंरहस्यमेतन्मुनयोवदंति ॥ इतिकौस्तुभेविष्णुपुराणवचनात् ॥ अस्यांमाधवोद्देशेनापिउदकुंभदानंकार्यं ॥ तत्रसंकल्पः ॥ आचम्यदेशकालकीर्तनांतेश्रीवसंतमाधवप्रीतयेऽक्षय्यतृतीयाप्रयुक्तंब्राह्मणायोदकुंभदानंकरिष्ये ॥ तदंगमुदकुंभपूजनंब्राह्मणपूजनंचसंकल्प्यकृत्वासूत्रवेष्टितगंधफलयवाद्युपेतमुदकुंभंपंचोपचारैःसंपूज्यब्राह्मणंसंपूज्य ॥ एषधर्मघटोद

त्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्सकलाममसंतुमनोरथाः ॥ इमंउदकुंभंदक्षिणातांबूलसहितंमाधवप्रीतयेऽमुकशर्मणे ब्राह्मणायतुभ्यमहंसंप्रददे ॥ तेनश्रीवसंतमाधवःप्रीयतां ॥ अत्रवसंतपूजामग्रिमप्रयोगानुसारेणकृत्वोशीरचंदनव्यजनवातादिभिर्विप्रान्संतोषयेत् ॥ इत्यक्षय्यतृतीया ॥ ॥ छ ॥ ॥ छ ॥

॥ १६ ॥ परशुरामजयंती ॥ अत्रप्रदोषेपरशुरामंविधिनासंपूज्यार्घ्यंदद्यात् ॥ तत्रमंत्रः ॥ जमदग्निसुतोवीरक्षत्रियांतकरप्रभो ॥ गृहाणार्घ्यंमयादत्तंकृपयापरमेश्वरेति ॥ पूजादितुसामान्यविष्णुपूजावत् ॥ इतिपरशुरामजयंती ॥ ॥ छ ॥

॥ १७ ॥ नृसिंहजयंती ॥ त्रयोदश्यांकृतैकभक्तःचतुर्दश्यांमध्याह्नेतिलामलकैःस्नात्वा ॥ उपोष्येहंनारसिंहभुक्तिमुक्तिफलप्रद ॥ शरणंत्वांप्रपन्नोस्मिभक्तिंमेनृहरेदिश ॥ इतिमंत्रेणव्रतंसंकल्प्यआचार्यंवृत्वासायंकालेधान्यस्थोदकुंभपूर्णपात्रेसौवर्णप्रतिमायांषोडशोपचारैःनृसिंहंदेवंसंपूज्यअर्घ्यंदद्यात् ॥ तत्रमंत्रः ॥ परित्राणायसाधूनांजातोविष्णुर्नृकेसरी ॥ गृहाणार्घ्यंमयादत्तंसलक्ष्मीनृहरिःस्वयं ॥ रात्रौजागरणंकृत्वा प्रातर्देवंसंपूज्यविसृज्यआचार्यायधेनुयुतांप्रतिमांदद्यात् ॥ मंत्रः ॥ नृसिंहाच्युतगोविंदलक्ष्मीकांतजगतपते ॥ अनेनार्चाप्रदानेनसफलाःस्युर्मनोरथाः ॥ अथप्रार्थना ॥ मद्वंशेयेनराजातायेजनिष्यंतिचापरे ॥
तांस्त्वमुद्धरदेवेशदुःसहाद्भवसागरात् ॥ पातकार्णवमग्नस्यव्याधिदुःखांबुवारिधेः ॥ नीचैश्चपरिभूतस्यमहादुःखगतस्यमे ॥ क ॥ १२ ॥
रावलंबनंदेहिशेषशायिन्जगत्पते ॥ श्रीनृसिंहरमाकांतभक्तानांभयनाशन ॥ क्षीरांबुधिनिवासत्वंचक्रपाणेजनार्दन ॥ व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभवेति ॥ ततोब्राह्मणैःसहतिथ्यंतेपारणंकुर्यात् ॥ यामत्रयोर्ध्वगामिन्यांचतुर्दश्यांतुपूर्वाह्णएवपारणं ॥ इति

॥ १८ ॥ वसंतपूजा ॥ ब्राह्मणानुपवेश्याचमनादिदेशकालोत्कीर्तनांतेऽस्माकमित्यादिश्रीवसंतमाधवप्रीत्यर्थंनानानामगोत्रान्ब्राह्मणान्पाद्यादिभिःपूजयिष्येइतिसंकल्प्यगणपतिंसंपूज्यस्मृत्वावा ॥ श्रीमहाविष्णुस्वरूपिणेब्राह्मणायनमः इदमासनं ॥ इदंपाद्यमित्युक्त्वापत्नीसिक्तजलेनस्वयंवाविप्रदक्षिणसव्यपादौप्रक्षालयेत् ॥ तत्रमंत्राः ॥ अस्मिन्राष्ट्रेश्रियमावेशयाम्यथोदेवीः प्रतिपश्याम्यापः ॥ दक्षिणंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि ॥ सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्धयामि ॥ पूर्वमन्यमपरमन्यंपादाववनेनिजे ॥ देवाराष्ट्रस्यगुप्त्याअभयस्यावरुध्यै ॥ आपःपादावनेजनीर्द्विषंतंनिर्दहंतुमे ॥ इति ॥ ततः इदमर्घ्यं इत्यर्घ्यंदत्वा गंधाःपांतु अक्षताःपांतु पुष्पंपातु तांबूलंपातु दक्षिणाःपांतु सकलाराधनैः स्वर्चितमस्तु ॥ इत्युपचारान्समर्प्यसुरभिचंदनपुष्पमालादिभिरलंकृत्य ॥ नमोस्त्वनंतायेतिप्रत्येकंप्रणमेत् ॥ ततोयथासंभवमुपहारदक्षिणादिदद्यादिति ॥ ॥ छ ॥

॥ १९ ॥ दशहराविधिः ॥ आचम्यदेशाद्युक्त्वा ममैतज्जन्मजन्मांतरसमुद्भूतत्रिविधकायिकचतुर्विधवाचिकत्रिविधमानसिकेतिस्कांदोक्तदशविधपापनिरासत्रयस्त्रिंशच्छतपित्रुद्धारब्रह्मलोकावाप्त्यादिफलप्राप्त्यर्थं ज्येष्ठसितदशम्यांदशहरापर्वण्यस्यांअमुकनद्यांस्नानंगंगापूजनंचकरिष्ये इतिसंकल्प्ययथाविधिस्नानंदशवारंकृत्वा गंगेचयमुने० कुरु ॥ इतिप्रकृतजलेगंगादितीर्थानिभावयित्वा ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ गंगाद्वारेकुशावर्तेबिल्वकेनीलपर्वते ॥ स्नात्वाकनखलेतीर्थेपुनर्जन्मनविद्यते ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥ त्राहिमांकृपयागंगेसर्वपापहराभव ॥ इतिप्रार्थ्यतूष्णींस्नात्वाअर्घ्यंदद्यात् ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेऽस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते॥

जलशायिनेइदमर्घ्यंसमर्पयामि ॥ एहिसूर्यसहस्रांशतेजोराशेजगत्पते ॥ अनुकंपयमांभक्त्यागृहाणार्घ्यंनमोस्तुते ॥ सूर्यायइ दमर्घ्यं० ॥ महाबलजटोद्भूतेकृष्णेउभयतोमुखि ॥ वेदेनप्रार्थितेगंगेगृहाणार्घ्यंनमोस्तुते ॥ कृष्णावेण्यैनमःइदमर्घ्यं० ॥ पुनः दशवारंस्नात्वावस्त्रोपवस्त्रेपरिधायगंगापूजांकुर्यात् ॥ ततः ॥ गंगातटेपूगफले–नमोभगवत्यैदशपापहरायैगंगायैनारायण्यैरेव त्यैशिवायैदक्षायैअमृतायैविश्वरूपिण्यैनंदिन्यैतेनमोनमः ॥ इत्यावाह्यषोडशोपचारैःपंचोपचारैर्वासंपूज्यदशविधपुष्पंधूपंदीपं नैवेद्यंचसमर्प्य ॥ तांबूलदक्षिणादिदत्वा ॥ नमोदेव्यैमहादेव्यैशिवायैसततंनमः ॥ नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मतां ॥ इतिमंत्रपुष्पं० ॥ आवाहनंन० ॥ अनेनकृतपूजनेनगंगाप्रीयतां ॥ एवंपूजांकृत्वागृहमागत्यशक्तश्चेद्दशब्राह्मणान्सुवासिनीश्चभो जयेत् ॥ प्रतिपद्दिनमारभ्यस्नानादिपूजांतोविधिःकार्यइतिकेचित् ॥ यांकांचित्सरितंप्राप्यदद्यादर्घ्यंतिलोदकं ॥ मुच्यतेदश भिःपापैःसमहापातकैरपीति इतिदशहराविधिः ॥ अत्रविशेषःगंगास्तोत्रसहितोब्रह्मकर्मसमुच्चयेस्तिततोग्राह्यः ॥ ॥ छ ॥

॥ २० ॥ वटसावित्रीपूजा ॥ स्नानादिनित्यनियमंनिर्वर्त्यवटवृक्षंगत्वा ॥ वटमूलेस्थितोब्रह्मावटमध्येजनार्दनः ॥ वटा ग्रेतुशिवोदेवःसावित्रीवटसंश्रिता ॥ वटसिंचामितेमूलंसलिलैरमृतोपमैः ॥ सूत्रेणवेष्टयेभक्त्यागंधपुष्पाक्षतैःशुभैः ॥ नमोवटा यसावित्र्यैभ्रामयेच्चप्रदक्षिणां ॥ सावित्रींचवटंसम्यगेभिर्मंत्रैःप्रपूजयेत् ॥ एवंविधिंबहिःकृत्वासम्यग्वैगृहमागता ॥ हरिद्राचंद नेनैवगृहमध्येलिखेद्वटं ॥ तत्रोपविश्यसंकल्प्यपूजाकार्याप्रयत्नतः ॥ नियममंत्रः ॥ त्रिरात्रंलंघयित्वातुचतुर्थेदिवसेत्वहं ॥ चंद्रा यार्घ्यंप्रदत्वाचपूजयित्वाकृतांसतीं ॥ मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान् ॥ भोक्ष्येहंतुजगद्धात्रिनिर्विघ्नंकुरुमेशुभे ॥

इतिनियममंत्रः ॥ अथपूजाविधिः ॥ तत्रकुड्यादिषुचंदनादिनावटवृक्षंब्रह्मसावित्र्यादींश्चचित्ररूपेणविलिख्यतत्राथवोद्यापना दिनासंस्कृतवटमूलेपूजांकुर्यात् यथा ॥ त्रयोदश्यांनित्यविधिंसंपाद्य देशकालौसंकीर्त्यममेहजन्मनिजन्मांतरेचाखंडितसौभा ग्यसिद्धिपूर्वकंपुत्रपौत्रभर्त्रायुरारोग्यैश्वर्यादिसुखप्राप्तयेश्रीब्रह्मसावित्र्यादिदेवताप्रीत्यर्थंयथामिलितोपचारैः पूजनमहंकरिष्ये॥ तदादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाद्यर्चनंचकरिष्येइतिसंकल्प्यगणपतिंसंपूज्यकलशादींश्चपूजयित्वाध्यायेत्॥ अथ ध्यानं ॥ पद्मपत्रासनस्थश्चब्रह्माकार्यश्चतुर्मुखः ॥ सावित्रीतस्यकर्तव्यावामोत्संगगतातथा ॥ आदित्यवर्णाधर्मज्ञासाक्षमालाक रातथा ॥ एवंध्यात्वा ॥ ब्रह्मणासहितांदेवींसावित्रींलोकमातरं ॥ सत्यव्रतंचसावित्रींयमंचावाहयाम्यहं ॥ चकारान्नारदंच ॥ ब्रह्मसावित्रीसत्यवत्सावित्रीयमनारदेभ्योनमः ॥ आवाहनं ॥ ब्रह्मणासहसावित्रिसत्यवत्सहितेप्रिये ॥ हेमासनंगृहाणेदंधर्मरा जसुरेश्वर ॥ आसनं ॥ गंगाजलंसमानीतंपाद्यार्थंब्रह्मणःप्रिये ॥ भक्त्यादत्तंधर्मराजसावित्रिप्रतिगृह्यतां ॥ पाद्यं ॥ भक्त्यास माहृतंतोयंफलपुष्पसमन्वितं ॥ अर्घ्यंगृहाणसावित्रिममसत्यवतःप्रिये ॥ अर्घ्यं ॥ सुगंधिसहकर्पूरंसुरभिस्वादुशीतलं ॥ ब्रह्म णासहसावित्रिकुरुष्वाचमनीयकं ॥ आचमनीयं ॥ पयोदधिघृतंचैवशर्करामधुसंयुतं ॥ पंचामृतेनस्नपनंप्रीयतांपरमेश्वरी ॥ पंचामृतस्नानं ॥ मंदाकिन्याःसमानीतंहेमांभोरुहवासितं ॥ सावित्रिब्रह्मराजेनस्नानार्थंप्रतिगृह्यतां ॥ स्नानं ॥ गंधादिपंचोप चारैःसंपूज्यसुरास्त्वेत्याद्यभिषेकंकुर्यात् ॥ सूक्ष्मतंतुमयंवस्त्रयुग्मंकार्पाससंभवं ॥ सावित्रीसत्यवद्भ्यांचभक्त्यादत्तंप्रगृह्यतां ॥ वस्त्रं ॥ सावित्रीसत्यवत्क्तातेधर्मराजःसुरेश्वरी ॥ सावित्रिब्रह्मणासार्धमुपवीतंप्रगृह्यतां ॥ उपवीतं ॥ भूषणानिचदिव्यानिमुक्ता

हारयुतानिच ॥ त्वदर्थमुपक्लृप्तानिगृहाणशुभलोचने ॥ भूषणानि ॥ कुंकुमागरुकर्पूरकस्तूरीरोचनायुतं ॥ चंदनंतेमयादत्तंसावि
त्रिप्रतिगृह्यतां ॥ चंदनं ॥ अक्षताश्चसुरश्रेष्ठेकुंकुमाक्ताःसुशोभनाः ॥ मयानिवेदिताभक्त्यागृहाणपरमेश्वरि ॥ अक्षतान् ॥ हरि
द्रांकुंकुमंचैवसिंदूरंकज्जलान्वितं ॥ सौभाग्यद्रव्यसंयुक्तंसावित्रिप्रतिगृह्यतां ॥ सौभाग्यद्रव्याणि॥माल्यादीनिसुगंधीनिमालत्या
दीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥पुष्पाणि॥ अथांगपूजा॥ सावित्र्यैनमःपादौपूजयामि ॥ वटप्रियायै०
जंघे० ॥ कमलपत्राक्ष्यै० कटिं॥ भूतधारिण्यै० ॥ उदरं० ॥ गायत्र्यै० कंठं ॥ ब्रह्मणःप्रियायै० मुखं॥ सौभाग्यदात्र्यै० शिरः० ॥
अथब्रह्मसत्यवत्पूजा॥ धात्रे० पादौ० ॥ विधात्रे० जंघे० ॥ स्रष्ट्रे० ऊरू० ॥प्रजापतये० ॥ मेढ्रं॥ परमेष्ठिने० कटिं० ॥ अग्निरू
पाय० ॥ नाभिं० ॥ पद्मनाभाय० हृदयं ॥ वेधसे० बाहू० ॥ विधये० कंठं॥ हिरण्यगर्भाय० मुखं ॥ ब्रह्मणे० शिरःपू० ॥ विष्णवे०
सर्वांगं० ॥ इत्यंगपूजा॥ देवद्रुमरसोद्भूतःकालागरुसमन्वितः ॥ आघ्राणार्थमयंधूपःसावित्रिप्रतिगृह्यतां ॥ धूपं॥ चक्षुर्दंसर्वलो
कानां॥ दीपं॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ मयानिवेदितंभक्त्यानैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ मध्येपानीयं उत्तरापो
शनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थेचंदनं मुखवासार्थेपूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां इदंफलमितिफलं॥
आर्तिक्यंकृत्वा॥ यानिकानिचेतिप्रदक्षिणां नमोस्त्वनंताय० नमस्कारं० नमोब्रह्मण्यदेवित्वंसततंब्रह्मणःप्रिये॥ पूजितासिद्विजैः ॥ १४ ॥
सर्वैःस्त्रीभिर्मुनिगणैःसदा ॥ त्रिसंध्यंदेविभूतानांवंदनीयासुशोभने॥ मयादत्ताचपूजेयंत्वंगृहाणनमोस्तुते॥ पुष्पांजलिं ॥ ततो
र्घ्याणिदद्यात्॥ ॐकारपूर्वकेदेविसर्वदुःखनिवारिणि॥ वेदमातर्नमस्तुभ्यंसौभाग्यंचप्रयच्छमे॥ इदमर्घ्यं० ॥ पतिव्रतेमहाभागे

ब्रह्माणिचशुचिस्मिते ॥ दृढव्रतेदृढमतेभर्तुश्चप्रियवादिनि ॥ अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते ॥ पुत्रान्पौत्रांश्चसौख्यंचगृहा
णार्घ्यंनमोस्तुते ॥ इदमर्घ्यं ॥ ब्रह्मसत्यवतोः ॥ त्वयादृष्टंजगत्सर्वंसदेवासुरमानुषं ॥ सत्यव्रतधरोदेवब्रह्मरूपनमोस्तुते ॥ इदमर्घ्यं
॥ यमाय ॥ त्वंकर्मसाक्षीलोकानांशुभाशुभविवेककृत् ॥ वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते ॥ इदमर्घ्यं ॥ नारदाय ॥ नारदाय
नमस्तुभ्यंसुरेशाद्यभिवंदित ॥ गृहाणार्घ्यंमयादत्तमवैधव्यंप्रयच्छमे ॥ इदमर्घ्यं ॥ सावित्रिब्रह्मसावित्रिसर्वदाप्रियभाषिणि ॥ तेन
सत्येनमांपाहिदुःखसंसारसागरात् ॥ त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभाचंद्रमंडले ॥ त्वमेवचजगन्मातात्वमुद्धरवरानने ॥ यन्मया
दुष्कृतंसर्वंकृतंजन्मशतैरपि ॥ भस्मीभवतुतत्सर्वमवैधव्यंचदेहिमे ॥ अवियोगोयथादेवसावित्र्यासहितस्यते ॥ अवियोगस्तथास्मा
कंभूयाज्जन्मनिजन्मनि ॥ इतिप्रार्थना ॥ सुवासिन्यस्तथापूज्यादिवसेदिवसेगते ॥ सिंदूरंकुंकुमंचैवतांबूलंचपवित्रकम् ॥ तथाद
द्याच्चशूर्पाणिभक्ष्यभोज्यादिकंसदा ॥ माहात्म्यंचैवसावित्र्याःश्रोतव्यंमुनिसत्तम ॥ पुराणश्रवणंकार्यंसतीनांचरितंशुभं ॥ अने
नकृतपूजनेनब्रह्मसावित्र्यादिदेवताःप्रीयंतां ॥ एतत्कर्मसांगतासिद्ध्यर्थंब्राह्मणायसौभाग्यवायनदानंब्राह्मणपूजनंचकरिष्येइति
संकल्प्यवायनंब्राह्मणंचसंपूज्य ॥ फलवस्त्रसमायुक्तंसौभाग्यद्रव्यसंयुतं ॥ वंशपात्रेनिधायादौब्राह्मणायनिवेदयेत् ॥ उपायन
मिदंदेविइतिवायनदानंसदक्षिणंदत्वादंपतीभोजनंसंकल्प्याशिषोग्राह्याः ॥ इतिवटसावित्रीपूजाविधिः ॥ ॥ छ ॥

॥ २१ ॥ विष्णुशयनोत्सवः ॥ तत्रसंध्यायांसोपस्करेमंचकेसुप्तांश्रीविष्णुप्रतिमांशंखचक्रगदापद्मयुतांलक्ष्मीसंवाहितच
रणांनानाविधोपचारैःपूजयेत् ॥ तद्यथा ॥ आचम्यदेशकालौसंकीर्त्य ममममहापातकाद्यशेषपातकनिवृत्तिपूर्वकंश्रीमहाविष्णुप्रसा

दसिद्धिद्वाराश्रीलक्ष्मीनायकपरमेश्वरप्रीत्यर्थंआषाढशुक्लैकादश्यांविष्णुशयनोत्सवंकरिष्येइतिसंकल्प्य (अनूराधाप्रथमपादा दिपारणदिनपर्यंतंयदापूजाकरणंतदातत्कालविशिष्टःसंकल्पेऊहःकर्तव्यः) तदंगंगणपतिपूजनंकलशाद्यर्चनंशरीरशुद्ध्यर्थंन्या सांश्चकरिष्येइतिसंकल्प्यकृत्वा अपवित्रःपवित्रोवा इतिपूजाद्रव्याणिप्रोक्ष्यात्मानंप्रोक्षयित्वादेवंजातीकुसुममालादिभिर्विवि धोपचारैःसंपूजयेत्॥शांताकारमित्यादिध्यात्वा घंटादिमंगलवाद्यघोषपुरःसरंस्वास्तृतेसोपधानेशुक्लवस्त्राच्छादितेरम्येपर्यंकेदे वंशाययित्वाप्रार्थयेत्॥ वासुदेवजगद्योनेप्राप्तेयंद्वादशीतव॥ भुजंगशयनेब्धौचसुखंस्वपिहिमाधव॥ १॥ इयंतुद्वादशीदेवशय नार्थंविनिर्मिता॥ अस्यांसुप्तेजगन्नाथेजगत्सुप्तंभवेदिदं॥ २॥ सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदं॥ विबुद्धेत्वयिबुध्येतसर्व मेतच्चराचरं॥ ३॥ इतिसंप्रार्थ्यपुष्पांजलिंदद्यात्॥ अनेनविष्णुशयनोत्सवाख्येनकर्मणाश्रीमहाविष्णुःप्रीयतां॥ ततश्चपुरा णश्रवणादिनारात्रौजागरणंकुर्यादिति॥ इदंचमलमासेनकार्यं॥ अस्तादौतुभवत्येव॥ इतिशयनोत्सवः॥ ॥ छ॥

॥ २२॥ चातुर्मास्यव्रतारंभः॥ तत्राषाढशुक्लैकादशीद्वादशीपौर्णमासीकर्कसंक्रमणदिनमितिकालचतुष्टयं॥ एषामन्य तमदिनेविष्णोर्महापूजांकृत्वाप्रार्थयेत्॥ श्वेतद्वीपेभोगितल्पेस्थितेत्वयिजनार्दन॥ चातुर्मास्यव्रतेनुज्ञांदेहिलक्ष्मीपतेमम॥ त तोदेशकालौसंकीर्त्यममसर्वपापक्षयपूर्वकंविष्णुप्रीतिद्वाराश्रीपरमेश्वरप्रीत्यर्थं आषाढशुक्लैकादशीमारभ्यकार्तिकशुक्लैकादशीप ॥ १५ ॥ र्यंतंप्रत्यहंताम्रपात्रदानमहंकरिष्ये॥ एवंरीत्या अमुकदानव्रतं अमुकवर्जनव्रतं अमुकभक्षणव्रतं अमुकदेवताप्रीतिकामोऽहमा चरिष्ये॥ ततःकृतांजलिपुटोदेवमीक्षमाणोमंत्रान्पठेत्॥ चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि॥ श्रावणेवर्जयेशाकं

दधिभाद्रपदेतथा ॥ दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंतथा ॥ एतानिनित्यव्रतानि ॥ व्रतांतरचिकीर्षायांश्रावणेवर्जयेशाकमि तिश्लोकस्थानेयथायथमूहःकार्यः ॥ हविष्यान्नभक्षणे ॥ हविष्यान्नंभक्षयिष्येदेवाहंप्रीतयेतव ॥ इति ॥ शाकव्रतेव्रतांतरेच समुच्च येनकर्तव्ये ॥ आदौश्रावणेवर्जयेशाकमितिश्लोकंपठित्वाव्रतांतरमंत्रंवदेत् ॥ एवंगुडवर्जनादिव्रतेषु चतुरोवार्षिकान्मासान्देव स्योत्थापनावधि ॥ वर्जयिष्येगुडंदेवमधुरस्वरसिद्धये ॥ एवंरीत्या ॥ चतुरोवार्षिकान्मासानितिपूर्वार्धंपठित्वाउत्तरार्धेतुकरिष्य माणव्रतनिर्देशःकार्यः ॥ वर्जयिष्येतैलमहंसुंदरांगत्वसिद्धये ॥ चतुरोवा० पनावधि ॥ मौनव्रतीभविष्यामिस्वाज्ञापालनसिद्ध ये ॥ चतुरो० ॥ एकांतरोपवासंचप्राप्तुंब्रह्मपदंपरं ॥ निषिद्धपदार्थमात्रवर्जनेच्छायां ॥ चतुरो० ॥ वृंताकादिनिषिद्धानिहरेसर्वाणि वर्जये ॥ तिथिपालनेप्रतिपदादिषुक्रमेणवर्ज्यानि ॥ [1]कूष्मांडंबृहतीफलानिलवणंवर्ज्यंतिलाम्लंतथातैलंचामलकंदिवंप्रवसतांशी र्षंकपालांत्रकं ॥ निष्पावाश्चमसूरिकाःफलमथोवृंताकसंज्ञंमधुद्यूतंस्त्रीगमनंक्रमात्प्रतिपदादिष्वेवमाषोडश ॥ इति ॥ अन्यानपि यथासंभवंनियमान्कृत्वासर्वाभावेयंकंचिदपिनियमंदेवपुरतःकृत्वादेवंप्रार्थयेत् ॥ चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि ॥ इमंकरिष्येनियमंनिर्विघ्नंकुरुमेच्युत ॥ इदंव्रतंमयादेवगृहीतंपुरतस्तव ॥ निर्विघ्नंसिद्धिमायातुप्रसादात्तवकेशव ॥ गृहीतेऽस्मि

१ प्रतिपदि कूष्मांडं, द्वितीयायां बृहतीफलं (डोरली), तृतीयायां लवणं, चतुर्थ्यां मूलकं, पंचम्यां पनसफलं, षष्ठ्यां तैलं, सप्तम्यां आमलकं, अष्टम्यां शीर्षं (नारिकेलं), नवम्यां कपालं (भोपळा), दशम्यां अंत्रं (पडवळ), एकादश्यां निष्पावाः (पावटे-वाल), द्वादश्यां मसूरिकाः, त्रयोदश्यां वृंताकं, चतुर्दश्यां मधु, पौर्णमास्यां द्यूतं, अमायां स्त्रीगमनं वर्ज्यं ।

न्व्रतेदेवपंचत्वंयदिमेभवेत् ॥ तदाभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दन ॥ व्रतानांबहुत्वे ॥ गृहीतेषुव्रतेष्वेषु ॥ तदाभवंतुपूर्णानि ॥ इतिपठेत् ॥ शाकव्रतधारणापारणानक्तद्विदलवर्जनादिसिंध्वादावालोचनीयं ॥ ॥ छ ॥ ॥ छ ॥

॥ २३ ॥ अथव्यासपूजा ॥ आचम्यदेशकालौसंकीर्त्यचातुर्मास्यावासंकर्तुंश्रीकृष्णव्यासभाष्यकाराणांसपरिवाराणांपूजनंकरिष्येइतिसंकल्प्य ॥ मध्येश्रीकृष्णं तत्पूर्वतःप्रादक्षिण्येनवासुदेवसंकर्षणप्रद्युम्नानिरुद्धानावाह्य श्रीकृष्णपंचकदक्षिणभागे व्यासं तत्पूर्वतःप्रादक्षिण्येन सुमंतुजैमिनिवैशंपायनपैलानितिव्यासपंचकमावाह्यश्रीकृष्णादिवामेभाष्यकारंश्रीशंकरंतत्पूर्वतः प्रादक्षिण्येन पद्मपादविश्वरूपत्रोटकहस्तामलकाचार्यानावाह्य ॥ श्रीकृष्णपंचकेश्रीकृष्णपार्श्वयोःब्रह्मरुद्रौ पूर्वादिचतुर्दिक्षु ॥ सनकसनंदनसनातनसनत्कुमारानावाह्य कृष्णपंचकात्पुरतःगुरुपरमगुरुपरमेष्ठीगुरुपरात्परगुरून् ॥ ब्रह्मवसिष्ठशक्तिपराशर व्यासशुकगौडपादगोविंदपादशंकराचार्यान्ब्रह्मनिष्ठांश्चावाह्य ॥ पंचकत्रयस्याग्नेयकोणे गणेशं ईशान्यां क्षेत्रपालं वायव्ये दुर्गां नैर्ऋत्ये सरस्वतीं प्रागाद्यष्टदिक्षुलोकपालांश्चावाह्य पूजयेत् ॥ तत्रनारायणाष्टाक्षरेणश्रीकृष्णपूजा ॥ अन्येषांप्रणवादिनमोंतैस्तत्तन्नाममंत्रैःपूजाकार्या ॥ पूजांते असतिप्रतिबंधे चतुरोवार्षिकान्मासानिहवसामीतिमनसासंकल्प्य ॥ अहंतावन्निवत्स्यामिसर्वभूतहितायवै ॥ प्रायेणप्रावृषिप्राणिसंकुलंवर्त्मदृश्यते ॥ अतस्तेषामहिंसार्थंपक्षान्वैश्रुतिसंश्रयान् ॥ स्थास्यामश्चतुरोमासानत्रैवासतिबाधके ॥ इतिवाचिकसंकल्पंकुर्यात् ॥ ततोगृहस्थाःप्रतिब्रूयुः ॥ निवसंतुसुखेनात्रगमिष्यामःकृतार्थतां ॥ यथाशक्तिचशुश्रूषांकरिष्यामोवयंमुदेति ॥ ततोवृद्धानुक्रमेणयतीन्गृहस्थायतयश्चअन्योन्यंनमस्कुर्युः ॥ एतद्विधिःपौर्णमास्यामसं

भवेद्धादश्यांकार्यः ॥ इयंसंन्यासिकर्तृकपूजा ॥ अथगृहस्थाद्यैरुपासकैरध्येतृभिश्चात्रस्वस्वगुरुपूजनंकार्यं ॥ तत्रोपासकैरधिका रानुसारेणाम्नायोक्तगुरुमंडलपूजाकार्यासाचविस्तरभयात्सर्वानुपयोगान्नात्रसंगृहीता ॥ सर्वेषामुपदेष्टृपूजाआवश्यकीसंक्षेपतो लिख्यते॥ देशकालसंकीर्तनांतेममगृहीतामुकदेवतामंत्रोपासनासाफल्यसिद्धिद्वाराश्रीसद्गुरुनाथदेवताप्रीत्यर्थंसद्गुरुपादुकापूज नंकरिष्येइतिसंकल्प्यआसनेगुरुंपश्चिमाभिमुखमुपवेश्यतत्पुरतःप्राङ्मुखःस्वगुरुंध्यायेत्॥ आनंदमानंदकरंप्रसन्नंज्ञानस्वरूपंनि जबोधरूपं॥ योगींद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि॥ इति॥अथवानमोगुरुभ्योगुरुपादुकाभ्यःइतिध्यात्वाब्राह्मणैः॥ योनोंअग्नेअररिवाँअघायोरराती॒वाम॒र्चय॑तिद्व॒येन॑॥ मंत्रोगु॒रुःपुन॑रस्तु॒सोऽअ॑स्मा॒अनु॑मृक्षीष्टत॒न्वं॑दु॒रु॒क्तैः ॥ इतिमंत्रेणषोडशोप चारैःपूजयेत् ॥ स्त्रीशूद्रादिभिस्तु गुरुर्ब्रह्मागुरुर्विष्णुरितिमंत्रेणयथाविभवंपूजयेत् ॥ इति ॥ ॥ छ ॥

॥ २४ ॥ कोकिलापूजादि ॥ आचमनादिदेशकालकीर्तनांतेममेहजन्मजन्मांतरस्थसर्वपापक्षयार्थंपुत्रपौत्रलक्ष्मीवृद्धिसौ भाग्यवृद्धिद्वाराअवैधव्यसपत्ननाशायकोकिलारूपगौरीप्रीत्यर्थंकोकिलाव्रतंकरिष्ये इतिसंकल्प्य ॥ आषाढपौर्णमास्यांतुसंध्या कालेह्युपस्थिते ॥ संकल्पयेन्मासमेकंश्रावणेप्रत्यहंह्यहं ॥ स्नानंकरिष्येनियमाद्ब्रह्मचर्यस्थितासती ॥ भोक्ष्यामिनक्तंभूशय्यांक रिष्येप्राणिनांदयाम् ॥ इत्युक्त्वा ॥ स्नानंकरोमिदेवेशिकोकिलेप्रीतयेतव ॥ जलेस्मिन्पावनेपुण्येसर्वदेवजलाशये ॥ इतिमंत्रेण अष्टौदिनानितिलामलककल्केन ततःसर्वौषधिजलेनाष्टौदिनानि ततोवचापिष्टेनाष्टौदिनानि ततःसर्वद्रव्यैःषड्दिनानि एवंमा सावधिस्नानेक्रमः ॥ एवंस्नात्वारविंध्यात्वातस्माअर्घ्यंचदापयेत् ॥ आदित्यभास्कररवेअर्कसूर्यदिवाकर ॥ प्रभाकरनमस्तुभ्य

गृहाणार्घ्यंनमोस्तुते ॥ इतिसूर्यायार्घ्यंदत्वा ॥ ततःस्वर्णपक्षांरौप्यपादांमौक्तिकनेत्रांप्रवालमुखींरत्नपृष्ठांचूतचंपकवृक्षस्थांपक्षि
रूपिणींकोकिलांलिखित्वापूजयेत्तद्यथा ॥ सायंकालेपूर्वोक्तविधिनास्नानपूर्वकंआचम्यदेशकालौसंकीर्त्य कोकिलाव्रतांगभूतंको
किलारूपिणीगौरीप्रीत्यर्थंयथामिलितोपचारैःपूजनमहंकरिष्ये ॥ तदादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाद्यर्चनंचकरि
ष्येतानिकृत्वा अपवित्रःपवित्रोवा०पूजाद्रव्याणिप्रोक्ष्यात्मानंप्रोक्षेत् ॥ अथध्यानं ॥ स्वर्णपक्षांरक्तनेत्रांप्रवालमुखपंकजां ॥ कस्तू
रीवर्णसंयुक्तामुत्पन्नांनंदनेवने ॥ चूतचंपकवृक्षस्थांपुष्टस्वरसमन्वितां ॥ चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीं ॥ श्रीकोकिला
रूपिण्यैगौर्यैनमः ध्यानं ॥ आगच्छकोकिलेदेविदेहिमेवांछितंफलं ॥ चंपकद्रुममारूढाक्रीडंतीनंदनेवने ॥ आवाहनं ॥ आसनं
क्षौमवस्त्रेणनिर्मितंह्यनघेतव ॥ गृहाणेदंमयादेविकोकिलेप्रियवर्धिनि ॥ आसनं ॥ तिलस्नेहेतिलमुखेतिलसौख्येतिलप्रिये ॥
सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः ॥ तिलपुष्पफलैर्युक्तंपाद्यंमेप्रतिगृह्यतां ॥ पाद्यं ॥ रत्नचंपकपुष्पैश्चपीतचंदनसंयुतं ॥
हेमपात्रेस्थितंतोयंगृहाणार्घ्यंमयार्पितं ॥ अर्घ्यं ॥ निर्मलंसलिलंगांगंकोकिलेपक्षिरूपिणि ॥ वासंतेनसुगंधेनगृहाणाचमनीयकं ॥
आचमनीयं ॥ पंचामृतेनस्नपनंकोकिलेकलकंठके ॥ मयादत्तेनप्रीतात्वंभवमेपरमेश्वरि ॥ पयोदधिघृतंचैवशर्करामधुसंयुतं ॥
पंचामृतेनस्नपनंदत्तंस्वीकुरुकोकिले ॥ पंचामृतस्नानं ॥ मंदाकिनीजलंपुण्यंसर्वतीर्थसमन्वितं ॥ स्नानार्थंतेमयादत्तंकोकिले ॥ १७ ॥
गृह्यतांनमः ॥ स्नानं ॥ पंचोपचारैःसंपूज्यमहाभिषेकंकुर्यात् ॥ यस्मात्कार्पाससूत्रेणवासांसिविविधानिच ॥ पीतवस्त्रप्रदानेन
प्रीताभवममांबिके ॥ वस्त्रं ॥ कंचुकंचमयादत्तंनानावर्णविचित्रितं ॥ कोकिलेगृह्यतांदेविप्रसीदपरमेश्वरि ॥ कंचुकं ॥ हरिद्रा

रंजितेदेविकंठसूत्रंसमर्पितं ॥ कोकिलेसुभगेदेविवरदाभवचांबिके ॥ कंठसूत्रं ॥ यानिरत्नानिसर्वाणिगंधर्वेषूरगेषुच ॥ तैर्युक्तं भूषणंहैमंकोकिलेप्रतिगृह्यतां ॥ भूषणानि ॥ श्रीखंडंचंदनं० गंधं० ॥ अक्षताश्च० अक्षतान् ॥ कुंकुमालक्तकंदिव्यंकामिनीभूष णास्पदं ॥ सौभाग्यदंगृहाणेदंप्रसीदहरवल्लभे ॥ हरिद्रांकुंकुमंचैवसिंदूरंकज्जलान्वितं ॥ सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि ॥ सौभाग्यद्रव्याणि ॥ करवीरैर्जातिकुसुमैः० पुष्पाणि ॥ वनस्पतिरसो० धूपं ॥ आज्यंचेतिदीपं ॥ शर्कराखंडखाद्यानिदधिक्षीरघृ तानिच ॥ आहारार्थंमयादत्तंनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ पाटलोशीरकर्पूरसुरभिस्वादुशीतलं ॥ तोयमेतत्सुखस्पर्शंकोकिले प्रतिगृह्यतां ॥ आचमनीयं ॥ चंदनागरुकर्पूरकस्तूरीकेसरान्वितं ॥ करोद्वर्तनकंदेविगृह्यतांहरवल्लभे ॥ करोद्वर्तनं ॥ कूष्मां डंनारिकेरंचपनसंकदलीफलं ॥ जंबीरंमातुलिंगंचफलंगृह्णनमोस्तुते ॥ फलानि ॥ पूगीफलमितितांबूलं ॥ हिरण्यगर्भेतिदक्षि णां ॥ कोकिलेकृष्णवर्णेत्वंसदावससिकानने ॥ भवानीहरकांतासिकोकिलायैनमोनमः ॥ नीराजनं ॥ पूजितापरयाभक्त्याको किलागिरिशप्रिया ॥ पुष्पैर्नानाविधैःश्रेष्ठैर्वरदास्तुसदामम ॥ पुष्पांजलिं ॥ यानिकानिचेतिप्रदक्षिणां ॥ नमोदेव्याइतिनम स्कारं ॥ कोकिलारूपधारिण्यैजगन्मात्रेनमोस्तुते ॥ शरणागतदीनानांत्राहिदेविसदांबिके ॥ गंधपुष्पाक्षतैर्युक्तंतोयंहेमफला न्वितं ॥ अर्घ्यंगृहाणदेवेशिवांछितार्थंप्रयच्छमे ॥ आषाढस्यसितेपक्षेमेषवर्णेहरिप्रिये ॥ कोकिलेत्वंजगन्मातर्गृहाणार्घ्यंनमो स्तुते ॥ पुनरर्घ्यंतिलस्नेहे० रूपंदेहिजयंदेहि० प्रार्थना ॥ व्रतांतेहैमींतिलपिष्टजांवाकोकिलांकृत्वाविप्रायदद्यात् ॥ देविचैत्रर थोत्पन्नेविंध्यपर्वतवासिनि ॥ अर्चितापूजितासित्वंकोकिलेहरवल्लभे ॥ कोकिलेकलकंठासिमाधवेमधुरस्वरे ॥ वसंतेदेविगच्छ

त्वंदेवानांनंदनेवने॥ इतिविसर्जनं ॥ अनेनकृतपूजनेनश्रीकोकिलास्वरूपिणीगौरीप्रीयतां ॥ इत्थंकरणाशक्तौअंत्यत्रिदिनंव्रतं कार्यं तिलपिष्टमूर्तेःप्रत्यहंविसर्जनं धातुमय्यावैकल्पिकं ॥ रम्यंवनंसमागत्यश्रुत्वाकोकिलकूजितं ॥ यदानश्रूयतेशब्दउपवासश्चतद्दिने ॥ इतिकोकिलापूजा ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २५ ॥ अथमलमासव्रतपूजादि ॥ प्रातःसंकल्पपूर्वकंविधिवत्स्नात्वालक्ष्मीयुतंपुरुषोत्तमंषोडशोपचारैःसंपूज्यअर्घ्यं निवेदयेत् ॥ देवदेवमहादेवप्रलयोत्पत्तिकारक॥ गृहाणार्घ्यंमयादत्तंकृपांकृत्वाममोपरि ॥ व्रतार्केतु–पुराणपुरुषेशानसर्वशोक निकृंतन ॥ अधिमासव्रतप्रीतोगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यंदत्वा॥ स्वयंभुवेनमस्तुभ्यंब्रह्मणेऽमिततेजसे॥ नमोस्तुतेश्रियानंतदयांकुरुममोपरि ॥ इतिप्रार्थयेत् ॥ अथापूपदानप्रयोगः॥ आचम्यदेशका० ममत्रयस्त्रिंशद्देवतांतर्यामिविष्णुरूपीसहस्रांशु प्रीतिद्वारानिखिलपापप्रशमपूर्वंपुत्रपौत्रयुतधनधान्यक्षेमसमृद्धिलोकद्वयसुखहेतुपृथ्वीदानफलप्राप्त्यापूपच्छिद्रसमसंख्यवर्षसह स्रावधिस्वर्लोकनिवासादिकल्पोक्तफलसिद्ध्यर्थं मलमासप्रयुक्तमपूपदानंकरिष्ये ॥ ब्राह्मणंसंपूज्य विष्णुरूपीसहस्रांशुःसर्वपाप प्रणाशनः॥ अपूपान्नप्रदानेनममपापंव्यपोहतु ॥ नारायणजगद्बीजभास्करप्रतिरूपक ॥ व्रतेनानेनपुत्रांश्चसंपदंचाभिवर्धय ॥ इमानपूपान्कांस्यपात्रस्थान् गुडहिरण्याज्यच्छत्रोपानत्सहितान् अमुकगोत्राय अमुकशर्मणेब्राह्मणायतुभ्य०॥ द्वादश्यादिदिन विशेषएवचिकीर्षायांमंत्रेषुविशेषः ॥ यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं ॥ शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु ॥ कलाकाष्ठा दिरूपेणनिमेषघटिकादिना ॥ योवंचयतिभूतानितस्मैकालात्मनेनमः ॥ कुरुक्षेत्रमयोदेशःकालःपर्वद्विजोहरिः ॥ पृथ्वीसममि

दंदानंगृहाणपुरुषोत्तम ॥ मलानांचविशुद्ध्यर्थंपापप्रशमनायच ॥ पुत्रपौत्राभिवृद्ध्यर्थंतवदास्यामिभास्कर ॥ अन्येमलमास नियमाविशेषतःस्नानदानादिचान्यव्रतग्रंथेभ्योवगंतव्यंविस्तरभियानात्रलिख्यते ॥ ॥ छ ॥ ॥ छ ॥

॥ २६ ॥ अथगोपद्मपूजा ॥ प्रारंभदिनेमासपक्षाद्युल्लिख्य ममेहजन्मनीत्यादिपंचवर्षावधिगोपद्मव्रतंकरिष्येतदंगंलक्ष्मी सहितबालकृष्णपूजांकरिष्येइतिसंकल्प्य गणेशंकलशंचसंपूज्यध्यायेत् ॥ चतुर्भुजंमहाकायंजांबूनदसमप्रभं ॥ शंखचक्रगदाप द्मरमागरुडशोभितं ॥ सेवितंमुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः ॥ एवंविधंहरिंध्यात्वाततोयजनमारभेत् ॥ ध्यानं ॥ आवाहयामिदे वेशंभक्तानामभयप्रदं ॥ स्निग्धकोमलकेशंचमनसावाहयेहरिं ॥ रमासहितश्रीबालकृष्णायनमः॥आवाहनं॥ सुवर्णमणिभिर्दिव्यै रचितेदेवनिर्मिते ॥ दिव्यसिंहासनेकृष्णउपविश्यप्रसीदमे ॥ आसनं ॥ पादोदकंसुरश्रेष्ठसुवर्णकलशेस्थितं ॥ गंधपुष्पाक्षतैर्यु क्तंपाद्यंमेप्रतिगृह्यतां ॥ पाद्यं ॥ अष्टद्रव्यसमायुक्तंस्वर्णपात्रोदकंशुभं ॥ भोऽभयंकरभक्तानांगृहाणार्घ्यंजगत्पते ॥ अर्घ्यं ॥ कर्पूरेणसमायुक्तमुशीरेणसुवासितं ॥ दत्तमाचमनीयार्थंनीरंस्वीक्रियतांविभो ॥ आचमनीयं ॥ गंगागोदावरीचैवयमुनाच

---

१ आषाढपौर्णमास्यांवातथाष्टम्यांहरेर्दिने । प्रारभेद्व्रतमेतच्चकार्तिकावधितत्तिथौ ॥ तिलामलकादिभिः स्नानंविधायनदीतीरेगोष्ठेशिवालयेवि ष्णुमंदिरेवृंदावनेवाहरिद्रादिनात्रयस्त्रिंशद्गोपद्मानिलिखित्वातत्रलक्ष्म्यासहबालकृष्णंध्यात्वागंधाद्युपचारैःप्रत्यहंपूजयेत् । अर्घ्याणिप्रदक्षिणाश्चत्रय स्त्रिंशत्संख्याकाःकार्याः । प्रथमवर्षेसमाप्तिदिनेनित्यवत्संपूज्यत्रयस्त्रिंशद्वटकानांवायनंदद्यात् । एवंद्वितीयवर्षे ३३ अपूपानां । तृतीयेशालिपिष्टान्न संभवस्य । चतुर्थेपूरिकादिभिः । पंचमेपरमान्नैः । एवंद्वितीयादिवर्षेभिन्नपदार्थैर्वायनंदेयम् ॥

सरस्वती ॥ नर्मदासिंधुकावेरीताभ्यःस्नानार्थमाहृतं॥स्नानं ॥ पंचामृतस्नानादिअभिषेकांतंकुर्यात्॥ वस्त्रयुग्मंसमानीतंपट्टसूत्रेण निर्मितं ॥ सुवर्णखचितंदिव्यंगृहाणत्वंसुरेश्वर ॥ वस्त्रं ॥ कार्पासतंतुभिर्युक्तंब्रह्मणानिर्मितंपुरा ॥ अनेकरत्नखचितमुपवीतंगृहाणभोः ॥ उपवीतं ॥ चंदनंमलयोद्भूतंकस्तूरीचारुचंदनं ॥ कर्पूरेणचसंयुक्तंस्वीकुरुष्वानुलेपनं ॥ चंदनं ॥ हरिद्रादिसौभाग्यद्रव्यंभूषणानि ॥ शतपत्रैश्चकल्हारैश्चंपकैर्मल्लिकाभिः ॥ तुलसीयुक्तपुष्पाणिगृहाणपुरुषोत्तम ॥ पुष्पाणि ॥ दशांगंगुग्गुलोद्भूतंसुगंधंचमनोहरं ॥ कृष्णागरुसमायुक्तंधूपंदेवगृहाणमे ॥ धूपं ॥ आज्यंचवर्ति० दीपं ॥ अन्नंचतुर्विधं० ॥ नैवेद्यं० ॥ मध्येपानीयं० ॥ उत्तरापोशनं० हस्तप्रक्षालनं० मुखप्रक्षालनं० करोद्वर्तनं० ॥ इदंफलमितिफलं ॥ पूगीफलमितितांबूलं ॥ हिरण्यगर्भेतिदक्षिणां ॥ यानिकानिचेतिप्रदक्षिणां ॥ नमोस्त्वनंतायेतिनमस्कारं ॥ चंद्रादित्यौचधरणिर्वि० आर्तिक्यदीपं० ॥ देवदेवजगन्नाथगोपालप्रतिपालक ॥ गोपदैःकृतसंत्राणगृहाणकुसुमांजलिं ॥ मंत्रपुष्पांजलिं०॥मंत्रहीनंक्रियाहीनं० प्रार्थनां ॥अनेनकृतपूजनेनश्रीगोपालकृष्णःप्रीयतां ॥ ब्राह्मणंसंपूज्य तद्वर्षोक्तवायनं ॥ वायनंतेद्विजश्रेष्ठददामिव्रतपूर्तये ॥ दक्षिणाभिश्चसंयुक्तंगोपालःप्रीयतामिति ॥ इदंयथाशक्तिसोपस्करंवायनदानंगोपद्मपूजासांगतासिद्ध्येतुभ्यमहंसंप्रददे ॥ इति ॥ ॥

॥२७॥ नागपंचमीपूजा ॥ चतुर्थ्यांकृतैकभक्तः पंचम्यांप्रातःकृतनित्यक्रियः हरिद्रामिश्रितचंदनेनभित्त्यांपीठेवानव
नागान्नागपत्नीश्चमृन्मयान्वागोमयेनद्वारस्योभयतोवायथाचारंलिखित्वापूजयेत् ॥ आचम्यदेशकालौसंकीर्त्य ममसकुटुंबस्य सपरिवारस्यसर्वदासर्वतःसर्पभयनिवृत्तिपूर्वकंसर्पप्रसादसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं श्रावणशुक्लपंचम्यांयथामिलितोपचारैः

नागपूजांकरिष्येइतिसंकल्प्यआसनादिन्यासांश्वविधायकलशादिसंपूज्यनागादीनावाहयेत् ॥ ॐअनंतायनमः अनंतंआवाहयामि ॥ एवंवासुकये० वासुकिं० शेषं० शंखं० पद्मं० कंबलं० कर्कोटकं० अश्वतरं० धृतराष्ट्रं० शंखपालं० तक्षकं० कालियं० कपिलं० (नागपत्नीभ्योनमः नागपत्नीः आवाहयामि) इत्यावाह्य अथवा ॥ आयंगौःपृश्निरक्रमीदसंदन्मातरंपुरः ॥ पितरंचप्रयन्स्वः ॥ नमोअस्तुसर्पेभ्यो० इत्यावाह्य ॐ अनंतादिनागेभ्योनमः नागपत्नीभ्योनमः इतिमंत्राभ्यांपुरुषसूक्तादिवैदिकमंत्रैश्च षोडशोपचारैःपूजयेत् ॥ नागपत्नीभ्योहरिद्राकुंकुमादीनलंकारांश्चसमर्प्य पुष्पसमर्पणोत्तरंसर्वेभ्योदध्यक्षतदूर्वांकुरान्समर्प्य नैवेद्यंक्षीरदधिघृतशर्करापायसलाजान्समर्पयेत् ॥ श्रावणेशुक्लपंचम्यांयत्कृतंनागपूजनं ॥ तेनतृप्यंतुमेनागाभवंतुसुखदाःसदा ॥ अज्ञानाज्ज्ञानतोवाऽपियन्मयापूजनंकृतं ॥ न्यूनातिरिक्तंतत्सर्वंभोनागाःक्षंतुमर्हथ ॥ युष्मत्प्रसादात्सफलाममसंतुमनोरथाः ॥ सर्वदामत्कुलेमास्तुभयंसर्पविषोद्भवं ॥ इतिप्रार्थयेत् ॥ ततः वल्मीकेपूजयेन्नागान्दुग्धंचैवतुपाययेत् ॥ घृतयुक्तंशर्कराढ्यंयथेष्टंपाययेद्बुधः ॥ लोहपात्रेपोलिकादिनकार्यंतद्दिनेनरैः ॥ तथाभूमेःकर्षणंचखननादिनकारयेत् ॥ भर्जितचणकयावनालव्रीहिलाजान्बालकैःसहभक्षयेत् तेनदृढदंताभवंति ॥ नागप्रीत्यर्थंयथाशक्तिपायसान्नेनब्राह्मणान्भोजयेत् ॥ ततः वल्मीकस्यसमीपेतुगायनंवाद्यमेवच ॥ स्त्रीभिःकार्यंभूषिताभिःकार्यश्चैवोत्सवोमहान् ॥ एवंकृतेकदाचिच्चसर्पतोनभयंभवेत् ॥ एवंप्रतिवर्षंकार्यं ॥ इतिनागपंचमीपूजा ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २८ ॥ सोमवारशिवपूजा ॥ देशकालौनिर्दिश्यअस्माकमित्यादिश्रीशिवलोकप्राप्तिकामः सोमवारव्रतांगत्वेनश्रीसो

मेश्वरपूजनंकरिष्ये ॥. तदंगत्वेनआसनविधिंन्यासान्कलशाद्यर्चनंचकरिष्ये ॥ गणपतिपू० तंडुलैरष्टदलंकृत्वा तत्र ॥ ध्याये
न्नित्यंमहेशं०॥ बंधूकसन्निभंदेवंत्रिनेत्रंचंद्रशेखरं ॥ त्रिशूलधारिणंदेवंचारुहासंसुनिर्मलं ॥ कपालधारिणंदेवंवरदाभयहस्तकं ॥
उमयासहितंशंभुंध्यायेसोमेश्वरंसदा ॥ ध्यानं॥ सहस्रशीर्षा० ॥ आयाहिभगवन्शंभोसर्वत्रगिरिजापते ॥ प्रसन्नोभवदेवेशनम
स्तुभ्यंहिशंकर ॥ त्रिपुरांतकरंदेवंचंद्रचूडंमहाद्युतिं ॥ गजचर्मपरीधानंसोममावाहयाम्यहं ॥ सोमेश्वरायनमःआवाहनं ॥ पुरु
षएवेदं० ॥ विश्वेश्वरमहादेवराजराजेश्वरप्रिय॥ आसनंदिव्यमीशानदास्येहंतुभ्यमीश्वर ॥ आसनं॥ एतावानस्य० ॥ महादेवम
हेशानमहादेवपरात्पर ॥ पाद्यंगृहाणमद्दत्तंपार्वतीसहितेश्वर ॥ पाद्यं ॥ त्रिपादूर्ध्व० ॥ त्र्यंबकेशसदाचारजगदादिविधायक ॥
अर्घ्यंगृहाणदेवेशसांबसर्वार्थदायक ॥ अर्घ्यं ॥ तस्माद्विराळ० ॥ त्रिपुरांतकदीनार्तिनाशश्रीकंठशाश्वत ॥ गृहाणाचमनीयंचप
वित्रोदककल्पितं ॥ आचमनीयं ॥ यत्पुरुषेण० गंगागोदावरीरेवापयोष्णीयमुनातथा ॥ सरस्वत्यादितीर्थानिस्नानार्थंप्रतिगृ
ह्यतां ॥ स्नानं ॥ क्षीरमाज्यंदधिमधुशर्कराचामृतंपयः ॥ प्रकल्पितंमयोमेशगृहाणेदंजगत्पते ॥ पंचामृतं ॥ पंचोपचारैःसंपूज्य
रुद्रमहिम्नादिभिः अभिषेकंकुर्यात् ॥ भवंदेवंतर्पयामि शर्वं० रुद्रं० पशुपतिं०उग्रं०महांतं० भीमं० ईशानं०८ तथा भवस्यदेवस्य
पत्नीमित्यादितर्पयित्वा॥ तंयज्ञंबर्हिषि० ॥ वस्त्राणिपट्टकूलानिविचित्राणिनवानिच ॥ मयानीतानिदेवेशप्रसन्नोभवशंकर ॥ ॥ २० ॥
वस्त्रं ॥ तस्माद्यज्ञात्सर्व० ॥ सौवर्णंराजतंताम्रंकार्पासस्यतथैवच ॥ उपवीतंमयादत्तंप्रीत्यर्थंप्रतिगृह्यतां ॥ उपवीतं॥ तस्माद्यज्ञा
त्सर्वहुतऋचः० ॥ सर्वेश्वरजगद्वंद्यदिव्यासनसमास्थित ॥ सौरभाढ्यंचदेवेशचंदनंप्रतिगृह्यतां ॥ गंधं॥ गंधोपरिशुक्लाक्षतान् ॥

अक्षताश्चसुरश्रेष्ठशुभ्राधूताश्चनिर्मलाः ॥ मयानिवेदिताभक्त्यागृहाणपरमेश्वर ॥ अक्षतान् ॥ तस्मादश्वा० ॥माल्यादीनि० पुष्पाणि ॥ शर्वायनमः भवनाशनाय महादेवाय उग्राय उग्रनाभाय भवाय शशिमौलिने रुद्राय नीलकंठाय शिवाय भवहारिणे इत्येकादशनामभिःपुष्पाणिसमर्प्यशक्तौसहस्रमष्टोत्तरशतंवाबिल्वदलार्पणं॥त्रिशाखैर्बिल्वपत्रैश्चअच्छिद्रैःकोमलैःशुभैः॥ तवपूजांकरिष्यामिअर्पयामिसदाशिव ॥ यत्पुरुषं० ॥ वनस्पतीति धूपं ॥ ब्राह्मणोस्य० ॥ आज्यंचेति दीपं ॥ चंद्रमामनसो० ॥ अपूपानिचपक्वानिमंडकान्वटकादिच ॥ पायसंसूपमन्नंचनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ मध्येपानीयं उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनं ॥ कूष्माडंमातुलिंगंचनारिकेलफलानिच ॥ गृहाणपार्वतीकांतसोमेशप्रतिगृह्यतां ॥ फलानि ॥ पूगीफलमितितांबूलं॥ हिरण्यगर्भेतिदक्षिणां ॥ अग्निर्ज्योतीरविर्ज्योतिर्ज्योतिर्नारायणोविभुः ॥ नीराजयामिदेवेशंपंचदीपैःसुरेश्वरं ॥ नीराजनं ॥ नाभ्याआसी० ॥ हेतवेजगतामेवसंसारार्णवसेतवे ॥ प्रभवेसर्वविद्यानांशंभवेगुरवेनमः ॥ नमस्कारं ॥ सप्तास्यासन्० ॥ यानिकानिचेति प्रदक्षिणाः ॥ यज्ञेनयज्ञमयजंत० ॥ हरविश्वाखिलाधारनिराधारनिराश्रय ॥ पुष्पांजलिंगृहाणेशसोमेश्वरनमोस्तुते ॥ पुष्पांजलिं ॥ बिल्वपत्रंसुवर्णेनत्रिशूलाकारमेवच ॥ मयार्पितमिदंशंभोबिल्वपत्रंगृहाणभो ॥ बिल्वपत्रार्पणं ॥ आवाहनंनजा० ॥ नक्तंचसोमवारेणसोमनाथजगत्पते ॥ अनंतकोटिसौभाग्यमनंतंकुरुशंकर ॥ इदमर्घ्यं ॥ सोमवारव्रतंभक्त्याकृतंकल्याणहेतवे ॥ प्रसीदपार्वतीनाथसायुज्यंदेहिमेप्रभो ॥ इदमर्घ्यं ॥ आकाशादिशरीराणिग्रहनक्षत्रमालिने ॥ सर्वसिद्धि

निवासार्थंदत्तमर्घ्यंसदाशिव ॥ इदमर्घ्यं ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्तेरधिष्ठानमतःपाहिसनातन ॥ वृषभायेदमर्घ्यं॰ ॥ अनेनयथाशक्तिषोडशोपचारैःपूजनेनभगवान्श्रीभवानीशंकरःप्रीयताम् ॥ ॥ छ ॥

॥ २९ ॥ अथशिवमुष्टिव्रतं ॥ तच्चविवाहानंतरंपंचवर्षपर्यंतंश्रावणांतर्गतसोमवारेषुस्त्रीभिःकार्यं ॥ तत्रस्नानादिविधाय शिवालयंगत्वादेशकालौसंकीर्त्यममश्रीशिवप्रीतिद्वारासर्वोपद्रवनिरासपूर्वंभर्तृस्नेहाभिवृद्धिस्थिरसौभाग्यपुत्रपौत्रधनधान्यसमृद्धिक्षेमायुःसुखसंपदादिमनोरथसिद्ध्यर्थंशिवमुष्टिव्रतंक॰ तदंगंशिवपूजनं॰ गणेशार्चादिकृत्वाशिवंपूजयेत् ॥ तत्रमंत्रपुष्पांते सार्धमुष्टिमितानितंडुलगोधूमतिलमुद्गधान्यानि रौप्यतंडुलसौवर्णगोधूमतिलमुद्गयुतानि नारिकेलमातुलुंगरंभाकर्कटीफलसहितानिक्रमेणचतुर्षुसोमवारेषुदद्यात् पंचमेत्वनंतरस्यैवावृत्तिः ॥ मंत्रस्तु ॥ नमःशिवायशांतायपंचवक्त्रायशूलिने ॥ शृंगिभृंगिमहाकालगणयुक्तायशंभवे ॥ ब्राह्मणंसंपूज्यइदंयथाशक्तिसोपस्करंवायनदानंशिवमुष्टिव्रतसांगतासिद्धयेसंप्रददे ॥ इति ॥

॥ ३० ॥ मंगलागौरीपूजा ॥ आचमनादिदेशकालकीर्तनांते ममेहजन्मनिजन्मांतरेचसकलसौभाग्यपुत्रपौत्रधनधान्यभर्तुरारोग्यादिसकलकामनासिद्धिद्वाराश्रीशिवमंगलागौरीप्रीत्यर्थं(पंचवाष्टवर्षात्मकंमंगलागौरीव्रतंकरिष्ये)पंचवर्षात्मकमंगलागौरीव्रतांगत्वेनविहितं यथामिलितषोडशोपचारैःपूजनंकरिष्ये ॥ तदादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाद्यर्चनंचकरिष्यइतिसंकल्प्यकृत्वादीपंसंपूज्यदेवींध्यायेत् ॥कुंकुमागरुलिप्तांगांसर्वाभरणभूषितां ॥ नीलकंठप्रियांगौरींध्यायेहंमंगलाह्वयां ॥ श्रीशिवमंगलागौर्यैनमःध्यायामि ॥ अत्रागच्छमहादेविसर्वलोकसुखप्रदे ॥ यावद्व्रतमहंकुर्वेपुत्रपौत्रादिवृद्धये ॥ आवाहनं ॥ ॥ २१ ॥

रौप्येणचासनंदिव्यंरत्नमाणिक्यशोभितं ॥ मयानीतंगृहाणत्वंगौरिकामारिवल्लभे ॥ आसनं ॥ गंधपुष्पाक्षतैर्युक्तंपाद्यंसंपादितं
मया ॥ गृहाणमंगलागौरिसर्वान्कामांश्चपूरय ॥ पाद्यं ॥ गंधपुष्पाक्षतैर्युक्तमर्घ्यंसंपादितंमया ॥ गृहाणपुत्रपौत्रादीन्प्रसन्नादे
हिसर्वदा ॥ अर्घ्यं ॥ कामारिवल्लभेदेविकुर्वाचमनमंबिके ॥ निरंतरमहंवंदेचरणौतवपार्वति ॥ आचमनीयं ॥ पयोदधिघृतंचैव
मधुशर्करयासमं ॥ पंचामृतेनस्नपनात्प्रीयतांपरमेश्वरी ॥ पंचामृतं ॥ जाह्नवीतोयमानीतंशुभंकर्पूरसंयुतं ॥ स्नापयामिसुरश्रे
ष्ठेत्वांपुत्रादिफलप्रदां ॥ स्नानं ॥ पंचोपचारैःपूर्वपूजांसमाप्याभिषेकंकुर्यात् ॥ आचमनीयं ॥ ततः ॥ वस्त्रंचसोमदैवत्यंलज्जा
यास्तुनिवारणं ॥ मयानिवेदितंभक्त्यागृहाणपरमेश्वरि ॥ वस्त्रं ॥ कंचुकीमुपवस्त्रंचनानारत्नैःसमन्वितं ॥ गृहाणत्वंमयादत्तं
पार्वतीजगदीश्वरि ॥ कंचुकीं ॥ कुंकुमागरुकर्पूरकस्तूरीचंदनंतथा ॥ विलेपनंमहादेविगंधंदास्यामिभक्तितः ॥ गंधं ॥ रंजि
ताःकुंकुमाद्येनअक्षताश्चातिशोभनाः ॥ ममैषांदेविदानेनप्रसन्नाभवपार्वति ॥ अक्षतान् ॥ हरिद्राकुंकुमंचैवसिं० सौभाग्यद्र
व्याणि ॥ वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममंडितं ॥ पुष्परागसमायुक्तंभूषणंप्रतिगृह्यतां ॥ सौवर्णानिपिष्टमयानिचभूषणानि ॥
माल्यादीनि० ॥ सेवंतिकाबकुलचंप० ॥ पुष्पाणि ॥ अपामार्गस्यपत्रैश्चदूर्वाधत्तूरसंज्ञकैः ॥ दूर्वांकुरैःषोडशभिर्बिल्वपत्राणिपंच
च ॥ इतिमंत्रेणअपामार्गादिपत्राणिसमर्प्य ॥ अथांगपूजा ॥ उमायैनमः पादौपूजयामि ॥ गौर्यै० जंघे० ॥ पार्वत्यै० जानु
नी० ॥ जगद्धात्र्यै० ऊरू० ॥ जगत्प्रतिष्ठायै० कटिं० ॥ शांतिरूपिण्यै० नाभिं० ॥ देव्यै० उदरं० ॥ लोकवंद्यायै० स्तनौ० ॥
काल्यै० कंठं० ॥ शिवायै० मुखं० ॥ भवान्यै० नेत्रे० ॥ रुद्राण्यै० कर्णौ० ॥ महादेव्यै० ललाटं० ॥ मंगलदात्र्यै०

शिरः० ॥ पुत्रदायिन्यै० सर्वांगं पूजयामि ॥ अथपत्रपूजा॥ उमायैनमः बिल्वपत्रंस० ॥ गौर्यै० अपामार्ग० ॥ पार्वत्यै० माल
ती० ॥ दुर्गायै० दूर्वा०॥ काल्यै० चंपक०॥भवान्यै० करवीर०॥रुद्राण्यै० बदरी० ॥ शर्वाण्यै० अर्क०॥चंडिकायै० तुलसी०॥
ईश्वर्यै० मुनि०॥ शिवायै० दाडिमी० ॥ अपर्णायै० धत्तूर०॥ धात्र्यै० जाती० ॥मृडान्यै० मरुबक० ॥ गिरिजायै०बकुल० ॥
अंबिकायै० अशोकपत्रं०॥ अत्र मुष्टानानाविधधान्यानि शिवायैनमइतिसमर्पयंति॥ देवद्रुमरसोद्भूतःकृष्णागरुसमन्वितः ॥
आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां ॥धूपं॥त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्तमं ॥ आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां ॥
दीपं ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां॥ नैवेद्यं ॥ मध्येपानीयं उत्तरापोशनं हस्त
प्रक्षालनं मुखप्रक्षालनं करोद्वर्तनं ॥ इदंफलमितिफलं ॥पूगीफलमितितांबूलं ॥ हिरण्यगर्भेतिदक्षिणां ॥ चक्षुर्दमितिनीराजनं ॥
नमोदेव्यै० पुष्पांजलिं ॥ यानिकानिचेतिप्रदक्षिणा नमस्कारः ॥ पुत्रान्देहिधनंदेहिसौभाग्यंदेहिमंगले ॥ अन्यांश्चसर्वकामांस्त्वं
देहिदेविनमोस्तुते ॥ इतिप्रार्थना ॥ ततोवैणवपात्रेतुसौभाग्यद्रव्यमाक्षिपेत् ॥ अन्नंकूर्पाससंयुक्तंसवस्त्रंफलसंयुतं ॥ वाय
नंगौरिविप्रायददामिप्रीतयेतव ॥ सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये ॥ गौरीगिरीशतुष्ट्यर्थंवायनंतेददाम्यहं ॥ इतिमंत्रा
भ्यांवायनंदद्यात् ॥ ततः ॥ ताम्रेवावैणवेपात्रेसौभाग्यद्रव्यमाक्षिपेत् ॥ लड्डुकंचुकिसंयुक्तंसवस्त्रफलदक्षिणं ॥ मात्रेसुवासि ॥ २२ ॥
नीभ्यश्चदेयंवायनमुत्तमं ॥ जननींमातृसंबंधिस्त्रियःषोडशभोजयेत् ॥ नीराजनंततःकुर्याद्दीपैःषोडशसंख्यकैः ॥ भोक्तव्यादी
पकाश्चाथस्त्रीभिःसहस्वयंततः॥ अन्नंलवणवर्जंतुमौनेनभोजयेत्स्वयं ॥ सुवासिनीश्चापितथावस्त्रालंकारभूषणैः॥ पूजयेच्चततः

पश्चात्कुर्याद्गौरीविसर्जनं ॥ विप्रायप्रतिमादेयारत्नवस्त्राणिभूरिशः ॥ एवंकृतेविधानेस्मिन्नार्यवैधव्यमाप्नुयात् ॥ अनेन०
इतिमंगलागौरीव्रतपूजाविधिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥३१॥ बुधबृहस्पतिपूजा ॥ प्रथमबुधबृहस्पतिवासरयोः प्रातर्नित्यकर्मनिर्वर्त्यभित्त्यांबुधबृहस्पतीलिखित्वास्त्रियापुरुषेणवापूजनात्मकंव्रतंकार्यं ॥ देशकालकीर्तनांते ममसकलकामनासिद्धिद्वाराश्रीबुधबृहस्पतिप्रीत्यर्थंश्रावणमासीयसौम्यगुरुवारनिमित्तंबुधबृहस्पतिपूजनंकरिष्ये ॥ बुधबृहस्पती प्रियंगुकलिकाश्यामं० देवानांचऋषीणांच० इत्यावाह्यबुधबृहस्पतिभ्यांनमःइत्युच्चार्यपूजांकुर्यात् ॥ दधिभक्तंनैवेद्यं मुखरोचनार्थंमूलकंचदद्यात् ॥ एवंश्रावणगतबुधगुरुवारेषुसप्तवर्षपर्यंतंकृत्वोद्यापनंकुर्यात् दीर्घायुःपुत्रद्रव्यवृद्धिपाकवृद्धिबुधबृहस्पतिकृपादांपत्यप्रीतिधान्यवृद्धीनांमध्येयस्याःस्त्रियः पुरुषस्यवायायाकामनास्तितेन स्वीयधनागारपाकागारदेवागारशय्यागारधान्यागारेषुक्रमेणबुधबृहस्पतीलिखित्वापूजाकार्या ॥ ॥ छ ॥

॥३२॥ अथभृगुवारव्रतपूजा ॥ प्रथमभृगुवासरेप्रातर्नित्यकर्मनिर्वर्त्यभित्त्यांहरिद्रामिश्रितचंदनेनबहुबालसहितांजीवंतिकामूर्तिंविलिख्यपूजयेत् ॥ देशकालौनिर्दिश्यममसायुष्मत्पुत्रपौत्राभिवृद्धिसकलमनोरथावाप्तिद्वाराश्रीजराजीवंतिकादेवताप्रीत्यर्थंश्रावणमासीयभृगुवासरनिमित्तंपूजनंकरिष्ये इतिसंकल्प्यकलशादिसंपूज्य ॥ बालसहितजीवंतिकादेवतायैनमःश्रीजराजीवंतिकाभ्यांसबालकाभ्यांनमःइतिवापूजयेत् ॥ ततःपुष्पार्पणकालेपुष्पमालांदेवतायागलेबध्वापूजांसमाप्य ततःगोधूमपिष्टसंभूतान्पंचदीपान्कृत्वाप्रज्वाल्यनीराजनंकार्यं ॥ यत्रमेबालकोभवेज्जीवंतिकेतत्रत्वयारक्षणीयः ॥ इतिप्रार्थ्यसन्निहितस्वबाल

केष्वक्षतान्निक्षिपेत् ॥ भोजनसमयेतान्दीपान्भक्षयेत् ॥ एवंभृगुवारेषुप्रतिवर्षंश्रावणेकार्यं ॥ ययाजीवंतिकाव्रतंकृतंतयाया वज्जीवंहरिद्वर्णवस्त्रकंचुकीकंकणादिधारणंहरिद्वर्णमंडपाधःप्रवेशनंतंडुलोदकोल्लंघनंकारवल्लीशाकभक्षणंचनकार्यं ॥ ॥ छ ॥

॥ ३३ ॥ अथशनिवारपूजादि ॥ श्रावणशनिवारेप्रातर्ब्राह्मणान्सुवासिनीश्चतिलतैलेनाभ्यज्यउष्णोदकेनस्नानंकारयित्वा सकुटुंबःस्वयंतैलेनाभ्यज्योष्णोदकेनस्नायात् ॥ ततस्तद्दिनेउपवासंकृत्वाहरिद्राचंदनेनभित्त्यांस्तंभेवालक्ष्म्यासहितंनृसिंहंलि खित्वासायंकालेयथाचारंप्रातःकालेवापूजयेत् ॥ आचम्यदेशकालौसंकीर्त्यममधनधान्यसमृद्धिपुत्रपौत्रसुखाभिवृद्धिपूर्वकवैकुं ठप्राप्तिद्वाराश्रीलक्ष्मीनृसिंहप्रीत्यर्थंश्रावणमासीयशनिवारनिमित्तंषोडशोपचारैःपूजनंकरिष्ये इतिसंकल्प्यकलशादिसंपूज्यश्री लक्ष्मीनृसिंहाभ्यांनमःइतिपूजयेत् ॥ नीलरक्तपीतपुष्पाणितिलतैलपाचितान्खिचडिकुंजरसंज्ञकशाकमाषवटकान्तैलदीपंच समर्प्यनैवेद्यपदार्थैःसहान्नेनब्राह्मणसुवासिनीर्भोजयेत् ॥ स्वयंचापितदन्नेनभोजनंकार्यं ॥ ॥ अत्रैवशनैश्चरपूजा ॥ शनिवा रेखंजंब्राह्मणंतिलतैलेनाभ्यज्यस्वयंचाभ्यंगंकृत्वानित्यपूजनांतेलोहमयमूर्तौतिलमाषाक्षतैः तिलतैलाभिषेकपूर्वकंशनिपूजनंका र्यं ॥ नृसिंहपूजोक्तेनान्नेनब्राह्मणभोजनंनैवेद्यश्चकार्यः ॥ ममजन्मराशेःसकाशादनिष्टराशिस्थितस्यापिशनैश्चरस्यप्रसादसिद्ध्य र्थंश्रावणमासीयशनिवासरनिमित्तंशनैश्चरपूजनंकरिष्ये इतिसंकल्प्ययथाधिकारंशमग्निरितिवैदिकमंत्रेण नीलांजनसमाभास मितिवानाममंत्रेणवाशनिंसंपूज्यस्तोत्रेणस्तुवीत ॥ तद्दिनेमध्याह्नेहनुमत्पूजनंकार्यं ॥ ममाभीष्टसिद्धिद्वाराश्रीहनुमत्प्रीत्यर्थंषो डशोपचारैःपूजनंकरिष्ये इतिसंकल्प्यमनोजवंमारुत० प्रपद्ये ॥ इतिमंत्रेणहनूमतेनमःइतिपूजयेत् ॥ तैलमिश्रसिंदूरंजपार्कमं

॥ ३३ ॥ ॥ २३ ॥

दारकुसुमतैलपाचितमाषवटकमालांचार्पयेत् ॥ पूजांसमाप्य ॥ हनूमानंजनीसूनुर्वायुपुत्रोमहाबलः ॥ रामेष्टः फाल्गुनसखः पिं
गाक्षोमितविक्रमः ॥ उदधिक्रमणश्चैवसीताशोकविनाशनः ॥ लक्ष्मणप्राणदाताचदशग्रीवस्यदर्पहा ॥ द्वादशैतानिनामानिक
पींद्रस्यमहात्मनः ॥ स्वापकालेप्रबोधेचयात्राकालेचयःपठेत् ॥ तस्यसर्वभयंनास्तिरणेचविजयीभवेत् ॥ इतिस्तुवीत ॥ तेनव
ज्रतुल्यशरीरःअरोगोबलवान्धैर्यवान्बुद्धिमान्शत्रुक्षयकर्तामित्रवृद्धिकर्तावीर्यवान्कीर्तिमांश्चजायते ॥ आंजनेयालयेलक्षंहनूम
त्कवचंजपेत् ॥ अणिमाद्यष्टसिद्धीनांसाधकःस्वामितामियात् ॥ यक्षराक्षसवेतालादर्शनात्तस्यवेगतः ॥ पलायंतेदशदिशःकं
पिताभयविह्वलाः ॥ इति ॥ ॥ तद्दिनेअश्वत्थपूजनंकार्यं ॥ ममसर्वसंपत्समृद्धिद्वाराश्रीविष्णुप्रीत्यर्थंअश्वत्थपूजनंकरिष्ये ॥
मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे ॥ अग्रतःशिवरूपायअश्वत्थायनमोनमः ॥ श्रीविष्णुरूपायाश्वत्थायनमःइतिपूजयित्वा ॥
अश्वत्थहुतभुग्वासगोविंदस्यसदाश्रय ॥ अशेषंहरमेशोकंवृक्षराजनमोस्तुते ॥ इतिनत्वाश्वत्थालिंगनंकुर्यात् ॥ ॥ छ ॥

॥ ३४ ॥ शीतलासप्तमीपूजा ॥ प्रातःनित्यकर्मनिर्वर्त्यहरिद्रामिश्रचंदनेनभित्त्यांवापींलिखित्वातन्मध्येबालद्वयपुरुषत्रय
युताःसप्तशीतलासंज्ञकाउदकदेवताःश्ववृषभनरवाहनाःशिबिकाश्चलिखित्वापूजयेत् ॥ देशकालौसंकीर्त्यममपुत्रपौत्राद्यभिवृ
द्धिद्वाराशीतलादेवताप्रीत्यर्थंश्रावणशुक्लसप्तम्यांविहितंपूजनंकरिष्येइतिसंकल्प्यपरिवारसहितशीतलादेवताभ्योनमः इतिषो
डशोपचारैःपूजयेत् ॥ कर्कटीफलदध्योदनसहितंनैवेद्यंसमर्प्यवायनंदद्यात् ॥ ममपुत्रपौत्रा० शीतलाप्रीत्यर्थंब्राह्मणायअग्निपक्वाम्र
फलकर्कटीफलसहितकर्कटीपर्णस्थितदध्योदनवायनदानमहंकरिष्ये ॥ दध्यन्नंदक्षिणायुक्तंवायनंफलसंयुतं ॥ शीतलाप्रीतयेतु

भ्यंब्राह्मणायददाम्यहं ॥ इदंसोपस्करंदध्योदनवायनंअमुकशर्मणेब्राह्मणायसंप्रददे ॥ इतिशीतलासप्तमीपूजासमाप्ता ॥ ॥
॥ ३५ ॥ पवित्रारोपणं ॥ द्वादश्यांप्रातःकृतनित्यक्रियोदेशकालौसंकीर्त्यमयाकृतायाःसंवत्सरावधिविष्णुपूजायाःसंपूर्णफलप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविष्णोःपवित्रारोपणंकरिष्ये तदंगत्वेनपूजनंकरिष्येइतिसंकल्प्य यथासंभवंविष्णोर्महापूजांकृत्वा पवित्राणिशुद्धोदकेनप्रक्षाल्यवैणवपटलादौसंस्थाप्य गंधाद्युपचारैःसंपूज्य देवसमीपेगोदोहनकालमात्रमधिवास्य ततोमुख्यपवित्रंगंधदूर्वाक्षतयुक्तंकृत्वादेवकंठेसमर्पयेत् ॥ तत्रमंत्रः ॥ अतोदेवाइतिवैदिकः ॥ देवदेवनमस्तुभ्यंगृहाणेदंपवित्रकं ॥ पवित्रीकरणार्थायवर्षपूजाफलप्रदं ॥ पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतं ॥ शुद्धोभवाम्यहंदेवत्वत्प्रसादात्सुरेश्वर ॥ इतिमंत्रेणमूलमंत्रसंपुटितेनसमर्प्य अंगदेवताभ्यश्चतत्तन्नाममंत्रेणसमर्प्योत्तरपूजांकृत्वामहानैवेद्यंसमर्प्यनीराज्यप्रार्थयेत् ॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः ॥ इयंसांवत्सरीपूजातवास्तुगरुडध्वज ॥ वनमालांयथादेवकौस्तुभंसततंहृदि ॥ पवित्रमस्तुतेतद्वत्पूजांचहृदयेवह ॥ जानताजानतावापिनकृतंयत्तवार्चनं ॥ केनचिद्विघ्नदोषेणपरिपूर्णंतदस्तुमे ॥ अपराधसहस्राणिक्रियंतेहर्निशंमया ॥ दासोयमितिमांमत्वाक्षमस्वपरमेश्वर ॥ भूमौस्खलितपादानांभूमिरेवावलंबनं ॥ त्वयिजातापराधानांत्वमेवशरणंमम ॥ इतिसंप्रार्थ्यगुरवेब्राह्मणेभ्यश्चपवित्राणिदत्वास्वयंचधृत्वाब्राह्मणैःसहपारणंकुर्यात् ॥ ॥ छ ॥ ॥ छ ॥
॥ ३६ ॥ संकष्टचतुर्थीपूजा ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममविद्याधनपुत्रपौत्रप्राप्त्यर्थंसमस्तरोगमुक्तिकामःश्रीसंकष्टहरगणपतिप्रीत्यर्थंसंकष्टचतुर्थीव्रतांगत्वेनयथाशक्तिपूजांकरिष्ये तत्रादौगणपतिपूजनंकलशाद्यर्चनंचकरिष्येइतिसंकल्प्य

कृत्वासौवर्णरौप्यताम्रमृन्मयाद्यन्यतमांगणपतिमूर्तिंकृत्वाजलपूर्णपूर्णपात्रवस्त्रयुतकुंभोपरिमहीद्यौरित्यादिविधिनास्थापयित्वापूजयेत् ॥ अथध्यानं ॥ लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकं ॥ नानारत्नैःसुवेषाढ्यंप्रसन्नास्यंविचिंतये ॥ ध्यानं ॥ ॐ सहस्रशीर्षा० ॥ आगच्छत्वंजगन्नाथसुरासुरनमस्कृत ॥ अनाथनाथसर्वज्ञविघ्नराजकृपांकुरु ॥ गजास्याय० आवाहनं० ॥ ॐ पुरुषएवेदं० ॥ गोष्पात्वंसर्वलोकानामिंद्रादीनांविशेषतः ॥ भक्तदारिद्र्यविच्छेत्ताएकदंतनमोस्तुते ॥ विघ्नराजाय० आसनं० ॥ ॐ एतावानस्य० ॥ मोदकान्धारयन्हस्तेभक्तानांवरदायक ॥ देवदेवनमस्तेस्तुभक्तानांफलदोभव ॥ लंबोदराय० पाद्यं० ॥ ॐ त्रिपादूर्ध्व० ॥ महाकायमहारूपअनंतफलदोभव ॥ देवदेवनमस्तेऽस्तुसर्वेषांपापनाशन ॥ शंकरसूनवे० अर्घ्यं० ॥ ॐ तस्माद्विराळ० ॥ कुरुष्वाचमनंदेवसुरवंद्याखुवाहन ॥ सर्वाघदलनस्वामिन्नीलकंठनमोस्तुते ॥ उमासुताय० आचमनीयं० ॥ ॐ यत्पुरुषेण० ॥ गंगाचयमुनाचैवगोदावरिसरस्वती ॥ नर्मदासिंधुकावेरीजलंस्नानायकल्पितं ॥ हेरंबाय० स्नानं० ॥ आप्यायस्वेत्यादिमंत्रैः ॥ स्नानंपंचामृतेनैवगृहाणगणनायक ॥ अनाथनाथसर्वज्ञनमोमूषकवाहन ॥ पयोदधिघृतंचैवमधुशर्करयायुतं ॥ पंचामृतेनस्नपनंगृह्यतांगणनायक ॥ वक्रतुंडाय० पंचामृतस्नानं० ॥ पंचोपचारैःसंपूज्यगणपत्यथर्वशीर्षादिभिरभिषेकंकुर्यात् ॥ ॐ तंयज्ञंबर्हिषि० ॥ रक्तवस्त्रयुगंदत्तंदेवानामपिदुर्लभं ॥ गृहाणमंगलंदेवलंबोदरहरात्मज ॥ शूर्पकर्णाय० वस्त्रं० ॥ ॐ तस्माद्यज्ञा० ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणगणनायक ॥ आरक्तंब्रह्मसूत्रंचकनकस्योत्तरीयकं ॥ कुब्जाय० यज्ञोपवीतं० ॥ ॐ तस्माद्य० ॥ गृहाणेश्वरसर्वज्ञदिव्यंचंदनमुत्तमं ॥ करुणाकरपद्माक्षगौरीसुतनमोस्तुते ॥ गणेश्वराय० गंधं० ॥ अक्षताश्च० गणनायकाय० अक्षतान्० ॥ सुगंधिदिव्यमालांचगृहाणगणनायक ॥ विनायक

नमस्तुभ्यंशिवसूनोनमोस्तुते ॥ मालां० ॥ ॐ तस्मादश्वा० ॥ माल्यादीनि० इतिपुष्पाणि ॥ अथांगपूजा ॥ गणेश्वरायनमः पादौ पूजयामि ॥ विघ्नराजाय० जानुनी० ॥ आखुवाहनाय० ऊरू० ॥ हेरंबाय० कटिं० ॥ कामारिसूनवे० नाभिं० ॥ लंबोदराय० उदरं० ॥ गौरीसुताय० स्तनौ० ॥ गणनायकाय० हृदयं० ॥ स्थूलकंठाय० कंठं० ॥ स्कंदाग्रजाय० स्कंधौ० ॥ पाशहस्ताय० हस्तान्पू० ॥ गजवक्राय० वक्रं० ॥ विघ्नहर्त्रे० ललाटं० ॥ सर्वेश्वराय० शिरःपू० ॥ गणाधिपाय० सर्वांगंपूजयामि ॥ ॐ यत्पुरुषंव्य० ॥ दशांगंगुग्गुलंधूपमुत्तमंगणनायक ॥ गृहाणदेवदेवेशशिवासुतनमोस्तुते ॥ विकटाय० धूपं० ॥ ॐ ब्राह्मणोस्य० ॥ सर्वज्ञसर्वरत्नाढ्यसर्वेशविबुधप्रिय ॥ गृहाणमंगलंदीपंघृतवर्तिसमन्वितं ॥ वामनाय० दीपं० ॥ ॐ चंद्रमामनसो० ॥ नैवेद्यंगृह्यतांदेवनानामोदकसंयुतं ॥ पक्वान्नफलसंयुक्तंषड्रसैश्चसमन्वितं ॥ सर्वाय० नैवेद्यं० ॥ मध्येपानीयं० उत्तरापोशनं० ॥ कृष्णावेण्यागौतमीनांपयोष्णीनर्मदाजलैः ॥ आचम्यतांविघ्नराजप्रसन्नोभवसर्वदा ॥ आचमनं० ॥ फलान्यमृतकल्पानिसुगंधीन्यघनाशन ॥ आनीतानियथाशक्त्यागृहाणगणनायक ॥ सर्वार्तिनाशिने० फलं ॥ तांबूलंगृह्यतांदेवनागवल्ल्यादलैर्युतं ॥ कर्पूरेणसमायुक्तंसुगंधंमुखभूषणं ॥ विघ्नहर्त्रे० तांबूलं० ॥ सर्वदेवाधिदेवेशसर्वसिद्धिप्रदायक ॥ भक्त्यादत्तांदक्षिणांतेगृहाणजगदीश्वर ॥ सर्वेश्वराय० दक्षिणां० ॥ ॐ श्रियेजात० ॥ पंचवर्तिसमायुक्तंवह्निनायोजितंमया ॥ गृहाणमंगलंदीपंविघ्नराजनमोस्तुते ॥ नीराजनं० ॥ कर्पूरदीपं० ॥ ॐ नाभ्याआसी० ॥ नमोस्त्वनंताय० नमस्कारः ॥ ॐ सप्तास्यासन्० यानिकानिच० प्रदक्षिणाः ॥ ॐ यज्ञेनयज्ञमितिमंत्रपुष्पांजलिं० ॥ चंद्रपूजा ॥ दधिशंखतुषाराभंक्षीरोदार्णवसंभवं ॥ नमामिशशिनंसोमंशंभोर्मुकुटभू

षणं ॥ इतिमंत्रेणचंद्रमसेनमइतिवापूजयेत् ॥ गणेशायनमस्तुभ्यंसर्वसिद्धिप्रदायक ॥ संकष्टंहरमेदेवगृहाणार्घ्यंनमोस्तुते ॥
संकष्टहरगणेशायइदमर्घ्यं० ॥ कृष्णपक्षेचतुर्थ्यांतुपूजितोसिविधूदये ॥ क्षिप्रंप्रसादितोदेवगृहाणार्घ्यंनमोस्तुते ॥ अर्घ्यं० ॥
तिथीनामुत्तमेदेविगणेशप्रियवल्लभे ॥ सर्वसंकष्टनाशायचतुर्थ्यर्घ्यंनमोस्तुते ॥ अर्घ्यं० ॥ क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाक
र ॥ गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् ॥ रोहिणीसहितचंद्रायनमःइदमर्घ्यं० ॥ वायनमंत्रः ॥ विप्रवर्यनमस्तुभ्यं
मोदकान्वैददाम्यहं ॥ मोदकान्सफलान्पंचदक्षिणाभिःसमन्वितान् ॥ आपदुद्धरणार्थायगृहाणद्विजसत्तम ॥ प्रार्थना ॥
अशुद्धमतिरिक्तंवाद्रव्यहीनंमयाकृतं ॥ तत्सर्वंपूर्णतांयातुविप्ररूपगणेश्वर ॥ प्रतिमादानमंत्रः ॥ ॐ नमोहेरंबमदमोदितसंक
ष्टान्निवारयनिवारय इतिमूलमंत्रंएकविंशतिवारंजपेत् ॥ विसर्जनमंत्रः ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेत्वंगणेश्वर ॥ व्रतेनानेन
देवेशयथोक्तफलदोभव ॥ इतिसंकष्टीव्रतपूजासंपूर्णा ॥ ॥ छ ॥ ॥ छ ॥

॥ ३७ ॥ जन्माष्टमीपूजा ॥ प्रातःकृतनित्यक्रियःप्राङ्मुखोदेशादिसंकीर्त्यतत्तत्कालेसप्तम्यादिसत्त्वेपिप्रधानभूतामष्टमीमेव
संकीर्त्य श्रीकृष्णप्रीत्यर्थंजन्माष्टमीव्रतंकरिष्ये ॥ जयंतीयोगसत्त्वेजन्माष्टमीव्रतंजयंतीव्रतंचतंत्रेणकरिष्येइतिसंकल्पयेत् ॥
ताम्रपात्रेजलंगृहीत्वा ॥ वासुदेवंसमुद्दिश्यसर्वपापप्रशांतये ॥ उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं ॥ अशक्तौ फलानिभक्षयि
ष्यामीत्याद्यूहः ॥ आजन्ममरणंयावद्यन्मयादुष्कृतंकृतं ॥ तत्प्रणाशयगोविंदप्रसीदपुरुषोत्तमेतिपात्रस्थंजलंक्षिपेत् ॥ ततःसुवर्णर
जतादिमय्योमृन्मय्योवाभित्तिलिखितावाप्रतिमायथाकुलाचारंकार्याः ॥ यथा पर्यंकेप्रसुप्तदेवक्याःस्तनंपिबंतींश्रीकृष्णप्रतिमां

निधाय जयंतीसत्त्वेत्वन्यदेवक्याउत्संगेद्वितीयांश्रीकृष्णमूर्तिंनिधाय पर्यंकस्थदेवकीचरणसंवाहनपरांलक्ष्मींनिधाय भित्त्यादौ खड्गधरंवसुदेवं नंदगोपीगोपान्लिखित्वाप्रदेशांतरेमंचकेप्रसूतकन्ययासहयशोदाप्रतिमां पीठांतरेवसुदेवदेवकीनंदयशोदाश्रीकृष्णरामचंडिकाइतिसप्तप्रतिमाःस्थापयेत् ॥ एतावत्प्रतिमाकरणाशक्तौवसुदेवादिचंडिकांताःसप्तवायथाचारंयथाशक्तिवाकृत्वाअन्याःसर्वायथायथंध्यायेदितिभाति ॥ ॥ निशीथासन्नप्राक्कालेस्नात्वाआचम्यप्राणानायम्यश्रीकृष्णप्रीत्यर्थंसपरिवारश्रीकृष्णपूजांकरिष्यइतिसंकल्प्य न्यासान्कलशशंखादिपूजांतंनित्यवत्कृत्वाध्यायेत् ॥ पर्यंकस्थांकिन्नराद्यैर्युतांध्यायेत्तुदेवकीं ॥ श्रीकृष्णंबालकंध्यायेत्पर्यंकेस्तनपायिनं ॥ श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविं ॥ संवाहयंतींदेवक्याःपादौध्यायेच्चतांश्रियं ॥ एवंध्यात्वा ॥ ॐ सहस्रशीर्षा० देवक्यैनमःइतिदेवकीमावाह्य मूलमंत्रेणश्रीकृष्णायनमःश्रीकृष्णमावाहयामीतिआवाह्य लक्ष्मींचावाह्य देवक्यैवसुदेवाययशोदायैनंदायकृष्णायरामायचंडिकायैइतिनामभिरावाह्यलिखितादिदेवताःसकलपरिवारदेवताभ्योनमइत्यावाह्य (मूलमंत्रेणसूक्तर्चावा अत्रावाहितदेवक्यादिपरिवारदेवतासहितश्रीकृष्णायनमइत्यासनपाद्यार्घ्याचमनीयाभ्यंगस्नानानिदत्वापंचामृतस्नानांतेचंदनेनानुलेपयेत् ॥ शुद्धोदकाभिषेकांतेवस्त्रयज्ञोपवीतगंधपुष्पाणिधूपदीपौच ॥ विश्वेश्वरायविश्वाय तथाविश्वोद्भवायच ॥ विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः ॥ यज्ञेश्वरायदेवायतथायज्ञोद्भवायच ॥ यज्ञानांपतयेनाथगोविंदायनमोनमः ॥ इतिमंत्राभ्यांमूलमंत्रादिसमुच्चिताभ्यांदद्यात् ॥ जगन्नाथनमस्तुभ्यंसंसारभयनाशन ॥ जगदीश्वरायदेवायभूतानांपतयेनमः ॥ इतिनैवेद्यं ॥ मूलमंत्रादिकंसर्वत्रयोज्यं ॥ तांबूलादिनमस्कारप्रदक्षिणापुष्पांजल्यंतं सर्वकार्यं ॥) अथवोद्यापनप्र ॥ २६ ॥

करणोक्तविधिनापूजा ॥ सा यथा ॥ उक्तप्रकारेणध्यानावाहनेकृत्वा ॥ ॐ पुरुषएवेदं० ॥ देवाब्रह्मादयोयेचस्वरूपंनविदुस्तव ॥ अत स्त्वांपूजयिष्यामिमातुरुत्संगवासिनं ॥ आसनं० ॥ ॐ एतावानस्य० ॥ अवतारसहस्राणिकरोषिमधुसूदन ॥ नतेसंख्यावताराणांक श्चिज्जानातितत्त्वतः ॥ पाद्यं० ॥ ॐ त्रिपादूर्ध्व० ॥ जातःकंसवधार्थायभूभारोत्तारणायच ॥ देवानांचहितार्थायधर्मसंस्थापनायच ॥ कौरवाणांविनाशायपांडवानांहितायच ॥ गृहाणार्घ्यमयादत्तंदेवक्यासहितोहरे ॥ अर्घ्यं० ॥ ॐ तस्माद्विरा० ॥ सुरासुरनरेशायक्षी राब्धिशयनायच ॥ कृष्णायवासुदेवायददाम्याचमनंशुभं ॥ आचमनीयं० ॥ ॐ यत्पुरुषेण० ॥ नारायणनमस्तेस्तुनरकार्णवतारक ॥ गंगोदकंसमानीतंस्नानार्थंप्रतिगृह्यतां ॥ स्नानं० ॥ आप्यायस्वेत्यादिमंत्रैः ॥ पयोदधिघृतक्षौद्रशर्करास्नानमुत्तमं ॥ तृप्त्यर्थंदेवदेवेशगृ ह्यतांदेवकीसुत ॥ पंचामृतं शुद्धोदकस्नानं महाभिषेकः आचमनं० ॥ ॐ तंयज्ञं० ॥ क्षौमंचपट्टसूत्राद्यंमयानीतांशुकंशुभं ॥ गृह्यतां देवदेवेशमयादत्तंसुरोत्तम ॥ वस्त्रं० ॥ ॐ तस्माद्यज्ञा० ॥ नमःकृष्णायदेवायशंखचक्रधरायच ॥ ब्रह्मसूत्रंजगन्नाथगृहाणपरमेश्वर ॥ यज्ञोपवीतं०॥ॐ तस्माद्यज्ञा०॥ नानागंधसमायुक्तंचंदनंचारुचर्चितं॥कुंकुमाक्ताक्षतैर्युक्तंगृह्यतांपरमेश्वर ॥ गंधं०॥ॐ तस्मादश्वा०॥ पुष्पाणियानिदिव्यानिपारिजातोद्भवानिच ॥ मालतीकेसरादीनिपूजार्थंप्रतिगृह्यतां ॥ पुष्पाणि० ॥ अथांगपूजा ॥ श्रीकृष्णा यनमः पादौपूजयामि ॥ संकर्षणायनमः गुल्फौपू० ॥ कालात्मनेनमः जानुनीपू० ॥ विश्वकर्मणेन० जंघेपू० ॥ विश्वनेत्राय० कटिंपू०॥ विश्वकर्त्रेन० मेढ्रंपू०॥ पद्मनाभायनमः नाभिंपू० ॥ परमात्मनेन० हृदयंपू० ॥ श्रीकंठायनमः कंठंपू० ॥ सर्वास्त्रधारिणे न०बाहूपू० ॥ वाचस्पतयेन० मुखंपू० ॥ केशवायन० ललाटंपू० ॥ सर्वात्मनेन० शिरःपू० ॥ विश्वरूपिणेनारायणायनमः

सर्वांगंपूजयामि ॥ सहस्त्रतुलसी॥ ॐ यत्पुरुषं०॥वनस्पतिरसो० धूपं०॥ॐ ब्राह्मणो०॥ त्वंज्योतिःसर्वदेवानांतेजस्त्वंतेजसांपरं॥ आत्मज्योतिर्नमस्तुभ्यंदीपोयंप्रतिगृह्यतां॥ दीपं॥ ॐ चंद्रमा०॥ नानागंधसमायुक्तंभक्ष्यभोज्यंचतुर्विधं ॥ नैवेद्यार्थमयादत्तंगृहाणपरमेश्वर॥ नैवेद्यं० ॥ आचमनं करोद्वर्तनं० ॥ तांबूलंचसकर्पूरंपूगीफलसमन्वितं॥ मुखवासकरंरम्यंप्रीत्यर्थंप्रतिगृह्यतां॥ तांबूलं०॥ सौवर्णराजतंताम्रंनानारत्नसमन्वितं ॥ कर्मसाद्गुण्यसिद्ध्यर्थंदक्षिणांप्रतिगृह्यतां॥ दक्षिणां०॥ रंभाफलंनारिकेलंतथैवाम्रफलानिच ॥ पूजितोसिसुरश्रेष्ठगृह्यतांकंससूदन ॥ फलानि० ॥ ॐ श्रियेजात० नीराजनं०॥ कर्पूरदीपं० ॥ ॐ नाभ्याआसी० नमोस्त्वनंताय० नमस्कारः॥ ॐ सप्तास्या०॥यानिका० प्रदक्षिणाः॥ ॐ यज्ञेन० इत्यादिवेदमंत्रैःपुष्पांजलिं०॥ अपराधसहस्राणि० पूजांनिवेदयेत्॥ सर्वोपचारपूजनसमाप्तौद्वादशांगुलविस्तारंरौप्यमयंस्थंडिलादिलिखितंवारोहिणीयुतंचंद्रं ॥ सोमेश्वरायसोमायतथासोमोद्भवायच ॥ सोमस्यपतयेनित्यंतुभ्यंसोमायवैनमः इतिसंपूज्य ॥ सपुष्पकुशचंदनतोयंशंखेनादाय ॥ क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यंशशांकेशरोहिणीसहितोमम ॥ ज्योत्स्नापतेनमस्तुभ्यंज्योतिषांपतयेनमः ॥ नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यतां॥ इतिमंत्राभ्यांचंद्रायार्घ्यंदद्यात्॥ ततःश्रीकृष्णायार्घ्यंदद्यात्॥ तत्रमंत्रः॥ जातःकंसवधार्थायभूभारोत्तारणायच ॥ पांडवानांहितार्थायधर्मसंस्थापनायच ॥ कौरवाणांविनाशायदैत्यानांनिधनायच ॥ गृहाणार्घ्यंमयादत्तंदेवक्यासहितोहरे ॥ श्रीकृष्णायइदमर्घ्यं० ॥ ततःप्रार्थयेत्॥ त्राहिमांसर्वलोकेशहरेसंसारसागरात् ॥ त्राहिमांसर्वपापघ्नदुःखशोकार्णवात्प्रभो ॥ सर्वलोकेश्वरत्राहिपतितंमांभवार्णवे ॥ त्राहिमांसर्वदुःखघ्नरोगशोकार्णवाद्धरे ॥ दुर्गतांस्त्रायसेविष्णोयेस्मरंतिसकृत्सकृ

॥ २७ ॥

त् ॥ त्राहिमांदेवदेवेशत्वत्तोनान्योस्तिरक्षिता ॥ यद्वाकिंचनकौमारेयौवनेयच्चवार्धके ॥ तत्पुण्यंवृद्धिमायातुपापंदहहलायुधेति प्रार्थयेत् ॥ इतिश्रीकृष्णजन्माष्टमीपूजासमाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३८ ॥ अथप्रदोषपूजा ॥ अद्येत्यादिपूर्वोक्तएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममअमुककामनासिद्ध्यर्थंशैवागमोक्तप्रकारेणयथासंभवमिलितैर्द्रव्यैःशिवपूजनमहंकरिष्ये ॥ तदंगशरीरशुद्ध्यर्थंभूशुद्ध्यादिसर्वकर्मकरिष्येइतिसंकल्प्यन्यासादिकलशार्घ्यर्चनंचकृत्वा ततःद्वारपूजांकुर्यात् ॥ यावन्नदीयतेचार्घ्यंभास्करायमहात्मने ॥ तावन्नपूजयेद्विष्णुंशिवंवापिकदाचन ॥ पूर्वद्वारेवामपार्श्वयोःक्रमात् मायाशक्त्यैनमः चिच्छक्त्यै० द्वारश्रियै० वास्तुपुरुषाय० ॥ दक्षिणद्वारे गंगायै० यमुनायै० द्वारश्रियै० वास्तुपुरुषाय० ॥ पश्चिमद्वारे धात्र्यै० विधात्र्यै० द्वारश्रियै० वास्तुपुरुषाय० ॥ उत्तरद्वारे शंखनिधये० पद्मनिधये० द्वारश्रियै० वास्तुपुरुषाय० ॥ पुनर्द्वारेदक्षिणवामपार्श्वयोः गणेश्वराय० नंदिने० महाकालाय० ॥ दक्षिणद्वारे दक्षिणवामपार्श्वयोः भृंगिरिटिने० स्कंदाय० ॥ उत्तरद्वारे दक्षिणवामपार्श्वयोः उमायै० चंडीश्वराय० ॥ पुरतःपूर्वदिशि गुंगुरुभ्योनमः पंपरमगुरुभ्यो० पंपरमेष्ठीगुरुभ्यो० परावरगुरुभ्यो० परावरपादुकाभ्यो० ॥ ततः पुष्पाक्षतादिभिःपीठपूजांकुर्यात् ॥ दक्षिणे मातापितृभ्यां० उपमन्यवे० नारदाय० सनकादिभ्यो० गुरुभ्यो० ॥ वामभागे गंगणपतये० दुंदुर्गायै० क्षंक्षेत्रपालाय० संसरस्वत्यै० मध्येपाशांकुशवरदाभयहस्तरक्तवर्णाधारशक्त्यै० तदुपरिहेमवर्णमहाकालाय० महाकूर्माय० तदुपरिसहस्रशिरसेश्वेतवर्णायनीलांबरधरायअनंताय० तदुपरिनीलवर्णायशंखचक्रगदाधरायपर

शुहस्तायसर्वाभरणभूषितायसपरिवारायश्रीवराहाय० तद्दंष्ट्रोपरिपृथ्वीमंडलाधिदेवतायैश्रीह्यंकुशवरदाभयहस्तायैपृथिव्यै० अ
मृतार्णवाय० श्वेतद्वीपाय० नंदनोद्यानाय० रत्नमंडपाय० कल्पवृक्षाय० स्वर्णरचितरत्नखचितदिव्यसिंहासनाय० आग्नेयको
णे रक्तवर्णवृषभाकारायधर्माय० नैर्ऋत्येश्यामवर्णसिंहाकारायज्ञानाय० वायव्ये पीतवर्णभूताकारायवैराग्याय० ईशान्ये कृष्णव
र्णगजाकारायऐश्वर्याय० पूर्वे अधर्माय० दक्षिणे अज्ञानाय० पश्चिमे अवैराग्याय० उत्तरे अनैश्वर्याय० मध्ये संसत्त्वाय० रंरज
से० तंतमसे० मंमायायै० विंविद्यायै० अव्यक्तचित्तकंदाय० बुद्धिनालाय० अहंकारवर्णपद्माय० अंअर्कमंडलाय० सोंसोम
मंडलाय० वंवह्निमंडलाय० अंआत्मने० उंअंतरात्मने० पंपरमात्मने० अंज्ञानात्मने० ॥ अथपूर्वे वामायै० आग्नेये ज्येष्ठायै०
दक्षिणे रौद्रायै० नैर्ऋत्ये कालायै० पश्चिमे कलविकरणाय० वायव्ये बलविकरणायै० उत्तरे बलाय० ईशान्यां बलप्रमथि
न्यै० मध्ये सर्वभूतदमनायै० मनोन्मनायै० ॐनमोभगवतेसकलगुणात्मनेशक्तियुक्तायानताययोगपीठात्मनेसदाशिवायसांगा
यसपरिवारायनमः ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं ॥ तावत्त्वंप्रीतिभावेनलिंगेस्मिन्संनिधोभव ॥ भवानीशंकरंसांगं
सपरिवारंसवाहनंसशक्तिकंपुत्रपरिवारसमेतंभूर्भुवःस्वःआवाहयामि ॥ आवाहनीमुद्रया आवाहितोभव ॥ स्थापनीमुद्रया स्था
पितोभव ॥ सन्निधापनीमुद्रया संनिहितोभव ॥ संनिरोधिनीमुद्रया संनिरुद्धोभव ॥ संमुखीमुद्रयासंमुखोभव ॥ प्रसादमुद्रया
प्रसन्नोभव ॥ नमःशंभवेइतिमंत्रस्यपरमेष्ठीऋषिःश्रीमहारुद्रोदेवता गायत्रीछंदः ब्रह्माबीजं मायाशक्तिः ॐकारोबीजं सुषुम्नाश
क्तिः ब्रह्माबीजं सरस्वतीशक्तिः ॐनमःशिवायेइतिबीजं शिवतरायेतिशक्तिः ॥ भवानीशंकरन्यासेपूजायांचविनियोगः ॥ ॐनमः

शिरसि ॥ शंभवेच ललाटे ॥ मयः नेत्रयोः ॥ भवेच श्रोत्रयोः ॥ नमः नासिकायां ॥ शंकरायच ग्रीवायां ॥ मयः जठरे ॥ करायच नाभौ ॥ नमः कट्यां ॥ शिवायच ऊर्वोः ॥ शिवतरायच पादयोः ॥ नमः शंभवेच अंगुष्ठाभ्यां० ॥ मयोभवेच तर्जनीभ्यां० ॥ नमःशंकरायच मध्यमाभ्यां० ॥ मयस्करायच अनामिकाभ्यां० ॥ नमः शिवायच कनिष्ठिकाभ्यां० ॥ शिवतरायच करतलकरपृष्ठाभ्यां० ॥ नमःशंभवेच हृदयाय० ॥ मयोभवेचशिरसेस्वाहा ॥ नमःशिवायच शिखायैवषट् ॥ मयस्करायच कवचायहुं ॥ नमःशिवायच नेत्रत्रयायवौषट् ॥ शिवतरायच अस्त्रायफट् ॥ उच्छ्रितंदक्षिणांगुष्ठंवामांगुष्ठेनबंधयेत् ॥ वामांगुलीदक्षिणाभिरंगुलीभिश्चवेष्टयेत् ॥ लिंगमुद्रासमाख्याताशिवसांनिध्यकारिणी ॥ एषतइत्यस्यवसिष्ठोरुद्रोजगती ॥ हृदिमुद्राप्रदर्शनेविनियोगः ॥ ॐ एषतेरुद्रभागः० हृदिमुद्रांप्रदर्शयेत् ॥ हृदयेसर्वकामांचनाभौज्ञानंप्रदर्शयेत् ॥ अथध्यानं ॥ नवशक्तिवनेरम्येध्यायेद्देवमुमापतिं ॥ चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणं ॥ आपिंगलजटाजूटंरत्नमौलिविराजितं ॥ नीलग्रीवमुदारांगंनानाहारोपशोभितं ॥ वरदाभयहस्तंचहरिणंचपरश्वधं ॥ दधानंनागवलयंकेयूरांगदभूषणं ॥ व्याघ्रचर्मपरीधानंरत्नसिंहासनस्थितं ॥ ध्यात्वातद्वामभागेचगिरिजांभक्तवत्सलां ॥ भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभां ॥ विद्युत्पुंजनिभांतन्वींमनोनयननंदिनीं ॥ बालेंदुशेखरांस्निग्धांनीलकुंचितकुंतलां ॥ भृंगसंघातरुचिरनीलालकविराजितां ॥ मणिकुंडलविद्योतमुखमंडलविभ्रमां ॥ नवकुंकुमसंकाशकपोलतलदर्पणां ॥ मधुरस्मितविभ्राजदरुणाधरपल्लवां ॥ कंबुकंठींशिवामुद्यत्कुचपंकजकुड्मलां ॥ पाशांकुशाभयाभीष्टैर्विलसंतींचतुर्भुजां ॥ अनेकरत्नविलसत्कंकणांगदमुद्रिकां ॥ वलित्रयेणविलसद्धेमकांचीगुणान्वितां ॥ रत्नमाल्यांबरधरांदिव्यसिंहा

सनस्थितां ॥ दिक्पालवनितामौलिसंनद्धांघ्रिसरोरुहां ॥ रत्नसिंहासनारूढांसर्पराजपरिच्छदां ॥ एवंध्यात्वामहादेवंदेवींचगि
रिकन्यकां ॥ कृतांजलिपुटोभूत्वाचिंतयेद्धृदिशंकरं ॥ ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ॥ अशेषाघविनाशायप्रसीदम
मशंकर॥ दुःखशोकाग्निसंतप्तंसंसारभयपीडितं ॥ महारोगाकुलंदीनंत्राहिमांवृषवाहन ॥ ध्यानं ॥ ॐ सहस्रशीर्षा० ॥ आगच्छदे
वदेवेशमहादेवमहेश्वर ॥ गृहाणसहपार्वत्यातवपूजांमयाकृतां ॥ भवानीशंकरंसांगंसायुधंसवाहनंसपरिवारंसशक्तिकंपुत्रपरि
वारसमेतंभूर्भुवःस्वःआवाहयामि ॥ ॐ पुरुषएवेदं० ॥ दर्भाणांविष्टरेणैवमयादत्तेनवैप्रभो ॥ आसनंकुरुदेवेशप्रसन्नोभवसर्वदा ॥
ॐनमस्तारायच ॥ श्रीसांबसदाशिवाय० ॥ आसनं० ॥ ॐ एतावानस्य० ॥ मयादत्तंहितेपाद्यंगंधपुष्पाक्षतोदकैः ॥ गृहाणदेव
देवेशप्रसन्नोभवसर्वदा ॥ नमःशंभवेचमयोभवेच श्रीसांब० ॥ पाद्यं० ॥ ॐ त्रिपादूर्ध्व० ॥ अर्घ्योसीतिह्युमाकांतअर्घ्यमानेनवै
प्रभो ॥ गृहाणत्वंमयादत्तंममसिद्धिप्रदोभव ॥ नमःशंकरायचमयस्करायच श्रीसांब० ॥ अर्घ्यं० ॥ ॐ तस्माद्विराळजायत० ॥
दत्तमाचमनीयार्थंमयाविश्वेश्वरप्रभो ॥ गृहाणपरमेशानतुष्टोभवममाद्यवै ॥ नमःशिवायचशिवतरायच श्रीभवानीशंक० ॥ आ
चमनीयं० ॥ ॐ यत्पुरुषेण० ॥ नमोस्तुसर्वलोकेशउमादेहार्धधारिणे ॥ मधुपर्कोमयादत्तोगृहाणजगदीश्वर ॥ नमस्तीर्थ्यायचकू
ल्यायच भवानी० ॥ मधुपर्कस्नानं० ॥ पंचामृतेनस्नपयिष्ये ॥ आप्यायस्वगोतमःसोमोगायत्री पयःस्नापने० ॥ ॐ आप्याय ॥ २९ ॥
स्व० ॥ पयःस्नानं० ॥ शुद्धोदक० ॥ ज्येष्ठाय० वस्त्रं० श्रेष्ठाय० आचमनीयं० रुद्राय० यज्ञोपवीतं० कालाय० आचमनी
यं० कलविकरणाय० चंदनं० बलविकरणाय० अक्षतान्० बलाय० पुष्पं० बलप्रमथनाय० धूपं० सर्वभूतदमनाय० दीपं०

मनोन्मनाय० नैवेद्यं० रुद्राय० तांबूलं० महेश्वराय० फलं० सदाशिवाय० दक्षिणां० सद्योजातमितिमंत्रपुष्पांजलिं० ॥ नमस्करोमि ॥ आवाहनंन० ॥ एतेन अत्रगंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणाभिः कृतपयःस्नानांगपूजनेनभगवान्श्रीसांब सदाशिवःप्रीयतां ॥ निर्माल्यंविसृस्य ॥ दध्नास्नपयिष्ये ॥ दधिक्राव्णोवामदेवोदधिक्रावानुष्टुप् दधिस्नापने० ॥ ॐ दधिक्रा व्णो० ॥ दध्नाचैवमहादेवस्नापनंक्रियतेमया ॥ गृहाणत्वंसुराधीशसुप्रसन्नोभवाव्यय ॥ श्रीभवा० ॥ दधिस्नानं० शुद्धोदकस्ना नं० ॥ आचम० शेषंपूर्ववत् ॥ वामदेवायेतिमंत्रपुष्पं० अनेनदधिस्नानेनभगवान्श्रीसांबसदाशिवःप्रीयतां ॥ निर्माल्यंवि० ॥ घृतेनस्नापयिष्ये ॥ घृतंमिमिक्षेगृत्समदोलिंगोक्तादेवतात्रिष्टुप् घृतस्नापने० ॥ ॐ घृतंमिमिक्षे० ॥ सर्पिषाचमहारुद्रस्नापनंक्रि यतेधुना ॥ गृहाणश्रद्धयादत्तंतवप्रीत्यर्थमेवच ॥ घृतस्नानं० शुद्धोदकस्नानं० आचम० ॥ ॐ अघोरेभ्यो० मंत्रपुष्पं० ॥ अनेनघृ तस्नानेनभगवान्श्रीसांबसदा० ॥ निर्माल्यंवि० ॥ मधुनास्नापयिष्ये ॥ मधुवाताइत्यस्यराहूगणोगोतमःसोमोगायत्री ॥ मधुस्नापने० ॥ ॐ मधुवाता० ॥ इदंमधुमयादत्तंतवपुष्ट्यर्थमेवच ॥ गृहाणदेवदेवेशततःशांतिंप्रयच्छमे ॥ मधुस्ना० शुद्धो दकस्नानं० आचम० ॥ ॐ तत्पुरुषायविद्महे० मंत्रपुष्पं० ॥ अनेनमधुस्नानेनभगवान्श्रीसांबसदाशिवःप्रीयतां ॥ शर्करा० स्वादुःपवस्वेत्यस्यभार्गवःपवमानःसोमस्त्रिष्टुप् ॥ शर्करास्नाने० ॐ स्वादुःपवस्व० ॥ सितयादेवदेवेशस्नापनंक्रियतेयतः ॥ ततःसंतुष्टिमापन्नःप्रसन्नोवरदोभव ॥ शर्करास्नानं० शुद्धो० आचम० ईशानःसर्व० मंत्रपुष्पं० अनेनपंचामृतस्नानेनभग० ॥ गंधोदकस्नाप० ॥ गंधद्वारामित्यस्यानंदकर्दमःश्रीरनुष्टुप् ॥ गंधोदकस्ना० ॥ ॐ गंधद्वारां० ॥ गंधोदकेनदेवेशस्नापयामिजगत्प्र

भो ॥ कुशपुष्पफलैरन्यैर्गृहाणजगदीश्वर ॥ कृष्णागरुप्रचुरकर्दमगंधसारकस्तूरिकामलयचर्चितरोचनाद्यैः ॥ सत्केशरैश्चरुचि
रैश्चसुशीतलैश्चभक्त्यानिरंतरमहंस्नपयामिशंभो ॥ गंधोदकस्नानं० ॥ शरासइत्यस्यागस्त्योप्तृणसूर्याअनुष्टुप् ॥ कुशोदकस्नाने०
ॐ शरासः० ॥ गोधूमगुंद्रकुशमुंजउशीरदूर्वाकाशोयवास्तुलसिमंजरिबिल्वखंडाः ॥ मंदारबल्वजशरांकुरधान्यकेनभक्त्यानिरं
तरमहंस्नपयामिशंभो ॥ कुशोदकस्नानं० ॥ आयनेतेद्रोणआत्रेयोनुष्टुप् ॥ पुष्पोदकस्ना० ॥ ॐ आयनेते० ॥ कोदंडखंडितपुर
त्रितयायरोषाच्चूर्णीकृतासमशरायललाटवक्त्रे ॥ स्तुत्यासुरादिभिरजस्रमतिस्तुतायस्नानायतेस्तुसुरभीकृतपुष्पतोयं ॥ पुष्पोद० ॥
याःफलिनीरित्यस्याथर्वणोभिषगोषधयोनुष्टुप् ॥ फलोदकस्ना० ॥ ॐ याःफलिनी० ॥ खर्जूरजंबुकदलीपनसाम्रपक्कपूगीकपित्थब
दरीजमुदुंबराणि ॥ धात्रीफलानिरुचिराणिमनोहराणिभक्त्यानिरंतरमहंस्नपयामिशंभो ॥ फलोदकस्ना० ॥ सहिरत्नानीत्यस्य
श्यावाश्वःसवितानुष्टुप् ॥ रत्नोदकस्ना० ॥ ॐ सहिरत्ना०॥ रत्नोदकैर्मणिगणैरुदितार्कबिंबतुल्यैःसमानविमलैर्गुणमौक्तिकानि ॥
वज्रप्रवालमणिरंजितनीलकाद्यैर्भक्त्यानिरंतरमहंस्नपयामिशंभो ॥ रत्नोदकस्नानं० ॥ मानस्तोकइत्यस्यकुत्सोरुद्रोजगती ॥ विभू
तिस्नापनेवि० ॐ मानस्तोके० भस्मोदकस्नानं० ॥ तर्पयामिकृपालोत्वांश्रद्धयापार्वतीपते ॥ तुष्टप्रयच्छदययाममशांतिंजग
द्गुरो ॥ भवायदेवाय० शर्वायदेवा० ईशानायदेवा० पशुपतयेदेवा० रुद्रायदेवा० उग्रायदेवा० भीमायदेवा० महतेदे ॥ ३० ॥
वा० ॥ भवस्यदेवस्यपत्न्यै० शर्वस्यदेवस्यप० ईशानस्यदेवस्यप० पशुपतेर्देवस्यप० रुद्रस्यदेवस्यप उग्रस्यदेवस्यप० भीमस्य
देवस्यप० महतोदेवस्यप० ॥ भवंदेवंतर्पयामि शर्वंदेवंत० ईशानंदेवंत० पशुपतिंदेवंत० रुद्रंदेवंत० उग्रंदेवंत० भीमंदेवंत०

महांतंदेवं० ॥ भवस्यदेवस्यपत्नीं० शर्वस्यदेवस्यपत्नीं० ईशानस्यदेवस्यप० पशुपतेर्देवस्यप० रुद्रस्यदेवस्यप० उग्रस्यदेवस्यप०
भीमस्यदेवस्यप० महतोदेवस्यपत्नींतर्पयामीतितर्पणंकृत्वा ॥ ततः ज्येष्ठाय० स्नानं श्रेष्ठाय० आचम० रुद्राय० यज्ञोप० कालाय०
आचम० कलविकरणाय० चंदनं० बलविकरणाय० अक्षतान्० बलाय० पुष्पं० बलप्रमथनाय० धूपं० सर्वभूतदमनाय० दीपं०
मनोन्मनाय० नैवेद्यं० शिवाय० तांबूलं० महादेवाय० दक्षिणां० ॥ अथनामपूजा ॥ भवायदेवाय० शर्वायदे० ईशानायदे०
पशुपतयेदेवा० रुद्रायदे० उग्रायदे० भीमायदे० महतेदे० ॥ सद्योजातमितिपंचमंत्रैःपुष्पांजलिं० ॥ अनेनपंचामृताभिषे
कांगपूर्वाराधनेनभगवान्श्रीसांबसदाशिवःप्रीयतां ॥ निर्माल्यंविसृज्यरुद्राध्यायादिनामहाभिषेकंकुर्यात् ॥ स्नानंस० ॥ आचम० ॥
तदस्तु० गृहावै० ॥ देवंपीठोपरिप्रतिष्ठाप्य ॥ ॐतंयुज्ञं० ॥ एतद्वासोमयादत्तंसोत्तरीयंसुशोभितं ॥ गृहाणत्वंमहादेवममसिद्धिप्रदो
भव ॥ भवानीशंकराय० वस्त्रं० आच० ॥ ॐतस्माद्यज्ञात्० ॥ यज्ञोपवीतंसौवर्णंमयादत्तंहिशंकर ॥ गृहाणपरयाभक्त्यासं
तुष्टोभवसर्वदा ॥ यज्ञोप० आचमनीयं ॥ ॐतस्माद्यज्ञात्सर्वहुतऋचः० ॥ अर्चयामिजगन्नाथसुरासुरनमस्कृत ॥ त्रिनेत्रदे
वदेवेशत्रयीमयनमोस्तुते ॥ ॐनमःसोभ्यायचप्रतिसर्यायच ॥ भवानीशंकराय० चंदनं० ॥ अक्षतान्धवलाञ्छुभ्रान्कर्पूरागरुमि
श्रितान् ॥ गृहाणपरयाभक्त्यामयातुभ्यंसमर्पितान् ॥ ॐनमःप्रतरणायचो० ॥ भवानीशंकरायअक्षतान्० ॥ ॐहिरण्यरूपःसहि० ॥
गृहाणनानाभरणानिशंभोमहेशजांबूनदनिर्मितानि ॥ ललाटकंठोत्तमकर्णहस्तनितंबहस्तांगुलिभूषणानि ॥ नानाभरणानि० ॥
ॐतस्मादश्वाअजायंत० ॥ कृपयादेवदेवेशतवप्रीत्यर्थमेवच ॥ गृहाणतुभ्यंपुष्पाणिमयानीतानिभोमृड ॥ ॐनमआतार्यायचाला

द्यायच ॥ भवानीशंकराय० पुष्पाणि ॥ अत्रशिवसहस्रनामभिःशिवाष्टोत्तरशतेनवाबिल्वदलार्पणं ॥ त्रिदलंत्रिगुणाकारंत्रिने
त्रंचत्रियायुधं ॥ त्रिजन्मपापसंहारमेकबिल्वंशिवार्पणं ॥ अथांगपूजा ॥ दक्षिणपादेअघोरायनमः ॥ वामपादेपशुपतये० ॥
॥ ३१ ॥ दक्षिणजानौशिवाय० ॥ वामजानौबहुरूपाय० ॥ दक्षिणकट्यांविरूपाक्षाय० ॥ वामकट्यांत्र्यंबकाय० ॥ दक्षिणहस्तेकपर्दि ॥ ३८ ॥
ने० ॥ वामहस्तेभैरवाय० ॥ दक्षिणभुजेशूलपाणये ॥ वामभुजेईशानाय० ॥ मूर्ध्निशिवशक्त्यै० ॥ यामपादेभगवत्यै० ॥
दक्षिणपादेउमायै० ॥ वामजानुनिशांकर्यै० ॥ दक्षिणजानुनिपार्वत्यै० ॥ वामकट्यांकाल्यै० ॥ दक्षिणकट्यांकुमार्यै० ॥ वाम
हस्तेकालिन्यै० ॥ दक्षिणहस्तेकोट्व्यै० ॥ वामभुजेविश्वंभर्यै० ॥ दक्षिणभुजेगंगायै० ॥ मूर्ध्निशिवशक्त्यै० ॥ ॥ अथपंचव
क्रपूजा ॥ सद्योजातमित्यस्यहरोभर्गोनुष्टुप्पूर्ववक्रपूजनेविनियोगः ॥ ॐस॒द्योजा॒तं० ॥ संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्धितेजो
रुणंबालेंदुद्युतिमिश्रितोग्रदशनप्रोद्भासिताम्राधरं ॥ अर्धेंदुद्युतिमौलिपिंगलजटाभास्वत्प्रबद्धोरगंवंदेसिद्धसुरासुरेंद्रनमितंपूर्वमुखं
शूलिनः ॥ सद्योजातायनमःपूर्ववक्रंपूजयामि ॥ वामदेवायेत्यस्यवामदेवोभर्गोनुष्टुप्दक्षिणवक्रपूजनेवि० ॥ ॐवा॒म॒दे॒वाय॒नमो॑० ॥
कालाभ्रभ्रमरांजनद्युतिनिभंव्यावृत्तपिंगेक्षणंगंभीरच्छविमिश्रितोग्रदशनप्रोद्भासिदंष्ट्रांकुरं ॥ सर्पप्रोतकपालशुक्तिशकलैर्व्याकी
र्णमाशेखरंवंदेदक्षिणमीश्वरस्यकुटिलभ्रूभंगरौद्रंमुखं ॥ वामदेवायनमःदक्षिणवक्रंपूजयामि ॥ अघोरेत्यस्याघोरोभर्गोनुष्टुप्पश्चिम ॥ ३१ ॥
वक्रपूजनेवि० ॥ ॐअ॒घोरे॑भ्यो० ॥ प्रालेयामलबिंदुकुंदधवलंगोक्षीरफेनप्रभंभस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनं ॥ ब्रह्मे
न्द्रादिमरुद्गणैःस्तुतिपरैरभ्यर्चितंभोगिभिर्वंदेहंसकलंकलंकरहितंस्थाणोर्मुखंपश्चिमं ॥ अघोराय० पश्चिमवक्रं० ॥ तत्पुरुषायेत्य

स्यपुरुषआपोगायत्री ॥ उत्तरवक्त्रपू० ॥ ॐ तत्पुरुषाय० ॥ गौरंकुंकुमपिंजरंसुतिलकंचापाडुगंडस्थलंभ्रूविक्षेपकटाक्षवीक्षणलसत्सं
सक्तकर्णोत्पलं ॥ स्निग्धंबिंबफलाधरंप्रहसितंनीलालकालंकृतंवंदेपूर्णशशांकमंडलनिभंवक्त्रंहरस्योत्तरं ॥ तत्पुरुषाय० उत्तरवक्त्रं
पू० ॥ ईशानइत्यस्यईशानोभुरिगनुष्टुप् ॥ ऊर्ध्ववक्त्रपूजनेवि० ॥ ॐ ईशानःसर्व० ॥ व्यक्ताव्यक्तगुणोत्तरंचवरदंषट्त्रिंशतत्त्वाधिकं
तस्मादुज्ज्वलतत्त्वमक्षरमदोध्येयंसदायोगिभिः ॥ वंदेतामसवर्जितेनमनसासूक्ष्मातिसूक्ष्मंपरंशांतंपंचममीश्वरस्यवदनंसंशोभितेजो
मयं ॥ ईशानाय० ऊर्ध्ववक्त्रं० ॥ कद्रुद्रायेत्यस्यघोरःकण्वोरुद्रोगायत्री ॥ पातालवक्त्रपू० ॥ ॐ कद्रुद्राय० ॥ यद्देवासुरपूजितारुणनि
भैःसामर्त्यतारागणैःपुंनागांबुजनागपुष्पबकुलस्रग्भिःसुरैरर्चितं ॥ नित्यंध्यानसहस्रदीप्तिकरणंकालाग्निरुद्रोपमंतत्संहारकरंन
मामिसततंपातालषष्ठंमुखं ॥ कालाग्निरु० पातालवक्त्रंपू० ॥ ॥ अथावरणपूजा ॥ पूर्वभागेनिवृत्त्यै० दक्षिणेप्रतिष्ठायै० पश्चि
मेविद्यायै० उत्तरेशांत्यै० मध्येशांतिदायै० ॥ दयाब्धेत्राहिसंसारसर्पान्मांशरणागतं ॥ भक्त्यानिवेदयेत्वाहंसगर्भावरणार्चनं ॥
गर्भाद्यावरणसहितायश्रीसांबसदाशिवायकर्पूरगौरायनमःगर्भावरणपुष्पांजलिंस० ॥ पूर्वेनंदिनेन० आग्नेय्यांकालाय० दक्षि
णेवराहाय० नैर्ऋत्यांवृषभाय० पश्चिमेभृंगिरिटिने० वायव्यांस्कंदाय० उत्तरस्यांउमायै० ईशान्यांचंडीश्वराय० ॥ दयाब्धेत्रा
हिसंसारसर्पान्मांशरणागतं ॥ भक्त्यानिवेदयेत्वाहंप्रथमावरणार्चनं ॥ नंदाद्यावरणसहितायश्रीसांबसदाशिवायकर्पूरगौराय
प्रथमावरणपुष्पांजलिं० ॥ विदेशाय० सूक्ष्मेशाय० वित्तेशाय० एकरुद्राय० एकनेत्राय० त्रिमूर्तये० श्रीकंठेशाय० शिखंडिने०
वामायै० ज्येष्ठायै० रुद्रायै० कालायै० कलविकरणायै० बलविकरणायै० बलायै० बलप्रमथनायै० मनोन्मनायै० ॥ दयाब्धे०

द्वितीयावरणार्चनं ॥ विदेशाद्यावरणसहितायश्रीसांबसदाशिवायकर्पूरगौराय० द्वितीयावरणपुष्पां० ॥ अणिमायै० महिमायै० गरिमायै० लघिमायै० प्राप्त्यै० प्राकाम्यायै० ईशितायै० वशितायै० ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० चंडिकायै० असितांगभैरवाय० रुरुभैरवाय० चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपाल भैरवाय० भीषणभैरवाय० संहारभैरवाय० ॥ दयाब्धेत्राहि० भक्त्यानिवेदयेत्वाहंतृ० ॥ अणिमाद्यावरणसहितायश्रीसांबसदा शिवायकर्पूरगौराय० तृतीयावरणपुष्पांजलिं० ॥ भवाय० शर्वाय० रुद्राय० पशुपतये० उग्राय० महते० भीमाय० ईशा नाय० अनंताय० वासुकये० शंखाय० पद्माय० त्र्यंबकाय० कर्कोटकाय० अश्वतराय० धृतराष्ट्राय० पृथवे० हैहयाय० अर्जुनाय० शाकुंतलेयायभरताय० नलाय० रामाय० कुलाचलाय० हिमाचलाय० उदयाचलाय० अस्ताचलाय० हेम कूटाय० मलयाचलाय० विंध्याचलाय० कनकाचलाय० ॥ दयाब्धे० भक्त्यानिवेदयेत्वाहंचतुर्थी० ॥ भवाद्यावरणसहिता य० चतुर्थावरणं० ॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० ब्रह्मणे० अनंताय० इंद्राण्यै० स्वाहायै० यमपत्न्यै० नैर्ऋत्यै० वारुण्यै० वायव्यै० कुबेरप्रियायै० रुद्राण्यै० वज्राय० शक्त्यै० दंडाय० खड्गा य० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० गजाय० मेषाय० महिषाय० शिवायै० मकराय० मृगाय० नराय० वृषभा य० ऐरावताय० पुंडरीकाय० वामनाय० कुमुदाय० अंजनाय० पुष्पदंताय० सार्वभौमाय० सुप्रतीकाय० ॥ दयाब्धे० भ क्त्यानि० पंचमावरणार्चनं ॥ इंद्राद्यावरणसहितायश्रीसांबसदाशिवायकर्पूरगौराय० पंचमावरणपुष्पां० ॥ अथकालचक्रोक्तदेव

ताः ॥ दुर्गायै० गणाधिपतये० क्षेत्रपालाय० तिथिभ्यो० करणेभ्यो० राशिभ्यो० लग्नेभ्यो० मुहूर्तेभ्यो० दिनरात्रिभ्यां० पक्षेभ्यो० मासेभ्यो० ऋतुभ्यो० अयनाभ्यां० वत्सरेभ्यो० मनुभ्यो० जंबुद्वीपाय० प्लक्षद्वीपाय० शाल्मलीद्वीपाय० कुशद्वीपाय० क्रौंचद्वीपाय० पुष्करद्वीपाय० क्षारसागराय० इक्षुसागराय० क्षीरसागराय० उदधये० अतलाय० वितलाय० सुतलाय० तलातलाय० रसातलाय० महातलाय० पातालाय० भूर्लोकाय० भुवर्लोकाय० स्वर्लोकाय० सत्यलोकाय० ध्रुवलोकाय० शतानीकाय० गंगायै० यमुनायै० गोदावर्यै० कृष्णायै० वेण्यै० सरस्वत्यै० रेवायै० सिंधुनद्यै० कावेर्यै० कश्यपाय० अत्रये० भरद्वाजाय० विश्वामित्राय० गोतमाय० जमदग्नये० वसिष्ठाय० पूर्वेऋग्वेदाय० दक्षिणेयजुर्वेदाय० पश्चिमेसामवेदाय० उदीच्यांअथर्वणाय० ईशान्यांइतिहासपुराणेभ्यो० पूर्वेशानयोर्मध्येअष्टदलमंडलेआदित्याय० तद्दक्षिणतःअग्नये० वामतः रुद्राय० आग्नेयचतुष्कोणमंडलेचंद्राय० तद्दक्षिणतःअद्भ्यो० वामतःगौर्यै० दक्षिणेत्रिकोणमंडलेअंगारकाय० तद्दक्षिणतःपृथिव्यै० वामतःस्कंदाय० ईशान्येबाणाकारमंडलेबुधाय० तद्दक्षिणतःविष्णवे० वामतःपुरुषाय० उत्तरेदीर्घचतुरस्रमंडलेबृहस्पतये० तद्दक्षिणे० इंद्राय० वामेब्रह्मणे० पूर्वेपंचकोणमंडलेशुक्राय० तद्दक्षिणेइंद्राण्यै० वामे इंद्राय० प्रतीच्यांधनुराकारमंडलेशनैश्चराय० तद्दक्षिणतःप्रजापतये० वामेयमाय० नैर्ऋत्येशूर्पाकारमंडलेराहवे० तद्दक्षिणतःसर्पेभ्यो० वामेमृत्यवे० वायव्येध्वजाकारमंडलेकेतवे० तद्दक्षि० ब्रह्मणे० वामेचित्रगुप्ताय० ॥ सर्वाभ्यआवरणदेवताभ्योनमःआसनार्थेपुष्पंसमर्पयामीतिपाद्यादिधूपपर्यंतंपूजयेत् ॥ अत्रनानाविधधान्यानि सहस्रमष्टोत्तरशतंत्राबिल्वदलानिचार्पयंति ॥ ॐ यत्पुरुषं० ॥ श्री

खंडखंडनवगुग्गुलसारसर्जनिर्यासनिःसृतरसैरपिभूरिशंभो ॥ नानाविधैःसुरभिगंधवहैर्विमिश्रंमोदावहंप्रथमतोद्यगृहाणधूपं ॥
ॐ नमःकपर्दिनेचव्युप्तकेशायच ॥ भवानीशं० धूपं ॥ ॐब्राह्मणोस्य० ॥ दीपंहिपरमंशंभोघृतप्रज्वालितंमया॥ दत्तंगृहाणदेवेश
ममज्ञानप्रदोभव ॥ ज्योतिर्विशेषमहिमोदयदीप्यमानंबाह्यांतरांधतमसंनयनाभिरामं ॥ निःशेषमंगलमयंघनसारवर्तिदेदीप्यमा
नमुररीकुरुदेवदीपं ॥ ॐ नमआशवेचाजिरायच ॥ श्रीसांब० दीपं० ॥ ॐचंद्रमामनसो० ॥ पायसापूपपक्वान्नंसर्वोपस्करसंयुतं ॥
नैवेद्यंगृह्यतांदेवकृपांकुरुममप्रभो ॥ ॐ नमोबभ्लुशायविव्याधिनेन्नानांपतयेनमः ॥ श्रीसांब० महानैवे० आचम० ॥ गंगोदकं
समानीतंहेमकुंभेननिर्मलं ॥ एलाकर्पूरगंधाढ्यंप्राशनंपरमेश्वर ॥ प्राशनार्थेपा० ॥ करप्रक्षालनार्थायवार्यच्छमुकुरोपमं ॥ मयानिवे
दितंभक्त्याअष्टमूर्तेप्रगृह्यतां ॥ करप्रक्षा० ॥ कुरंगमदकर्पूरचंदनागरुमिश्रितं ॥ करोद्वर्तनकंगृह्यकृपांकुरुममप्रभो ॥ करोद्वर्तनं० ॥
इदंफलं० फलं० ॥ ॐ नमःपर्ण्यायचपर्णशद्यायच॥ मुखवासार्थेतांबूलं० ॥ त्रैलोक्यदीपप्रतिभासमानैर्नानाविधैर्दुर्लभरत्नजातैः ॥
परिष्कृतंहेमनिबद्धपुष्पंगृहाणदेवेशकृपांविधेहि ॥ ॐ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमः ॥ ॐ हिरण्यरूपः० श्रीभवा०
दक्षिणां० ॥ दीपावलीसमायुक्तंभवानीशत्रिलोचन ॥ आर्तिक्यंसंगृहाणेशममज्ञानप्रदोभव ॥ ॐ नमःशीघ्रियायचशीभ्यायच ॥
श्रीभवानी० नीराजनं॥ ॐनाभ्याआसी० ॐ नमःशर्वायच० ॐ नमोस्त्वनंताय० श्रीसांब० नमस्कारः॥ ॐसप्तास्या० यानिकानि
चपापानि० ॥ ॐ नमःसोभ्यायच० श्रीसांबसदा० प्रदक्षिणाः॥ॐ यज्ञेनयज्ञ० ॥ पुष्पांजलिंगृहाणेशमालतीमल्लिकादिभिः॥ तुष्टोम
मेप्सितंदेवप्रयच्छप्रमथाधिप॥ निधनपतये० निधनपतिकाय० ऊर्ध्वाय० ऊर्ध्वलिंगाय० हिरण्याय० हिरण्यलिंगाय० सुवर्णाय०

सुवर्णलिंगाय० दिव्याय० दिव्यलिंगाय० भवाय० भवलिंगाय० शर्वाय० शर्वलिंगाय० आत्मने० आत्मलिंगाय० परमात्मने० परमात्मलिंगाय० उत्तमोयस्यसर्वलिंगं स्थापयतिपाणिमंत्रंपवित्रं० ॥ सद्योजातंप्रपद्यामीतिपंचमंत्रान्पठेत् ॐ राजाधि० साम्राज्यं० पुष्पांजलिं० ॥ प्रथमंतुमहादेवंद्वितीयंचमहेश्वरं ॥ तृतीयंशंकरंप्रोक्तंचतुर्थंवृषभध्वजं ॥ पंचमंशूलपाणिंचषष्ठंकामांगनाशनं ॥ सप्तमंदेवदेवेशंश्रीकंठंचाष्टमंतथा ॥ नवमंचेश्वरंप्रोक्तंदशमंपार्वतीपतिं ॥ रुद्रमेकादशंप्रोक्तंद्वादशंशिवमेवच ॥ द्वादशैता निनामानियःपठेत्सुसमाहितः ॥ गोघ्नश्चैवकृतघ्नश्चब्रह्महागुरुतल्पगः ॥ स्त्रीबालघातकश्चैवसुरापोवृषलीपतिः ॥ मुच्यतेसर्वपापै श्चशिवलोकेमहीयते ॥ अन्यथाशरणं० ॥ उत्तरपूजनमहंकरिष्ये ॥ सर्वोपचारार्थेअक्षतान्० ॥ बाणरावणचंडीशनंदीभृंगीरिटा दयः ॥ सदाशिवप्रसादंचसर्वेगृह्णंतुशांभवाः ॥ अजोहरिहिरण्याख्यबाणासुरगजाननाः ॥ वसिष्ठव्यासवाल्मीकिदुर्वासागस्त्य गौतमाः ॥ सदाशिवप्रसादंचसर्वेगृह्णंतुशांभवाः ॥ षडक्षरमष्टोत्तरशतंजपेत् ॥ रुद्रगायत्रींदशवारंजप्त्वा ॥ ॐ तत्पुरुषाय० पश्चा त्प्रार्थना ॥ अथवृषभपूजनं ॥ ॐ ऋषभंमा० इति ॥ अर्घ्यमंत्राः ॥ ऋणरोगादिदारिद्र्यपापक्षुदपमृत्यवः ॥ अशेषाघप्रणाशायप्रसीदम मशंकर ॥ दुःखशोकाग्निसंतप्तंसंसारभयपीडितं ॥ बहुरोगाकुलंदीनंत्राताात्वंवृषवाहन ॥ सांब० इदमर्घ्यं० ॥ १ ॥ त्रिगुणा त्मत्रिलोकेशब्रह्मविष्णुशिवात्मक ॥ अर्घ्यंचेदंमयादत्तंगृहाणगणनायक ॥ सांब० इद० ॥ २ ॥ त्रयोदश्यांदिवावत्स्येनिराहारो महेश्वर ॥ नक्तंभोक्ष्यामिदेवेशगृहाणार्घ्यंसदाशिव ॥ सांब० इद० ॥ ३ ॥ जगन्मातर्नमस्तुभ्यंनमस्तेलोकपालिनि ॥ व्रतार्घ्यं दीयतेदेविगृहाणपरमेश्वरि ॥ पार्वत्यै० इद० ॥ ४ ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्तेरधिष्ठानमतःपाहिसनात

न ॥ वृषभाय० इद० ॥ ५ ॥ वृषस्यवृषणंस्पृष्ट्वाशृंगयोर्मध्यतःशिवं ॥ विलोक्यसहितदेव्याप्रार्थयेत्पूजितेशिवे ॥ ब्राह्मणपूजां कृत्वादक्षिणांदत्वाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात् ॥ इतिरुद्रयामलेशिवकल्पेशैवागमोक्तानुसारिणीप्रदोषपूजासमाप्ता ॥

॥ ३९ ॥ पिठोरीपूजा ॥ संध्याकालेस्नात्वाआचम्यदेशकालौसंकीर्त्यममेहजन्मनिजन्मांतरेचपुत्रपौत्रादिफलावाप्त्यर्थंपिठोरीव्रतंकरिष्येइतिसंकल्प्यतदंगंगणपतिपूजनंकलशाद्यर्चनंचकृत्वादेवींध्यायेत् ॥ उक्तप्रकारेणसर्वतोभद्रेऽष्टौकलशान्प्रतिष्ठाप्यसप्तकलशेषु क्रमेणहेममयप्रतिमासु ब्राह्म्यादिसप्तमातॄर्नाममंत्रैरावाहयेत् ॥ ब्राह्म्यैनमः ब्राह्मीमावाहयामि ॥ एवंमाहेश्वरीं० कौमारीं० वैष्णवीं० वाराहीं० इंद्राणीं० चामुंडां० इत्यावाह्य॥ ॐ जज्ञानंसप्तमातरो० ब्राह्मीमाहेश्वरी० इतिवापूजयेत्॥ तदुत्तरेसुवर्णादिपात्रयुतकलशेचतुःषष्टियोगिनीःहैमप्रतिमास्वक्षतपुंजेषुवावाहयेत् ॥ दिव्ययोगिन्यैनमः दिव्ययोगिनीमावाहयामि एवंसर्वत्र १ महायोगिनीं सिद्धियोगिनीं गणेश्वरीं प्रेताक्षीं डाकिनीं कालीं कालरात्रिं निशाचरीं ओंकारीं १० रुद्रवेतालीं हींकारीं भूतडांबरीं ऊर्ध्वकेशीं विरूपाक्षीं शुष्कांगीं नरभोजनां भंडारीं वीरभद्रां धूम्राक्षीं २० कलहप्रियां राक्षसीं घोररक्ताक्षीं विरूपां भयंकरीं भासुरीं रौद्रवेतालीं श्रीपर्णीं त्रिपुरांतकां भैरवीं ३० ध्वंसिनीं क्रोधिनीं दुर्मुखीं प्रेतवाहनां कंटकीं त्राटकीं यमदूतीं करालीं खट्वांगीं दीर्घलंबोष्ठीं ४० मालिनीं मंत्रयोगिनीं कालाग्निगृहिणीं चक्रीं कंकालीं भुवनेश्वरीं स्फाराक्षीं कार्मुकीं लौकिकीं काकदृष्टिं ५० भक्षणीं अधोमुखीं प्रेरणीं व्याघ्रीं कंकणीं प्रेतभक्षणीं वीरकौमारिकां चंडां वाराहीं मुंडधारिणीं ६० कामाक्षीं उड्डाणीं जालंधरां महालक्ष्मीं ६४ इत्यावाह्य नमोदेव्यै० इतिमंत्रेणशोडशोपचारैःपूजयेत् ॥ ततः

सुवर्णपात्रेणफलपुष्पयुतमर्घ्यंनाममंत्रेणप्रत्येकंदद्यात् यथाशक्तिवायनंच ॥ नमोस्तुवश्चतुःषष्टिदेवीभ्यःशरणंव्रजे ॥ पुत्रश्रीवृद्धिकामाहंभवत्यःपूजिताःशुभाः ॥ ततोयथाचारंकोतिथिरितिव्रतिनापृथक्त्रिःपृष्टेपूर्वंगणेशस्यपश्चात्स्वस्यचनामकीर्तयतापृष्ठतःस्थितेनपुत्रादिनातद्दत्तंपोलिकादिवायनंग्राह्यं ॥ अनेनयथामिलितोपचारैःपूजनेनब्राह्म्यादिदेवताःप्रीयंतां ॥ ब्राह्मणान्सुवासिनीश्चसंभोज्यपश्चात्स्वयंभुंजीत ॥ इतिपिठोरीव्रतम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥४०॥ हरितालिकापूजा ॥ तिलामलककल्केनस्नात्वादुकूलंपरिधायालंकृतासतीमंडपेपीठादौवालुकामृदादिमयंपार्वत्यासहितंशिवलिंगंनिधायमंगलतूर्यघोषपुरःसरंपूजयेत् ॥ आचमनादिदेशकालकथनांतेममश्रीशिवसहितहरितालिकागौरीप्रीतिद्वारासमस्तपापक्षयपूर्वकंसप्तजन्मराज्याक्षय्यसुखसौभाग्यपुत्रपौत्राभिवृद्धिशिवसायुज्यादिकल्पोक्तफलसिद्ध्यर्थंहरितालिकाव्रतांगभूतंशिवगौरीपूजनंकरिष्ये ॥ गणेशपूजादिसंभारप्रोक्षणांतेमूर्तीनांप्राणप्रतिष्ठांकृत्वापूजामारभेत् ॥ पीतकौशेयवसनांहेमाभांकमलासनां ॥ भक्तानांवरदांनित्यंपार्वतींचिंतयाम्यहं ॥ मंदारमालाकुलितालकायैकपालमालांकितशेखराय ॥ दिव्यांबरायैचदिगंबरायनमःशिवायैचनमःशिवाय ॥ श्रीशिवसहितहरितालिकादेवतायैनमः ध्यानं ॥ देविदेविसमागच्छशिवेनसहितासती ॥ इमांमयाकृतांपूजांगृहाणसुरसत्तमे ॥ आवाहनं ॥ भवानित्वंमहादेविशंकरार्धशरीरिणि ॥ अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां ॥ आसनं ॥ सुचारुशीतलंवारिनानागंधसुवासितं ॥ पाद्यंगृहाणदेवेशिस्वपत्यासहपार्वति ॥ पाद्यं ॥ श्रीपार्वतिमहाभागेशंकरप्रियवादिनि ॥ अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रते ॥ अर्घ्यं ॥ गंगाजलंमयानीतंसुवर्णकलशेस्थितं ॥ आचम्यतांमहाभागेरुद्रेणसहितेऽनघे ॥ आच

मनं ॥ प्रभासाद्यानितीर्थानिगंगाद्याश्चसरिद्वराः ॥ प्रार्थ्यानीतंगृहाणेदंस्नानीयांभःशिवप्रिये ॥ स्नानं ॥ पयोदधिघृतंचैवमधु
शर्करयायुतं ॥ पंचामृतंमयादत्तंस्नानार्थंगृह्यतांशिवे ॥ पंचामृतं ॥ पृथक्पंचामृतमंत्राःसामान्यपूजायांद्रष्टव्याः ॥ गंधोदक
मिदंदेविकर्पूरागरुसंयुतं ॥ स्नानार्थंतेप्रयच्छामिगृहाणशिववल्लभे ॥ गंधोदकं ॥ शुद्धोदकं ॥ पूर्वपूजांकृत्वा सुरास्त्वामित्या
दिनाभिषेकांते पीठेमूर्तीःप्रतिष्ठाप्य ॥ सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे ॥ शंकरेणयुतेगौरिवाससीत्वंगृहाणमे ॥ वस्त्रं ॥
महादेवनमस्तेस्तुत्राहिमांभवसागरात् ॥ उपवीतंमयादत्तंधारयस्वजगत्पते ॥ उपवीतं ॥ मुक्तामणिगणाकीर्णनानावर्णविचित्रि
तं ॥ दिव्यंपरमशोभाढ्यंकंचुकंदेविधार्यतां ॥ कंचुकीं ॥ श्रीखंडंचंदनं० ॥ चंदनं ॥ अक्षताश्चसुरश्रेष्ठे० ॥ अक्षतान् ॥ हरि
द्रारंजितादेविसुखसौभाग्यदायिनि ॥ मातस्तुभ्यंप्रयच्छामिहरिद्रांसर्वकामदां ॥ हरिद्रां ॥ कुंकुमंकामदंनित्यंस्त्रीणांभालस्यभू
षणं ॥ धारयस्वमहादेविप्रीत्यातिलकमुत्तमं ॥ कुंकुमं ॥ उदितारुणसंकाशंजपाकुसुमसंनिभं ॥ सीमंतभूषणार्थायसिंदूरंदेवि
गृह्यतां ॥ सिंदूरं ॥ यदंजनंत्रैककुदंनेत्रसौंदर्यसाधनं ॥ चक्षुषोःकज्जलंधेहिदेविस्वर्णशलाकया ॥ कज्जलं ॥ रत्नकंकणकेयूरमु
क्ताहारंसनूपुरं ॥ कुंडलेकंठसूत्रंचगृहाणाभरणंशुभे ॥ अलंकारान् ॥ कंठसूत्रंताडपत्रंहरिद्राकुंकुमांजनं ॥ सिंदूरादिप्रदास्यामि
सौभाग्यंदेहिमेव्यये ॥ तालपत्रं ॥ कस्तूर्याद्याश्रयागंधाभोगार्थंतेमयाहृताः ॥ नानापरिमलद्रव्यंगृहाणशिवसंयुता ॥ परिमल ॥ ३५ ॥
द्रव्यं ॥ माल्यादीनि० पुष्पाणि ॥ अथांगपूजा ॥ उमायैनमः पादौपूजयामि ॥ गौर्यै० जंघे० ॥ पार्वत्यै० जानुनी० ॥
जगद्धात्र्यै० ऊरू० ॥ शिवायै० कटिं० ॥ अपर्णायै० नाभिं० ॥ देव्यै० उदरं० ॥ लोकवंद्यायै० स्तनौ० ॥ काल्यै० कंठं० ॥

दुर्गायै० मुखं० ॥ भवान्यै० नेत्रे० ॥ रुद्राण्यै० कर्णौ० ॥ शर्वाण्यै० ललाटं ॥ अंबिकायै० शिरः० ॥ सर्वेश्वर्यै० सर्वांगंपूजयामि ॥ अथपत्रपूजा ॥ उमायै० बिल्वपत्रं० ॥ गौर्यै० अपामार्ग० ॥ पार्वत्यै० मालती० ॥ दुर्गायै० दूर्वा० ॥ काल्यै० चंपक० ॥ भवान्यै० करवीर० ॥ रुद्राण्यै० बदरी० ॥ शर्वाण्यै० अर्क० ॥ चंडिकायै० तुलसी० ॥ ईश्वर्यै० मुनि० ॥ शिवायै० दाडिमी० ॥ अपर्णायै० धत्तूर० ॥ धात्र्यै० जाती० ॥ मृडान्यै० मरुबक० ॥ गिरिजायै० बकुल० ॥ अंबिकायै० अशोक० ॥ अथ नामपूजा ॥ उमायै० गौर्यै० पार्वत्यै० जगद्धात्र्यै० जगत्प्रतिष्ठायै० शांतिरूपिण्यै० ॥ हराय० महेश्वराय० शंभवे० शूलपाणये० पिनाकधृषे० शिवाय० पशुपतये० महादेवाय० ॥ वनस्पति० धूपं ॥ साज्यंचवर्ति० दीपं ॥ शर्कराखंड० नैवेद्यं० ॥ इदं फलं० फलं ॥ पूगीफलंमह० तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ चक्षुर्दसर्व० नीराजनं ॥ नमःशिवायशांतायपंचवक्त्रायशूलिने ॥ नंदिभृंगिमहाकालगणयुक्तायशंभवे ॥ शिवायैशिवरूपायैमंगलायैमहेश्वरि ॥ शिवसर्वार्थदेनित्यंशिवरूपेनमोस्तुते ॥ नमोदेव्यैमहा० नमस्कारं ॥ यानिकानिच० प्रदक्षिणां ॥ शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवे ॥ शिवरूपेनमस्तुभ्यंगृहाणकुसुमांजलिं ॥ पुष्पांजलिं० ॥ छत्रचामरादिराजभोगान् ॥ आवाहनंन० ॥ मंत्रहीनं० (क्वचिदर्घ्यं ॥ श्रीपार्वतिमहाभागेशंकरप्रियवादिनि ॥ अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रते ॥ इदमर्घ्यं० ॥) नमस्तेसर्वरूपिण्यैजगद्धात्र्यैनमोनमः ॥ संसारभयसंत्रस्तां पाहिमांसिंहवाहिनि ॥ मयाद्ययेनकामेनपूजितासिमहेश्वरि ॥ राज्यसौभाग्यपुत्रादिसंपदंचांबदेहिमे ॥ प्रार्थनां ॥ कृतव्रतस्ययथावत्फलसिद्ध्यर्थंब्राह्मणायवायनप्रदानंक० ॥ ब्राह्मणंसपत्नीकंसंपूज्य ॥ अन्नंसुवर्णपात्रस्थंसवस्त्रफलदक्षिणं ॥ वायनंगौरिवि

प्रायददामिप्रीतयेतव ॥ सौभाग्यारोग्यकामार्थंसर्वसंपत्समृद्धये ॥ गौरीगिरीशतुष्ट्यर्थंवायनंतेददाम्यहम् ॥ इतिमंत्राभ्यांस्वर्णादि
पात्रस्थंवस्त्रान्नफलस्वर्णहरिद्रादियुतंसोपस्करंवायनंतस्मैदत्वा कथांचश्रुत्वाब्राह्मणेभ्योबह्वन्नंगोवस्त्रहिरण्यानिस्त्रीभ्योहरिद्रावस्त्र
कंचुकभूषणादिदत्त्वोपोषितासतीरात्रौजागरणंदेव्यानीराजनंकृत्वा प्रातर्देवंविसृज्यपारणंकुर्यात् ॥ इति हरितालिकापूजा ॥

॥ ४१ ॥ गणेशचतुर्थीपूजा ॥ चतुर्थ्यांप्रातःशुक्लतिलैःस्नात्वाकृतनित्यक्रियःकर्तामध्याह्नेकदलीस्तंभतोरणस्रक्पल्लवरंग
वल्ल्यादिशोभितंपूर्णकुंभादिमंगलोद्भासितंदेवगृहमेत्य सौवर्णींराजतींताम्रीमशक्तौमृन्मयींवोक्तलक्षणांगणेशमूर्तिंसंपाद्यकृता
ग्न्युत्तारणांतांपीठेनिधायपूजयेत् ॥ आचमनादिदेशकालकथनांते ममश्रीसिद्धिविनायकप्रीतिद्वारासकलपापक्षयपूर्वकंसर्वकर्म
निर्विघ्नत्वपुत्रपौत्राद्यभिवृद्धिमहैश्वर्यविद्याविजयसंपदादिकल्पोक्तफलसिद्ध्यर्थंश्रीसिद्धिविनायकपूजनंकरिष्ये ॥ आसनविधिं
शरीरशुद्ध्यर्थंभूशुद्ध्यादिन्यासान्कलशाद्यर्चनंकरिष्ये ॥ भूशुद्ध्यादिभिःपुरुषसूक्तादिन्यासैश्चात्मानंपावयित्वा ॥ अस्यश्रीहेरंब
मंत्रस्य हेरंबऋषिः विनायकोदेवता त्रिष्टुप्छंदः गंबीजं ॐशक्तिः अभीष्टकामनासिद्ध्यर्थेन्यासेविनियोगः ॥ ॐनमोहेरंबायअं
गुष्ठाभ्यांनमःहृदयायनमः ॥ मदमोदिततर्जनीभ्यांनमःशिरसेस्वाहा ॥ ममसंकष्टंमध्यमाभ्यांनमःशिखायैवषट् ॥ वारय अना
मिकाभ्यांनमःकवचायहुं ॥ निवारयकनिष्ठिकाभ्यांनमःनेत्रत्रयायवौषट् ॥ हुंफट्स्वाहाकरतलकरपृष्ठाभ्यांनमःअस्त्रायफट्
इतिदिग्बंधः ॥ ततःकलशशंखघंटादीपान्संपूज्यद्वारपूजांकुर्यात् ॥ पुष्पाक्षतान्गृहीत्वा ॥ ॐपूर्वद्वारेश्रियैनमः ॥ गौर्यैनमः ॥
गौरीपतयेनमः ॥ दक्षिणद्वारेश्रियैनमः ॥ देव्यैनमः ॥ देवीपतयेनमः ॥ पश्चिमद्वारेश्रियैनमः ॥ रत्यैनमः ॥ रतिपतयेनमः ॥

उत्तरद्वारे मह्यैनमः महीपतये० इतिद्वारपूजा ॥ ततःपीठपूजा ॥ पूर्वादिक्रमेण ॥ ॐ इद्रंवोविश्वतस्परिऋक् ॥ इन्द्रमावाहयामि ॥ ॐ अग्निंदूतंवृणीमहे० ॥ अग्निमा० ॥ ॐ यमायसोमं० ॥ यममावा० ॥ ॐ मोषुणःपरापरा० निर्ऋतिं० ॥ ॐ तत्त्वायामिब्र० ॥ वरुणं० ॥ ॐ तववायवृतस्पते० ॥ वायुमावा० ॥ ॐ सोमोधेनुं० ॥ सोममावा० ॥ ॐ तमीशानं० ॥ ईश्वरं० ॥ मध्येगणपतिमावाहयामि ॥ प्राच्यांवज्रायनमः दक्षिणस्यांदंडाय० पश्चिमस्यांखड्गाय० उत्तरस्यांपाशायनमः ॥ प्राच्यांध्वजाय० दक्षिणस्यांचक्राय० पश्चिमस्यांपद्माय० उत्तरस्यांअंकुशाय० ॥ दलाद्बहिः पूर्वादिदिक्षुक्रमेण आवाहयेत् ॥ धर्मायनमः ज्ञानाय० वैराग्याय० ऐश्वर्याय० अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० ॥ ततोदलेषु ॥ अनंतमावाह० पद्मं० सूर्यं० वह्निं० सत्वात्मानं० रजआत्मानं० तमसात्मानं० मध्येसर्वशक्तिपीठात्मने० ॥ ततःकेसरेषु० ॥ तीव्रां० ज्वालिनीं० नंदां० भोगदां० उग्रां० तेजोवतीं० सहां० मध्येविघ्ननाशिनीं० ॥ ततः आधारशक्तये० मूलप्रकृतये० कूर्माय० अनंताय० पृथिव्यै० कंदाय० नालाय० पत्रेभ्यो० दलेभ्यो० बीजेभ्यो० अष्टदलकमलाय० केसरेभ्यो० सर्वशक्तिसहितायस्वर्णकमलाय नमः ॥ इतिपीठपूजा ॥ अथप्राणप्रतिष्ठा ॥ अस्यांमूर्तौदेवत्वसंनिधानेनपूजार्हतासिद्ध्यर्थंप्राणप्रतिष्ठांकरिष्ये ॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिछंदांसि पराप्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः क्रोंकीलकं ॥ अस्यांमूर्तौप्राणप्रतिष्ठापने० ॥ देवस्यहृदिकरंदत्वाजपेत् ॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहं हंसःसोहं ॥ देवस्यप्राणाइहप्राणाः ॥ ॐ आंह्रीं० सोहं ॥ देवस्यजीवइहस्थितः ॥ ॐ आंह्रीं० सोहं ॥ देवस्यसर्वेंद्रियाणि ॥ ॐ आंह्रीं० सोहं ॥ देवस्यवाङ्मनश्चक्षुःश्रोत्रघ्रा

णप्राणाइहागत्यसुखंसुचिरंतिष्ठंतुस्वाहा॥ इमंमंत्रंत्रिःसकृद्वाजपेत् ॥ ॐ असुनीतेपुन॰ ॥ ॐ चत्वारिवाक्॰ ॥ रक्तांभोधिस्थ॰ ॥
देवस्यगर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थपंचदशप्रणवावृत्तीःक॰ ॥ ॐ १५ ॥ ॐ अंजंतित्वामध्वरेदेवयंतोवनस्पतेमधुनादै
व्येन ॥ यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याउपस्थे॥ इति स्वर्णादिशलाकया देवस्यनेत्रेअभ्यज्योपहारंनिवेदयेत् ॥ एवं
विस्तरासंभवेप्रतिमायाःकपोलौस्पृशन् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यैदेवत्वमर्चायैमामहेतिचकश्चन ॥ इतिप
रिभाषोक्तंश्लोकंपठेत् ॥ एकदंतंशूर्पकर्णगजवक्रंचतुर्भुजं ॥ पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकं ॥ (यद्वा–ध्यायेद्गजाननं
देवंपद्मकांचनसंनिभं ॥ चतुर्भुजंमहाकायंसर्वाभरणभूषितं ॥ दंताक्षमालापरशुपूर्णमोदकधारिणं ॥ मोदकासक्तशुंडाग्रमेकदं
तंविनायकं ॥) ध्यानं ॥ ॐ सहस्रशीर्षा॰ ॥ आवाहयामिविघ्नेशसुरराजार्चितेश्वर ॥ अनाथनाथसर्वज्ञपूजार्थगणनायक ॥ आ
वाहनं॥ ॐ पुरुषएवेदं॰ ॥ विचित्ररत्नरचितंदिव्यास्तरणसंयुतं॥ स्वर्णसिंहासनंचारुगृहाणसुरपूजित॥ आसनं॥ ॐ एतावानस्य॰॥
सर्वतीर्थसमुद्भूतंपाद्यंगंधादिभिर्युतं ॥ विघ्नराजगृहाणेदंभगवन्भक्तवत्सल ॥ पाद्यं ॥ ॐ त्रिपादूर्ध्व॰ ॥ अर्घ्यंचफलसंयुक्तंगंधपु
ष्पाक्षतैर्युतं ॥ गणाध्यक्षनमस्तेस्तुगृहाणकरुणानिधे॥ अर्घ्यं ॥ ॐ तस्माद्विराळ॰ ॥ विनायकनमस्तुभ्यंत्रिदशैरभिवंदित ॥ गंगो
दकेनदेवेशशीघ्रमाचमनंकुरु ॥ आचमनं ॥ ॐ यत्पुरुषेण॰ ॥ गंगासरस्वतीरेवापयोष्णीयमुनाजलैः॥ स्नापितोसिमयादेवतथा ॥ ३७ ॥
शांतिंकुरुष्वमे ॥ मलापकर्षस्नानं ॥ ॐ दधिक्राव्णो॰ ॥ दध्याज्यमधुसंयुक्तंमधुपर्कमयाहृतं ॥ गृहाणसर्वलोकेशगणनाथनमो
स्तुते ॥ मधुपर्कं ॥ ॐ आप्यायस्व॰ ॥ कामधेनु॰ ॥ पयःस्नानं॥ ॐ दधिक्राव्णो॰ ॥ चंद्रमंडल॰ दधि॰ ॥ ॐ घृतंमिमिक्षे॰ ॥

आज्यंसुराणा० ॥ घृत० ॥ ॐ मधुवाता० ॥ सर्वौषधि० ॥ मधु० ॥ ॐ स्वादुःपवस्व० ॥ इक्षुदंड० ॥ शकरास्ना० ॥ सुगंधिद्र
व्यसंमिश्रंतैलंसहहरिद्रया ॥ दिव्यंसुरभिपुष्पोत्थंगृहाणोद्वर्तनंविभो ॥ अंगोद्वर्तनं ॥ ॐ कनिक्रदज्जनुषं० ॥ नानातीर्थाहृतंयत्ना
त्तोयमुष्णंमयाकृतं ॥ मंगलंगात्रसुखदंस्नानार्थंदेवगृह्यतां ॥ उष्णोदक० ॥ ॐ गंधद्वारांदुरा० ॥ चंदनागरुकर्पूरसुरभिस्वादुशी
तलं ॥ एलोशीरलवंगाढ्यंस्नानार्थंवारिगृह्यतां ॥ गंधोदकस्नानं० ॥ ॐ आपोहिष्ठा० शुद्धोदकस्नानं ॥ आचम० ॥ गंधादि
भिःपूर्वपूजांते वैदिकसूक्तैःसुरास्त्वामित्याद्यैश्चाभिषेकः ॥ ॐ तदस्तु० ॥ ॐ तंयज्ञं० ॥ रक्तवस्त्रयुगंदेवदेवतार्हंसुमंगलं ॥ सर्वप्रदगृ
हाणेदंलंबोदरहरात्मज ॥ सर्वप्रदाय० रक्तवस्त्रद्वयं ॥ आचमनं० ॥ ॐ तस्माद्यज्ञात्सर्व० ॥ राजतंब्रह्मसूत्रंचकांचनस्योत्तरीयकं ॥
विनायकनमस्तेस्तुगृहाणसुरवंदित ॥ यज्ञोपवीतं ॥ नानाविधानिदिव्यानिनानारत्नोज्ज्वलानिच ॥ भूषणानिगृहाणेशपार्वतीप्रि
यनंदन ॥ भूषणानि ॥ ॐ तस्माद्यज्ञा० कस्तूरीसहितंदिव्यंकुंकुमेनविराजितं ॥ विलेपनंसुर० ॥ गणाध्यक्षाय० चंदनं ॥ रक्ता
क्षतांश्चदेवेशगृहाणद्विरदानन ॥ ललाटपटलेचंद्रस्तस्योपर्येवधारय ॥ रक्ताक्षतान् ॥ सिंदूरमरुणाभासंबालार्कसदृशद्युति ॥
वीरालंकरणंदिव्यंगृहाणगणनायक ॥ सिंदूरं ॥ ॐ अहिरिव० ॥ कस्तूर्याद्यैर्विमिश्रंचनानाचूर्णैःसुगंधिभिः ॥ प्रीत्यर्थंतेगृहाणेदंगंध
द्रव्यंगणेश्वर ॥ परिमलद्रव्यं ॥ ॐ तस्मादश्वा० ॥ माल्यादीनि० ॥ विनायकाय० पुष्पाणि ॥ अथांगपूजा ॥ गणेशायनमः
पादौपूजयामि ॥ विघ्नराजाय० जानुनी० ॥ आखुवाहनाय० ऊरू० ॥ हेरंबाय० कटिं० ॥ कामारिसूनवे० नाभिं० ॥ लंबोदराय०
उदरं० ॥ गौरीसुताय० हृदयं० ॥ स्थूलकंठाय० कंठं० ॥ स्कंदाग्रजाय० स्कंधौ० ॥ पाशहस्ताय० हस्तौ० ॥ गजवक्राय० वक्रं० ॥

विघ्नहर्त्रे० नेत्रे०॥ सर्वेश्वराय० शिरः०॥ गणाधिपाय० सर्वांगंपू०॥ अथनामपूजा ॥ विघ्नराजाय० गजाननाय० लंबोदराय०
शिवात्मजाय० वक्रतुंडाय० शूर्पकर्णाय० गणेश्वराय० विघ्ननाशिने० विकटाय० वामनाय० सर्वदेवाय० सर्वदुःखविनाशिने०
विघ्नहर्त्रे० धूम्राय० सर्वदेवाधिदेवाय० एकदंताय० कृष्णपिंगलाय० भालचंद्राय० गणनाथाय० शंकरसूनवे० अनंगपूजि
तायनमः ॥ अथावरणपूजा ॥ गणनाथाय० हेरंबाय० इभवक्राय० मूषकवाहनाय० शिवप्रियाय० उमापुत्राय ॥ दयाब्धे
त्राहिसंसारसर्पान्मांशरणागतं ॥ भक्त्यासमर्पयेत्वाहंप्रथमावरणार्चनं ॥ प्रथमावरणपूजांसम० १ ॥ वरगणपतये० सुरगण०
चंडगण० इभवक्रगण० क्षिप्रगण० प्रसादगण० लंबोदरगण०॥ द्वितीयावरणं २॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरु
णाय० वायवे० कुबेराय० ईशानाय०॥ तृतीयावरणं ३ ॥ विनायकाय० द्वैमातुराय० विघ्नराजाय० गणाधिपाय० हेरंबाय०
एकदंताय० लंबोदराय० ॥ चतुर्थावरणं ४ ॥ तीक्ष्णदंष्ट्राय० सूतरूपाय० गजास्याय० त्रिनेत्राय० रक्तप्रियाय० बृहदुद
राय० सुरवंद्याय० शिवसुताय० ॥ पंचमावरणं ५ ॥ भद्रकालिने० भैरवाय० शेषाय० वरुणाय० सतांपतये० संवत्सराय०
शांताय०॥ षष्ठावरणं ६॥ सरस्वत्यै० लक्ष्म्यै० भारत्यै० ब्रह्मणे० विष्णवे० रुद्राय० आकाशाय० वेदाय० वास्तुपुरुषाय०॥
सप्तमावरणं ७ ॥ ॥ अथपत्रपूजा ॥ सुमुखाय० मालतीपत्रं ॥ गणाधिपाय० भृंगराज० ॥ उमापुत्राय० बिल्व० ॥ गजानना
य० श्वेतदूर्वा० ॥ लंबोदराय० बदरी० ॥ हरसूनवे० धत्तूर० ॥ गजकर्णाय० तुलसी० ॥ गुहाग्रजाय० अपामार्ग० ॥ व
क्रतुंडाय० शमी० ॥ एकदंताय० केतकी०॥ विकटाय० करवीर०॥ विनायकाय० अश्मंतक०॥ कपिलाय० अर्क०॥ भिन्न

दंताय० अर्जुन० ॥ पत्नीयुताय० विष्णुक्रांत० ॥ बटवे० दाडिमी० ॥ सुरेशाय० देवदारु० ॥ भालचंद्राय० मरुबक० ॥ हेरंबाय० सिंदुवार० ॥ शूर्पकर्णाय० जाती० ॥ सर्वेश्वराय० अगस्तिपत्रं० २१ ॥ ॥ अथपुष्पपूजा ॥ सुमुखाय० जाती पुष्पं ॥ एकदंताय० शतपुष्पं ॥ कपिलाय० मालती० ॥ गजकर्णाय० चंपक० ॥ लंबोदराय० कल्हार० ॥ भक्तप्रियाय० धत्तूर० ॥ भालचंद्राय० वकुल० ॥ पत्नीयुताय० मंदार० ॥ उमापुत्राय० करवीर० ॥ अघहंत्रे० पारिजात० ॥ द्वैमातुराय० मल्लिका० ॥ गिरिजात्मजाय० कर्णिका० ॥ दीर्घदंताय० कुमुद० ॥ स्थूलकर्णाय० मुनि० ॥ विघ्नेश्वराय० पुंनाग० ॥ गणाधिपाय० जपा० ॥ नागभूषणाय० नागचंपक० ॥ विकटाय० पाटल० ॥ सुरेश्वराय० कुरंटक० ॥ शिवप्रियाय० तगर० ॥ गणाधिपाय० यूथिकापु० २१ ॥ ॐ यत्पुरुषं० ॥ दशांगंगुग्गुलंधूपमुत्तमंगणनायक ॥ गृहाणदेवदेवेशउमासुतनमोस्तुते ॥ उमासुताय० धूपं ॥ ॐ ब्राह्मणोस्य० ॥ दीपंज्ञानप्रदंचारुघृतवर्तिसमन्वितं ॥ गृहाणमंगलंदीपंरुद्रप्रियनमोस्तुते ॥ रुद्रप्रियाय० दीपं ॥ ॐ चंद्रमा० ॥ सफलंसगुडंदेवमोदकंघृतपाचितं ॥ नैवेद्यंसघृतंदत्तंनमस्तेविघ्ननाशिने ॥ विघ्ननाशिने० नैवेद्यं ॥ फलान्यमृततुल्यानिसुस्वादून्यघनाशन ॥ आनीतानिमयाभक्त्यागृहाणेमानिसर्वद ॥ फलं ॥ पूगीफलं तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ ॐ श्रियेजातः० ॥ कर्पूरनिर्मितंरम्यंस्वर्णपात्रेनिवेशितं ॥ नीराजनंगृहाणेदंचंद्रकांतिहरंप्रभो ॥ नीराजनं ॥ ॐ नाभ्याआसी० ॥ नमस्तेविघ्नसंहर्त्रेनमस्तेभीप्सितप्रद ॥ नमस्तेदेवदेवेशगणाधिपनमोस्तुते ॥ नमस्कारं ॥ ॐ सप्तास्यासन्० ॥ विघ्नेश्वरविशालाक्षसर्वकामफलप्रद ॥ प्रदक्षिणीकरोमित्वामभीष्टंदेहिमेसदा ॥ प्रदक्षिणाः ॥ ततएकविंशतिदूर्वांकुरानादाय

वक्ष्यमाणदशनामभिरेकैकंदूर्वायुग्मंसगंधमर्पयेत् ॥ गणाधिपाय० उमापुत्रा० अघनाशना० विनायका० ईशपुत्रा० सर्वसिद्धि
प्रदा० एकदंता० इभवक्रा० मूषकवाहना० कुमारगुरुवे० १० ॥ अवशिष्टमेकदूर्वांकुरंदशनामभिर्दद्यात्॥ ॐ यज्ञेनयज्ञ० ॥
मालतीमल्लिकाजातीपद्ममंदारचंपकैः ॥ भक्त्यार्पितंमयादेवगृहाणकुसुमांजलिं ॥ पुष्पांजलिं ॥ राजोपचारान् ॥ (क्वचिदर्घ्या
णि ॥ गौर्यंकमलसंभूतज्येष्ठस्वामिकुमारक ॥ गृहाणार्घ्यंमयादत्तंगजवक्त्रनमोस्तुते ॥ इदमर्घ्यं० ॥ गणेशायनमस्तुभ्यंसर्वका
मफलप्रद ॥ वांछितंदेहिमेनित्यंगृहाणार्घ्यंनमोस्तुते ॥ इदमर्घ्यं० ॥ व्रतमुद्दिश्यविघ्नेशगंधपुष्पाक्षतैर्युतं ॥ गृहाणार्घ्यंमयादत्तं
सर्वसिद्धिंप्रयच्छमे ॥ इदमर्घ्यं० इति ॥) यन्मयाचरितंदेवव्रतमेतत्सुदुर्लभं ॥ त्वत्प्रसादाद्गणेशत्वंसफलंकुरुसर्वदा ॥ कार्यं
मेसिद्धिमायातुपूजितेत्वयिधातरि ॥ विघ्नानिनाशमायांतुसर्वाणिसुरनायक ॥ मंत्रहीनं० ॥ रूपंदेहि० ॥ प्रार्थनां ॥ ततएक
विंशतिमोदकान्गणेशाग्रेसंस्थाप्यतत्रैकंसनैवेद्यंदेवायनिवेद्यव्रतोपदेष्टारंब्राह्मणंसंपूज्यतस्मैदशमोदकवायनंव्रतपूर्त्यैदद्यात् ॥ तत्र
मंत्रः ॥ विनायकनमस्तुभ्यंसततंमोदकप्रिय ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ दशानांमोदकानांचदक्षिणाफलसंयुतं ॥
विप्रायतवतुष्ट्यर्थंवायनंप्रददाम्यहं ॥ ततःशक्त्याविप्रान्संभोज्यभूयसींदत्वा ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेत्वंगणेश्वर ॥ व्रते
नानेनमेनित्यंयथोक्तफलदोभवेतिप्रतिमांविसृज्य ब्राह्मणायदद्यात् ॥ विनायकस्यप्रतिमांवस्त्रयुग्मसमन्वितां ॥ तुभ्यंसंप्रददेवि
प्रप्रीयतांमेगजाननः ॥ गणेशःप्रतिगृह्णातिगणेशोवैददातिच ॥ गणेशस्तारकोभाभ्यांगणेशायनमोनमः ॥ विनायकगणेशानस
र्वदेवनमस्कृत ॥ पार्वतीप्रियविघ्नेशममविघ्नंविनाशय ॥ स्वर्णपूजातर्पणादि गणेशगायत्र्याकुर्यात् ॥ जपमप्यष्टसहस्रादियथाश

क्तिकुर्यादितिनिर्णयामृते ॥ ततःपूर्वावशिष्टदशमोदकसहितंतैलवर्जमन्नंभुंजीतेति ॥ इदानींशिष्टास्तुब्राह्मणभोजनांतेदेवमविसृज्यस्वेच्छयायथाकुलाचारंवाकतिचिद्दिनानिसंस्थाप्यमंत्रपाठपुराणश्रवणनृत्यगीतादिभिरुत्सवंकृत्वातदंतेदेवंविसृज्यनद्यादौक्षिपंति ॥ तत्र ब्राह्मणान्भोजयेत्पश्चाज्जागरंचविशेषतइतिस्यमंतकोपाख्यानस्थंस्कांदं पूर्वोक्तंगाणेशंचमूलमितिभाति ॥ केचित्तु प्रतिमांविसृज्यगृहएवस्थापयंति ॥ इतिगणेशचतुर्थ्यांसिद्धिविनायकपूजासंपूर्णा ॥ ॥ छ ॥ ॥ छ ॥

॥ ४२ ॥ ऋषिपंचमीपूजा ॥ ॥ मध्याह्नेनद्यादौगत्वाऽपामार्गकाष्ठमन्यद्वाऽनिषिद्धं (आम्रादि) काष्ठमादाय ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इतिवनस्पतिंप्रार्थ्य ॥ मुखदौर्गंध्यनाशायदंतानांचविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ इतिदंतधावनंकृत्वातिलामलककल्केनकेशान्संशोध्यमृत्स्नानपूर्वंस्नात्वा (पुरुषकर्तृकोवैदिकःस्नानविधिर्ब्रह्मकर्मसमुच्चयस्थोत्सर्जनप्रयोगेद्रष्टव्यः ॥ अत्रव्यावहारिकःपौराणउच्यते ॥) आचमनादिदेशकालकीर्तनांतेममात्मनःकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसमस्तपापक्षयद्वाराशरीरशुद्ध्यर्थंऋषिपंचमीव्रतांगत्वेनअपामार्गकाष्ठैर्दंतधावनपूर्वकमष्टोत्तरशतस्नानानिकरिष्ये इतिसंकल्प्य ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ स्नात्वाआचम्य ॥ (सुवासिन्या ॥ हरिद्रेपीतवर्णेत्वंहारिणीजनरंजनी ॥ अतस्त्वांलेपयिष्यामिसौभाग्यंदेहिमेनघे ॥ इतिहरिद्रांविलिप्यस्नात्वाआचम्य ॥ कुंकुमंकांतिदंदिव्यंकामिनीकामसंभवं ॥ ॥ स्नास्येहंकुंकुमेनातःप्रसन्नोभवमेहरे ॥ स्नात्वाआचम्य) ॥ शरीरशुद्ध्यर्थंभस्मगोमयमृत्तिकास्नानानिकरिष्ये ॥ भस्मस्नानं ॥ सर्वरक्षाकरं

भस्मकामाद्यरिविनाशनं ॥ तस्यलेपनमात्रेणसर्वपापैःप्रमुच्यते ॥ स्नात्वाआचम्य ॥ गोमयस्नानं ॥ अग्रमग्रंचरंतीनामोषधीनांव नेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ स्नात्वाआचम्य ॥ मृत्तिकास्नानं ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं ॥ त्वयाहतेनपापेनगच्छामिपरमांगतिं ॥ स्नात्वाआचम्य ॥ अपामार्गकाष्ठेन ॥ मुखदौर्गंध्यनाशायदंतानांचविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ एवं १०८ वारंस्नात्वा ॥ गंगेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधोकावेरिजलेस्मिन्संनिधिंकुरु ॥ इतितुलसीदलेनजलमालोड्य (संभवेमहासंकल्पंकृत्वा) गंगांप्रार्थयेत् ॥ नंदिनीनलिनीसीतामालतीचमलापहा ॥ विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी ॥ भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी ॥ द्वादशैतानिनामानियत्रयत्रजलाशये ॥ स्नानयुक्तःस्मरेन्नित्यंतत्रतत्रवसेद्धिसा ॥ शरीरेजर्जरीभूतेव्याधिग्रस्तेकलेवरे ॥ औषधंजाह्नवीतोयंवैद्योनारायणोहरिः ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥ त्राहिमांकृपयागंगेसर्वपापहराभव ॥ इतिप्रार्थ्यअर्घ्यादिदद्यात् ॥ एहिसूर्यसहस्रांशोतेजोराशेजगत्पते ॥ अनुकंपयमांभक्त्यागृहाणार्घ्यंनमोस्तुते ॥ सूर्यनारायणायेदमर्घ्यं० ॥ भागीरथिनमस्तुभ्यंसर्वपापप्रणाशिनि ॥ भक्त्यातुभ्यंमयादत्तंगृहाणार्घ्यंनमोस्तुते ॥ गंगायैइदमर्घ्यं० ॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः ॥ जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती ॥ अरुंधतीसहितकश्यपादिसप्तर्षिभ्यइदमर्घ्यं० इत्यर्घ्याणिदत्वा ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ वस्त्रंनिष्पीड्य गंधपुष्पाक्षतहरिद्राकुंकुमादिभिर्गंगांतुलसींसूर्यंचनाम्नापूजयेत् ॥ इतिस्नानविधिः ॥ ॥ अथपूजा ॥ ततःशुद्धेवाससीपरिधायनित्यकर्मांतेगृहमागत्याग्निहोत्रशालादौवेदिंकृ

त्वागोमयेनोपलिप्यरंगवल्लीश्वेतपुष्पादिभिरलंकृत्यसंभारान्संभृत्यआचमनादिदेशकालकथनांतेममश्रीकश्यपादिसप्तर्षिप्रीतिद्वारा
ज्ञानतोऽज्ञानतोवारजस्वलावस्थायांमत्कृतभांडवस्त्रादिसंपर्कजनितदोषपरिहारादिकल्पोक्तफलसिद्ध्यर्थमृषिपंचमीव्रतांगत्वेनऋषि
पूजांक० ॥ गणेशपूजादिसंभारप्रोक्षणांते वेद्यांप्रतिमासुऋषीन्पूजयेत् ॥ कश्यपायनमः कश्यपंआवाहयामि अत्रयेन० भरद्वा
जाय० विश्वामित्राय० गौतमाय० जमदग्नये० वसिष्ठाय० अरुंधत्यैनमः अरुंधतीमावाहयामि इत्यृषीनावाह्य ॥ मूर्तिब्रह्मण्य
देवस्यब्रह्मणस्तेजउत्तमं ॥ भानुकोटिप्रतीकाशमृषिवृंदंविचिंतये ॥ ध्यानं ॥ आगच्छंतुमहाभागाश्चतुर्वेदस्वरूपिणः ॥ यावत्पूजा
महंकुर्वेकृपयाभवतामिमां ॥ आवाहनं ॥ कुशासनेपवित्रेऽस्मिंस्तिष्ठंतुमुनिसत्तमाः ॥ अरुंधत्यासमेतास्तेजटामुकुटधारिणः ॥ आ
सनं ॥ नभस्येशुक्लपंचम्यामर्चिताऋषिसत्तमाः ॥ पापंदहंतुमेसर्वंपाद्यंगृह्णंतुशोभनाः ॥ पाद्यं ॥ गंधपुष्पाक्षतोपेतमर्घ्यंगृह्णीतभो
द्विजाः ॥ प्रसादंकुरुतप्रीताःप्रणतस्यसदामम ॥ अर्घ्यं ॥ लोकानांतुष्टिकर्तारोयूयंसर्वेतपोधनाः ॥ नमोवोधमेविज्ञेभ्योगृह्णीता
चमनंत्विदं ॥ आचमनं ॥ मंदाकिनीगौतमीचयमुनाचसरस्वती ॥ नर्मदातुंगभद्राचताभ्यःस्नानंप्रगृह्यतां ॥ स्नानं ॥ पयोदधि
घृतंचैवमधुशर्करयायुतं ॥ पंचामृतंमयादत्तमृषयःप्रतिगृह्यतां ॥ पंचामृतं ॥ गंधोदकं ॥ शुद्धोदकस्नानादिपूर्वपूजांतेमहाभि
षेकः ॥ यूयंसर्वेतपोनिष्ठाब्रह्मज्ञाःसत्यवादिनः ॥ वस्त्राणिप्रतिगृह्णंतुमुक्तिदाःसंतुमेसदा ॥ वस्त्राणि ॥ नानामंत्रैर्मंत्रितंचत्रिवृतं
ब्रह्मसूत्रकं ॥ प्रयच्छामिमुनिश्रेष्ठाःप्रत्येकंगृह्यतामिदं ॥ यज्ञोपवीतं ॥ मलयाचलसं० ॥ चंदनं ॥ रंजिताःकुंकुमौघेनअक्षता
स्तुसुशोभनाः ॥ गृह्णंतुममसंतुष्टाभवंतुमुनिसत्तमाः ॥ अक्षतान् ॥ कंठसूत्रंताडपत्रंहरिद्राकुंकुमांजनं ॥ सिंदूरालक्तकंदास्येसौ

भाग्यद्रव्यमीश्वरि ॥ अरुंधत्यै० सौभाग्यद्रव्यं ॥ कस्तूर्याद्याश्रया० परिमलद्रव्यं ॥ माल्यादीनि० पुष्पाणि ॥ अथपत्रपूजा ॥
कश्यपायनमःतुलसीपत्रं ॥ अत्रये० अगस्ति० ॥ भरद्वाजाय० अपामार्ग० विश्वामित्राय० बिल्व० ॥ गौतमाय० अर्क० ॥
जमदग्नये० दूर्वा० ॥ वसिष्ठाय० शमी० ॥ अरुंधत्यै० धत्तूर० ॥ वनस्पतिरसो० धूपं ॥ साज्यंचवर्ति० दीपं ॥ नानापक्वा
न्नसंयुक्तंरसैःषड्भिः समन्वितं ॥ गृह्णंतुऋषयःसर्वेनैवेद्यंवसुदायकाः ॥ नैवेद्यं ॥ पूगीफलं० तांबूलं ॥ इदंफलं० फलं ॥ हिर
ण्यगर्भ० दक्षिणां ॥ कर्पूरपूरेण० नीराजनं ॥ यानिकानि० प्रदक्षिणां ॥ नमोस्तुसुरवंद्येभ्योदेवर्षिभ्योनमोनमः ॥ सर्वपापहराः
संतुवेदरूपाःसनातनाः ॥ नमस्कारं ॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः ॥ जमदग्निर्वसिष्ठश्चगृह्णंतुकुसुमांजलिं ॥ पुष्पां
जलिं ॥ ततोगंधाक्षतपुष्पफलयुतमर्घ्यंदद्यात् ॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः॥ जमदग्निर्वसिष्ठश्चसप्तैतेऋषयःस्मृताः॥
गृह्णंत्वर्घ्यंमयादत्तंतुष्टाभवंतुमेसदा (केचित्तु प्रत्येकमर्घ्यंददतितत्रार्घ्यमंत्राः ॥ कश्यपःसर्वलोकाद्यःसर्वभूतेषुसंस्थितः ॥ नराणां
पापनाशायऋषिरूपेणतिष्ठति ॥ कश्यपायनमःइदमर्घ्यंस० ॥१॥ अत्रयेचनमस्तुभ्यंसर्वलोकहितैषिणे ॥ शुद्धरूपायसत्यायब्रह्म
णेमिततेजसे ॥ अत्रयेन० इदम० ॥२॥ भरद्वाजनमस्तेस्तुसदाध्यानपरायण ॥ महाजटिलधर्मात्मन्पातकंहरसर्वदा ॥ भरद्वा
जाय० इदमर्घ्यं० ॥३॥ विश्वामित्रनमस्तुभ्यंज्वलद्रूपमहाव्रत ॥ प्रत्यक्षीकृतगायत्रीतपोरूपेणसंस्थितः ॥ विश्वामित्राय०इदमर्घ्यं० ॥ ४१ ॥
॥४॥ गौतमःसर्वलोकानांऋषीणांचमहाप्रियः ॥ श्रौतानांकर्मणांचैवसंप्रदायप्रवर्तकः ॥ गौतमाय० इदमर्घ्यं० ॥५॥ जमदग्नेनमस्तु
भ्यंमहातेजोमितद्युते ॥ लोकेषुधर्मवृद्ध्यर्थंसर्वपापनिकृंतक ॥ जमदग्नयेन० इदमर्घ्यं० ॥६॥ नमस्तुभ्यंवसिष्ठायजटिलायमहा

त्मने ॥ धर्मरूपायसत्यायलोकानांहितकारिणे ॥ वसिष्ठाय० इदमर्घ्यं० ॥७॥ अरुंधतिनमस्तुभ्यंवसिष्ठप्रियकारिणि ॥ पतिव्रता नांसर्वासांधर्मशीलप्रवर्तके ॥ अरुंधत्यैन० इदमर्घ्यं०॥८॥) एतेसप्तर्षयःसर्वेभक्त्यासंपूजितामया ॥ सर्वेपापंव्यपोहंतुज्ञानतोज्ञानतः कृतं ॥ आवाहनंन० प्रार्थना ॥ कृतव्रतस्यसांगतासिद्ध्यर्थवायनप्रदानंकरिष्ये ॥ ब्राह्मणंसंपूज्य ॥ वायनंफलसंयुक्तंसघृतंदक्षिणा युतं ॥ द्विजवर्यायदास्यामिव्रतसंपूर्तिहेतवे ॥ भवंतःप्रतिगृह्णंतुज्योतीरूपास्तपोधनाः ॥ न्यूनातिरिक्तकर्माणिमयायानिकृतानिहि ॥ क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधनाः ॥ विसर्जनं ॥ ततःकथांश्रुत्वाऽकृष्टभूम्युत्पन्नैःशाकैःश्यामाकैर्नीवारैर्वाहारंप्रकल्प्यऋषिध्या नपराभवेत् ॥ इतिऋषिपंचमीपूजासमाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ४३ ॥ मुक्ताभरणसप्तमीपूजा ॥ ॥ भाद्रसप्तम्यांजलाशयेस्नात्वावाससीपरिधायगृहमेत्यमध्याह्नात्पूर्वमाचमनादिदेशकाल कीर्तनांतेममश्रीमदुमामहेश्वरप्रीतिद्वारासमस्तपापक्षयपूर्वकंदीर्घायुरनामयत्वपुत्रपौत्राद्यतुलसुखसौभाग्यसंपदभिवृद्धिशिवलोक प्राप्त्याद्यभीष्टसिद्ध्यर्थंमुक्ताभरणव्रतांगत्वेनपूजांकरिष्ये ॥ गणेशपूजादिकृत्वापीठादौमंडलेउमयासहशिवंविलिख्यतदग्रेसौवर्णं राजतंसूत्रमयंवादोरकंनिधायदेवंपूजयेत् ॥ मंदारमालाकुलितालकायैकपालमालांकितशेखराय ॥ दिव्यांबरायैचदिगंबरायनमः शिवायैचनमःशिवाय ॥ उमामहेश्वरौध्यायामि ॥ देवदेवमहेशानपरमात्मन्जगद्गुरो ॥ प्रतिपादितयासोमपूजयापूजयाम्यहं ॥ उमामहेश्वराभ्यां० आवाहनं ॥ अनेकरत्नखचितंसौवर्णमणिसंयुतं ॥ मुक्ताचितंमहादेवगृहाणासनमुत्तमं ॥ आसनं ॥ पाद्यंगृहा णदेवेशसर्वविद्यापरायण ॥ ध्यानगम्यसतांशंभोसर्वेश्वरनमोस्तुते ॥ पाद्यं ॥ इदमर्घ्यमनर्घ्यत्वममराधीशशंकर ॥ किंकरीभू

तयासोममयादत्तंगृहाणभोः ॥ अर्घ्यं ॥ गंगादिपुण्यतीर्थेभ्यःसमानीतंसुशीतलं ॥ जलमाचमनीयार्थंगृहाणेशोमयासह ॥ आ
चमनं ॥ पुण्यतीर्थाहृतेनेशयत्नाच्छुद्धेनवारिणा ॥ स्नानंकुरुमहादेवशिवयाकांतयासह ॥ स्नानं ॥ मध्वाज्यशर्करामिश्रसुधया
परिकल्पितं ॥ शंकरप्रीतयेतुभ्यंमधुपर्कंनिवेदये ॥ मधुपर्कं ॥ पयोदधिघृतंदेवमधुशर्करयायुतं ॥ पंचामृतं मयादत्तंस्नानार्थं
प्रति० ॥ पंचामृतं ॥ गंधोदकं ॥ पूर्वपूजामहाभिषेकांतेपीठेदेवंप्रतिष्ठाप्य ॥ स्नातस्यतेमहादेवप्रीत्यापापप्रणाशन ॥ वस्त्रयुग्मं
मयादत्तमहतंप्रतिगृह्यतां ॥ वस्त्रं ॥ उपवीतंसोत्तरीयंनानाभूषणभूषितं ॥ गृहाणसोमविमलंमयादत्तमिदंशुभं ॥ उपवीतं ॥ म
लयाचलसंभूतं० चंदनं ॥ अक्षताश्चसुर० अक्षतान् ॥ कंठसूत्रंताडपत्रं० सौभाग्यद्रव्यं ॥ कस्तूर्याद्याश्रया० परिमलद्रव्यं ॥
माल्यादीनि० पुष्पाणि ॥ त्रैलोक्यपावनंतेद्यपरमात्मन्जगद्गुरो ॥ चंदनागुरुकर्पूरधूपंदास्यामिशंकर ॥ धूपं ॥ शुभवर्तियुतंस
र्पिर्लोडितंवह्निनायुतं ॥ दीपमेकमनेकार्कप्रतिमंकलयेत्विमं ॥ दीपं ॥ पायसापूपकृसरंसुधारसगुडौदनं ॥ ददामिषड्संदिव्यं
किंकरीशंकरायते ॥ नैवेद्यं ॥ नारिकेलफलंजंबूद्राक्षानारिंगदाडिमं ॥ कूष्मांडंपुरतोभक्त्याकल्पितंप्रतिगृह्यतां ॥ फलं ॥ पूगी
फलं० तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ कर्पूरपूरे० नीराजनं ॥ यानिकानि० प्रदक्षिणां ॥ महादेवनमस्तुभ्यंप्रीत्यापापप्रणा
शन ॥ अस्माभिस्तुकृतांपूजांसाधुवासाधुगृह्यतां ॥ नमस्कारं ॥ ज्ञानतोऽज्ञानतोवापिभवतोविहितात्रया ॥ संपूरयसपर्यांतांवि
श्वेशसकलस्तुत ॥ पुष्पांजलिं ॥ मंत्रहीनं० प्रार्थनां॥ देवदेवमहादेवसर्वसौभाग्यदायक ॥ गृह्णीयांदोररूपंत्वापुत्रपौत्रप्रवर्धनं ॥
दोरकग्रहणं ॥ सप्तसामोपगीतंत्वांचराचरजगद्गुरो ॥ सूत्रग्रंथिस्थितंहस्तेधारयामिस्थिरोभव ॥ दोरकबंधनं ॥ हरपापानिसर्वा

णितुष्टिंकुरुदयानिधे ॥ प्रसीदत्वमुमाकांतदीर्घायुःपुत्रदोभव ॥ इतिजीर्णदोरकमुत्तार्यसंपूज्यविप्रायदत्वाव्रतसंपूर्त्यैवायनंदद्यात् ॥ उपायनमिदं० ॥ शंकरःप्रतिगृह्णातिशंकरोवैददातिच ॥ शंकरस्तारकोस्माकंशंकरायनमोनमः ॥ इतिमंत्रेणैकादशमंडकान्वेष्टकान्वासघृतान्दत्वास्वयंभुंजीत ॥ इतिमुक्ताभरणसप्तमी ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ४४ ॥ ज्येष्ठागौरीपूजा ॥ ॥ पूजादिनात्पूर्वेद्युर्यथाचारंपटभित्तिलिखितमूर्तिषुहेमादिप्रतिमासुपुस्तकेषुनद्याद्याहृतसिकतासुवाज्येष्ठावाहनादिकृत्वारात्रौगीतादिनाजागरोत्सवःकार्यः ॥ आचम्यदेशकालौनिर्दिश्य ममश्रीज्येष्ठागौरीप्रीतिद्वाराविविधवंध्यात्वदारिद्र्यादिसकलदोषनिरासपूर्वकंपुत्रपौत्राभिवृद्धिस्थिरसौभाग्यमहैश्वर्याद्यभीष्टसिद्ध्यर्थंज्येष्ठादेव्याआवाहनं तदंगत्वेनपूजनंचकरिष्ये ॥ संभारप्रोक्षणांते ॥ एह्येहित्वंमहाभागेसुरासुरनमस्कृते ॥ ज्येष्ठेत्वंसर्वदेवेशिमत्समीपेसदाभव ॥ इतिमंत्रेणावाह्य पूजयेत् ॥ परेद्युर्देशकालौ० ज्येष्ठादेव्याःपूजनंकरिष्ये ॥ त्रिलोचनांशुक्लदंतींबिभ्रतींराजतींतनुं ॥ विरक्तांरक्तनयनांज्येष्ठांवैचिंतयाम्यहं ॥ इतिध्यात्वा ॥ पुत्रदारविवृद्ध्यर्थंलक्ष्म्याश्चैवविवृद्धये ॥ अलक्ष्म्याश्चविनाशायज्येष्ठेत्वामर्चयाम्यहमिति ॥ ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः ॥ शर्वाण्यैतेनमस्तुभ्यंशांकर्यैतेनमोनमइतिमंत्रेणावाहनादिभिःपूजयेत् ॥ यद्वा—श्वेतसिंहासनस्थातुश्वेतवस्त्रैरलंकृता ॥ वरंचपुस्तकंपाशंबिभ्रत्यैतेनमोनमः ॥ आसनं ॥ ज्येष्ठेदेविनमस्तुभ्यंश्रेष्ठेदेविनमोनमः ॥ समुद्रमथनोत्पन्नेगृह्यतांपाद्यमुत्तमं ॥ पाद्यं ॥ श्रीखंडकर्पूरयुतंनानापुष्पैःसुवासितं ॥ गृहाणार्घ्यंमयादत्तंज्येष्ठेदेविनमोनमः ॥ अर्घ्यं॥निर्मलंसलिलंगांगंश्रीज्येष्ठेवरदायिनि ॥ वासितंचसुगंधैस्तुगृहाणाचमनीयकं ॥ आचमनं ॥ नानातीर्थसमानीतंसुगंधिजलमुत्तमं ॥

स्वर्णकुंभेनदेवेशिस्नानार्थंप्रति० स्नानं ॥ पयोदधिघृतंदेविमधुशर्करयायुतं ॥ पंचामृतंमयानीतंस्नानार्थंप्रतिगृ० ॥ पंचामृतं ॥ गंधोदकं ॥ गंधादिपूर्वपूजांतेमहाभिषेकः ॥ श्वेतवस्त्रसमायुक्तंक्षौमंकंचुकसंयुतं ॥ गृह्यतांचसुरश्रेष्ठेज्येष्ठेदेविनमोनमः ॥ वस्त्रं कंचुकंच ॥ मलयाचलसं० चंदनं ॥ अलंकारार्थे अक्षतान् ॥ सौभाग्यद्रव्याणि ॥ केतकीपाटलीजातिमल्लिकाचंपकानिच ॥ पद्मादीनिसुगंधीनिपुष्पाणिप्रतिगृह्यतां ॥ पुष्पाणि ॥ वनस्पति० ॥ धूपं ॥ साज्यंचवर्ति० दीपं ॥ भक्त्यामयाप्रयत्नेनयदन्नं दीयतेतव ॥ तद्गृहाणसुरेशानिज्येष्ठेश्रेष्ठेनमोनमः ॥ पूरिकादिनैवेद्यं ॥ इदंफलं० फलं ॥ पूगीफलं० तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ चंद्रादित्यौ० नीराजनं ॥ यानिकानि० प्रदक्षिणां ॥ ज्येष्ठायैते० ॥ विप्रप्रियेमहामायेसुरासुरसुपूजिते ॥ स्थूलसूक्ष्ममयेदेविज्येष्ठेत्वामर्चयाम्यहं ॥ नमस्कारं ॥ शार्ङ्गबाणाब्जखड्गारिप्रासतोमरमुद्गरैः ॥ अन्यैरप्यायुधैर्युक्तांज्येष्ठेत्वामर्चयाम्यहं ॥ पुष्पांजलिं ॥ ज्येष्ठेश्रेष्ठेतपोनिष्ठेब्रह्मिष्ठेसत्यवादिनि ॥ प्रसीदत्वंमहामायेगृहाणार्घ्यंसरस्वति ॥ विशेषार्घ्यं ॥ त्वंलक्ष्मीस्त्वमुमादेवीत्वंज्येष्ठेसर्वदामरैः ॥ पूजितासिमयादेविवरदाभवमेसदा ॥ प्रार्थनं ॥ ततोविप्रेभ्योऽपूपान्दत्वास्वयंहविष्याशनपूर्वकंब्रह्मचर्यंकुर्यात् ॥ तृतीयदिनेतुज्येष्ठादेव्याविसर्जनंकर्तुंतदंगत्वेनपंचोपचारैःपूजनं ॥ पूजांतेप्रार्थ्य ॥ ज्येष्ठेदेविसमुत्तिष्ठस्वस्थानंगच्छ पूजिता ॥ ममाभीष्टप्रदानार्थंपुनरागमहेतवे ॥ इतिविसृज्यनद्यादौक्षिपेत् ॥ इतिज्येष्ठागौरीपूजा ॥ ॥ ७ ॥

॥ ४५ ॥ अदुःखनवमीपूजा ॥ ॥ व्रतदिनेप्रातर्नद्यादौस्नात्वानित्यविधिंसमाप्यमौनीगृहमेत्याचमनादिदेशकालकथनांते मम श्रीगौरीप्रीतिद्वारानिखिलदुःखोपशमपूर्वकंपुत्रपौत्रचिरजीवनसुखसौभाग्यादिकल्पोक्तफलसिध्यर्थं अदुःखनवमीव्रतांगपूजनंक०

गणेशपूजादिसंभारप्रोक्षणांतेगोमयोपलिप्तेशुद्धेदेशेमंडपिकांविधायरंगद्रव्येणभित्तिमालिप्यधूपयित्वा तत्रस्थापितकलशोपरिपूर्ण पात्रेगौरींपूजयेत् ॥ दिव्यपात्रधरांदेवींविभूतिंचत्रिलोचनां ॥ दुग्धान्नदाननिरतांगौरींत्वांचिंतयाम्यहं ॥ ध्यानं ॥ गौरींदुःखह रांदेवींशिवस्यार्धांगसंगिनीं ॥ सुनीलवस्त्रसंयुक्तांभक्त्यात्वावाहयाम्यहं ॥ आवाहनं ॥ प्रसन्नवदनेमातर्नित्यंदेवर्षिसंस्तुते ॥ मया भावेनतेदत्तमासनंप्रतिगृह्यतां ॥ आसनं ॥ सर्वतीर्थाहृतंशुद्धंसर्वभूतोपजीवनं ॥ मयादत्तंतुपानीयंपाद्यार्थंप्रतिगृह्यतां ॥ पाद्यं ॥ गंगादिपुण्यतीर्थेभ्योमयानीतंसुनिर्मलं ॥ गंधपुष्पाक्षतोपेतंगृहाणार्घ्यंसुरेश्वरि ॥ अर्घ्यं ॥ कर्पूरागुरुसंमिश्रंनिर्मलंशिशिरंजलं ॥ एलोशीरयुतंदेविगृहाणाचमनीयकं ॥ आचमनं ॥ प्रभासाद्यानितीर्थानिगंगाद्याश्चसरिद्वराः ॥ प्रार्थ्यानीतंजलंदेविस्नानार्थंप्रति गृह्यतां ॥ स्नानं ॥ पंचामृतंमहादेविपयोदधिघृतंमधु ॥ शर्करासहितंभक्त्यादत्तंदेविगृहाणमे ॥ पंचामृतंगंधोदकं शुद्धोदकंच॥ पूर्वपूजांतेमहाभिषेकः ॥ सर्वभूषाधिके० ॥ वस्त्रं कंचुकंच ॥ श्रीखंडं० चंदनं ॥ अक्षतान् ॥ सौभाग्यद्रव्यं ॥ भूषणानि ॥ माल्यादीनि० पुष्पाणि ॥ अथांगपूजा ॥ गौर्यैनमः पादौपूजयामि ॥ धात्र्यै० जानुनी० ॥ शिवायै० ऊरू० ॥ भद्रायै० कटी० ॥ उमायै० स्तनौ० ॥ दुर्गायै० कंठं० ॥ काल्यै० बाहू० ॥ अंबिकायै० मुखं० ॥ भवान्यै० नेत्रे० ॥ रुद्राण्यै० शिरः॥ शर्वाण्यै० सर्वांगंपू० ॥ वनस्पति० धूपं ॥ साज्यंच० दीपं ॥ शर्कराखंड० नैवेद्यं० ॥ इदंफलं० फलं ॥ पूगीफलं० तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ चंद्रादित्यौ० नीराजनं ॥ यानिकानि० प्रदक्षिणां ॥ नमोदेव्यै० नमस्कारं ॥ जयंतीमंगला० पुष्पां जलिं ॥ आवाहनंन० प्रार्थनं ॥ ततोविप्रंसंपूज्यतस्मैपक्वान्नफलयुतंवायनं उपायनमिदंतुभ्यमितिदत्त्वाकथांश्रुत्वागौरींध्यायन्नुपव

सेत् ॥ अशक्तौत्वहिंसितकेवलगलितफलाहारं पयःपानं हविष्याशनंवाकुर्यात् ॥ रात्रिंनृत्यगीतादिनानीत्वाप्रातर्नित्यकर्मांतेदे वींसंपूज्यसपत्नीकान्विप्रान्संभोज्य ॥ स्कंदमातर्नमस्तुभ्यंदुःखव्याधिविनाशिनि ॥ उत्तिष्ठयाहिभवनंवरदाभवपार्वति ॥ इति देवींविसृज्याचार्यायदक्षिणांदद्यात् ॥ इतिअदुःखनवमी ॥ ॥ छ ॥ ॥ छ ॥

॥ ४६ ॥ वामनद्वादशीपूजा ॥ ॥ कर्ताप्रातर्नद्यादौगत्वाकरिष्यमाणवामनजयंतीव्रतांगत्वेनसंगमस्नानंकरिष्ये (आयुर्बलं० मुखदौर्गंध्य०) इत्यादि यथाचारंदंतधावनंकृत्वा ॥ संगमस्तीर्थराजोसिसंगमःसरितांपतिः ॥ स्नानार्थंत्वांप्रपन्नोस्मिप्रसादंकुरु संगम ॥ संगमप्रार्थनं ॥ यावैश्रवणसंयुक्ताद्वादशीपरमातिथिः ॥ तस्यांतुसंगमेस्नास्येसर्वपापविमुक्तये ॥ वरोवरेण्योवरदोवरा होधरणीधरः ॥ अपवित्रंपवित्रंमांकरोतुभगवान्हरिः ॥ इतिस्नात्वा ॥ करकंपूरयिष्यामिसरितांसंगमेजलैः ॥ पंचरत्नसमायुक्तं तेनतुष्यतुवामनः ॥ करकपूरणं ॥ पर्जन्योवरुणःसूर्यःसलिलंकेशवःशिवः ॥ त्वष्टायमोवैश्रवणःपापंहरतुमेसदा ॥ शिक्यस्था पनं ॥ अन्नंप्रजापतिर्विष्णुरुद्रेंद्रशशिभास्कराः ॥ अग्निर्वायुर्यमस्त्वष्टापापंहरतुमेसदा ॥ शिक्येदधिभक्तस्थापनं ॥ संभारानादा यमध्याह्नात्परंपूजनं ॥ ॥ आचम्यदेशकालौस्मृत्वाममश्रीवामनप्रीतिद्वारासकलपापक्षयपूर्वकंरूपसौभाग्यमहैश्वर्यसुखसमृद्धिपि त्रर्णविमुक्त्युभयकुलोद्धरणविष्णुसालोक्यादिकल्पोक्तफलसिद्ध्येवामनजयंतीव्रतंकरिष्ये ॥ तदंगत्वेनयथाशक्तिपूजनंचक० ॥ ॥ ४४ ॥ गणेशपूजादिसंभारप्रोक्षणांतेपीठादौकुंभंसंस्थाप्यतदुपरिस्वर्णरजतदारुवंशान्यतमनिर्मितेआढकमितैस्तिलैर्यवैर्गोधूमैर्वापूरितेऽह तवस्त्रकृष्णाजिनवेष्टितेपूर्णपात्रेहैमप्रतिमायांवामनंशक्तितःपार्श्वस्थितदंडकमंडलुछत्रपादुकाक्षमालाद्युपस्करयुतंपूजयेत् ॥ शां

ताकारंभुजग० ॥ अजिनदंडकमंडलुमेखलारुचिरपावनवामनमूर्तये ॥ मितजगत्रितयायजितारयेनिगमवाक्पटवेबटवेनमः ॥
ध्यानं ॥ ॐ सहस्रशीर्षा० ॥ ब्रह्मांडमुदरेयस्यमहद्भूतैरधिष्ठितः ॥ मायावीवामनःश्रीशःसोऽत्रायातुजगत्पतिः ॥ आवाहनं ॥
ॐ पुरुषएवेदं० ॥ सुवर्णमणिसंयुक्तंमयाभक्त्याप्रकल्पितं ॥ सिंहासनमिदंदिव्यंगृह्यतांवामनप्रभो ॥ आसनं ॥ ॐ एतावानस्य० ॥
गंगोदकंसमानीतंसुवर्णकलशेस्थितं ॥ वासितंपुष्पगंधैश्चपाद्यंमेप्रतिगृह्यतां ॥ पाद्यं ॥ ॐ त्रिपादूर्ध्व० ॥ गंधपुष्पफलैर्युक्तंहेमपात्रे
निवेशितं ॥ स्वर्गंगासलिलंपुण्यमर्घ्यंस्वीकुरुकेशव ॥ अर्घ्यं ॥ ॐ तस्माद्विराळ० ॥ कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं ॥ आच
म्यतांजगन्नाथमयादत्तंहिभक्तितः ॥ आचमनं ॥ ॐ यत्पुरुषेण० गंगासरस्वतीरेवापयोष्णीयमुनाजलैः ॥ स्नापितोसितमयादेव
तथाशांतिंकुरुष्वमे ॥ स्नानं ॥ ॐ आप्ययस्वेत्यादिभिः ॥ पंचामृतंमयानीतंपयोदधिघृतंमधु ॥ शर्करांपरयाभक्त्यास्नानार्थंप्रतिगृ
ह्यतां ॥ पंचामृतं ॥ ॐ गंधद्वारां० चारुगंधोदकंशीतंकर्पूरागुरुचंदनैः ॥ एलोशीरादिसंमिश्रंस्नानीयंगृह्यतांहरे ॥ गंधोदकं ॥ गंधादि
पूर्वपूजांतेमहाभिषेकः ॥ ॐ तंयज्ञंबर्हिषि० ॥ नमःकमलकिंजल्कपीतनिर्मलवाससे ॥ महाहवरिपुस्कंधघृष्टचक्रायचक्रिणे ॥ वस्त्रं ॥
ॐ तस्माद्यज्ञा० ॥ दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ॥ उपवीतंसोत्तरीयंगृहाणपुरुषोत्तम ॥ उपवीतं ॥ ॐ तस्माद्यज्ञात्सर्व० ॥ मल
याचलसंभूतं० चंदनं ॥ अक्षतान् ॥ ॐ अहिरिव० ॥ परिमलद्रव्यं ॥ ॐ तस्मादश्वा० माल्यादीनि० पुष्पाणि ॥ अथांगपूजा ॥ वाम
नायनमःपादौपू० ॥ दामोदराय० जंघे० ॥ श्रीपतये० ऊरू० ॥ कामदेवाय० गुह्यं० ॥ जगत्पतये० नाभिं० ॥ विश्वधारिणे०
उदरं० ॥ योगिनाथाय० हृदयं० ॥ श्रीधराय० कंठं ॥ पंकजास्याय० मुखं ॥ सर्वात्मने० शिरः० ॥ ॐ यत्पुरुषं० ॥ वनस्पति०

धूपं० ॥ ॐ ब्राह्मणोस्य० ॥ त्वमेवपृथिवीज्योतिर्वायुराकाशमच्युत ॥ त्वमेवज्योतिषांज्योतिर्दीपोयंप्रतिगृह्यतां ॥ दीपं ॥ ॐ चंद्रमामनसो० अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ भक्त्यानिवेदितंतुभ्यं० नैवेद्यं ॥ इदंफलं० फलं ॥ पूगीफलं० तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ ॐ श्रियेजातः० ॥ नीराजनंसुमंगल्यंकर्पूरोद्भासितंविभो ॥ चंद्रार्कवह्निसदृशंवामनप्रतिगृह्यतां ॥ नीराजनं ॥ ॐनाभ्याआसी० ॥ नमोवामनरूपायनमस्तेस्तुत्रिविक्रम ॥ नमस्तेबलिबंधायवासुदेवनमोस्तुते ॥ नमस्कारं ॥ ॐ सप्तास्यासन्० ॥ यानिकानि० प्रदक्षिणां ॥ ॐ यज्ञेनयज्ञ० ॥ मत्स्यंकूर्मंवराहंचनरसिंहंचवामनं ॥ रामंरामंचकृष्णंचअर्चयामिनमोनमः ॥ पुष्पांजलिं ॥ नमस्तेपद्मनाभायनमस्तेजलशायिने ॥ तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे ॥ विशेषार्घ्यं ॥ जगदादिर्जगद्रूपोह्यनादिर्जगदंतकृत् ॥ जलाशयोजगद्योनिःप्रीयतांमेजनार्दनः ॥ नमोनमस्तेगोविंदभुवनेशत्रिविक्रम ॥ अघौघसंक्षयंकृत्वासर्वकामप्रदोभव ॥ मंत्रहीनं० प्रार्थनं ॥ एवंसंपूज्यगीतादिमंगलैरात्रौजागरित्वा प्रातर्नित्यकर्मांतेदेवंसंपूज्यविसृज्यविप्रंसंपूज्य शिक्यस्थजलकलशयुतंसोपस्करं तंदद्यात् ॥ दानमंत्रः ॥ वामनंसर्वतोभद्रंद्विजायप्रतिपादये ॥ प्रीयतांतेनदेवेशोममनित्यंजनार्दनः ॥ ग्रहणमंत्रः ॥ वामनोबुद्धिदोदाताद्रव्यस्थोवामनःस्वयं ॥ वामनोस्यप्रतिग्राहीवामनायनमोनमः ॥ ततस्त्रीन्विप्रान्पृषदाज्यदध्योदनयुतान्नेनसंभोज्यकर्मसमाप्य स्वयंभुंजीत ॥ अथवा वाचकायप्रतिमावस्त्रादिदत्वावामनप्रीत्यर्थंब्रह्मचारिणंसंभोज्यतस्मैदंडच्छत्रोपानहशिक्यादिदद्यात् ॥ मंत्रस्तु ॥ दध्योदनयुतंशिक्यंवारिधानीयुतंविभो ॥ छत्रोपानहसंयुक्तंब्राह्मणायददाम्यहं ॥ एवंद्वादशवर्षंकृत्वोद्यापनंकुर्यात् ॥ ॥

॥ ४७ ॥ अनंतचतुर्दशीपूजा ॥ ॥ आचमनादिदेशकालौस्मृत्वाममसकुटुंबस्यक्षेमस्थैर्यायुरारोग्याद्यभिवृद्ध्यर्थंगजाश्वलक्ष्मी

प्राप्त्यर्थंसमस्तपापक्षयार्थंधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीमदनंतप्रेरणयाश्रीमदनंतप्रीत्यर्थंमयास्वीकृतस्यचतुर्दशवर्षवि
धेयस्यानंतव्रतस्यमयियथावत्प्रतिष्ठासिद्ध्यर्थंप्रतिवर्षविहितंयथाशक्तियथाज्ञानेनयथामिलितोपचारैः पुरुषसूक्तेनश्रीसूक्तेनपुराणो
क्तमंत्रैः मूलमंत्रेणचषोडशोपचारैरनंतपूजनमहंकरिष्ये ॥ (अथवा ममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्रीमदनंतपूजांकरि
ष्येइतिसंकल्प्य) तदंगत्वेनशरीरशुद्ध्यर्थंभूशुद्ध्यादिपुरुषसूक्तादिन्यासान् कलशार्चनादिचकरिष्ये ॥ पृथ्वित्वयेत्यादि० मनुज्ञां
दातुमर्हसीतिभिरवाज्ञांगृहीत्वावामपादेनभूमिंत्रिस्ताडयेत् ॥ देवाआयांतु यातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेतिभूमौप्रादे
शंकृत्वान्यसेत् ॥ तद्यथा ॥ करपज्जानुकटिषुनाभिहृत्कंठबाहुषु ॥ मुखाक्ष्णोर्मस्तकेचैववामादौपौरुषंन्यसेत् ॥ एवंपुरुषसूक्त
न्यासः ॥ अथश्रीसूक्तन्यासः हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुताऋषयः श्रीरग्निश्चेत्युभेदेवते आ
द्यास्तिस्रोनुष्टुभः चतुर्थीबृहती पंचमीषष्ठ्यौत्रिष्टुभौ ततोष्टावनुष्टुभः अंत्याप्रस्तारपंक्तिः व्यंजनानिबीजानिस्वराःशक्तयःबिंदवः
कीलकं ममअलक्ष्मीपरिहारपूर्वकलक्ष्मीप्राप्त्यर्थेश्रीसूक्तन्यासेविनियोगः ॥ ॐ हिरण्यवर्णां० मूर्ध्नि ॥ ॐ तांमआवह० नेत्रयोः ॥
ॐ अश्वपूर्वां० कर्णयोः ॥ ॐ कांसोस्मितां० नासिकायां ॥ ॐ चंद्रांप्रभासां० मुखे ॥ ॐ आदित्यवर्णे० कंठे ॥ ॐ उपैतुमां० बाह्वोः ॥
ॐ क्षुत्पिपासा० हृदये ॥ ॐ गंधद्वारां० नाभौ ॥ ॐ मनसःकाम० गुह्ये ॥ ॐ कर्दमेन० अपाने ॥ ॐआपःस्रजंतु० ऊर्वोः ॥ ॐआर्द्रां
यःकरिणीं० जान्वोः ॥ ॐ आर्द्रांपुष्करिणीं० जंघयोः ॥ ॐ तांमआवह० पादयोः ॥ ॐयःशुचिःप्र० सर्वांगे ॥ अथांगुलिन्यासः ॥
ॐहिरण्यवर्णायैनमः अंगुष्ठाभ्यांनमः ॥ ॐसुवर्णायै० तर्जनीभ्यां० ॥ ॐरजतस्रजायै० मध्यमाभ्यां० ॥ ॐचंद्रायै० अनामिकाभ्यां० ॥

ॐहिरण्मयायै० कनिष्ठिकाभ्यां० ॐलक्ष्म्यै० करतलकरपृष्ठाभ्यां० ॥ एवंहृदयादि॥ ॐकेशवायनमःशिरसि॥ ॐनारायणाय०
मुखे ॥ ॐमाधवाय० भुजयोः ॥ ॐगोविंदाय० कंठे ॥ ॐविष्णवे० पृष्ठे॥ ॐमधुसूदनाय० कुक्षौ॥ ॐत्रिविक्रमाय० कट्योः॥
ॐवामनाय० जंघयोः॥ ॐश्रीधराय० वामगुल्फे॥ ॐहृषीकेशाय० दक्षिणगुल्फे॥ ॐपद्मनाभाय० वामपादे ॥ ॐदामोदराय०
दक्षिणपादे॥१२ ॐ नमोभगवतेवासुदेवायेतिमूलमंत्रेणषडंगोहृदयादिः॥ ततः ॐ नमोभगवतेवासुदेवायेतिहृदयायनमः॥ ॐ नमो
नारायणायशिरसेस्वाहा॥ ॐ नमोविष्णवेशिखायैवषट्॥ ॐ नमोवामनायकवचायहुम् ॥ ॐ नमःकेशवायनेत्रत्रयायवौषट् ॥ ॐ
नमोनृसिंहायअस्त्रायफट् ॥ ॐ भूर्भुवःस्वरोमितिदिग्बंधः ॥ कलशस्येत्यादिमंत्रैःकलशपूजनं शंखंचंद्रार्कदैवत्यमित्यादिभिः
शंखपूजांचकुर्यात् ॥ आगमार्थंतु० इतिमंत्रेणघंटानादंकुर्यात् ॥ अपवित्रःपवित्रोवा० गायत्र्याआत्मानंपूजाद्रव्याणिचप्रोक्षे
त् ॥ येभ्योमाता० एवापित्रे० ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं ॥ तावत्त्वंप्रीतिभावेनदेवेस्मिन्संनिधोभव ॥ प्राङ्मु
खोदेवममसंमुखोवरदोभव ॥ पूर्वोच्चरितएवंगुणविशेषण० श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीमदनंताराधनांगत्वेनयमुनापूजां
करिष्ये ॥ अथध्यानं ॥ क्षीरोदार्णवसंभूतेइंद्रनीलसमप्रभे ॥ त्रैलोक्यवंदितेदेविविष्णुरूपेनमोस्तुते ॥ श्रीयमुनां ध्यायामि ॥
ॐ हिरण्यवर्णा० ॥ सर्वतीर्थमयेदेवियमज्ज्येष्ठेयशस्विनि ॥ आदित्यदुहितर्मातर्यमुनायैनमोस्तुते ॥ यमुनांआवाहयामि ॥ ॐ ॥ ४६ ॥
तांमआवह० ॥ कृष्णेवेणिनमस्तुभ्यंकृष्णवर्णेसुलक्षणे ॥ सर्वसौभाग्यदेदेवियमुनायैनमोस्तुते ॥ यमुनायै० आसनं० ॥ ॐ
अश्वपू० ॥ वेदपादेनमस्तुभ्यंसर्वलोकहितप्रदे ॥ सर्वपापप्रशमनितुंगायैतेनमोस्तुते ॥ यमुनायै० पाद्यं० ॥ ॐ कांसोस्मितां०॥

कृष्णेकृष्णांगसंभूतेजंतूनांपापहारिणि ॥ नमस्तेसरितांश्रेष्ठेगृहाणार्घ्यंनमोस्तुते ॥ यमुनायै० अर्घ्यं० ॥ ॐ चंद्रांप्रभासां० ॥ आत्मज्योतिर्नमोदेविसर्वानुग्रहकारिणि ॥ स्वधर्मनिरतेदेविगृहाणाचमनीयकं ॥ यमुनायै० आचमनीयं० ॥ ॐ आदित्यवर्णे तपसो० ॥ गंगागोदावरीरेवापयोष्णीचसरिद्वरा ॥ कृष्णाचतुंगभद्राचस्नानार्थंतेनिवेदिताः ॥ यमुनायै० शुद्धोदकस्नानं० ॥ सर्वमंगलकार्यार्थंप्रधानत्वेनचार्चितं ॥ मधुपर्कंगृहाणेमंदेवेशित्वंप्रसीदमे ॥ यमुनायै० मधुपर्कं० ॥ कृष्णपादाब्जसंभूतेगंगेत्रिपथगामिनि ॥ जटाजूटेनमस्तुभ्यंभागीरथ्यैनमोस्तुते ॥ यमुनायै० मलापकर्षस्नानं० ॥ स्नानंपंचामृतंदेविगृहाणसरितोत्तमे ॥ अनाथनाथेसर्वज्ञेसर्वकामप्रदाभव ॥ पंचामृतस्नानं० ॥ सौरभेयीसमुत्पन्नंदेवर्षिपितृतृप्तिदं ॥ स्नानार्थंतेपयोदेविगृहाणसरितोत्तमे ॥ यमुनायै० पयःस्नानं० ॥ चंद्रमंडलसंकाशंसर्वदेवप्रियंदधि ॥ स्नानार्थंसरितांश्रेष्ठेगृहाणत्वंनमोस्तुते ॥ यमुनायै० दधिस्नानं० ॥ सर्पिषाचमहादेविस्नपनंक्रियतेमया ॥ गृहाणशुद्धयादत्तंयमुनायैनमोनमः ॥ यमु० घृतस्नानं० ॥ इदंमधुमयादत्तंतवतुष्ट्यर्थमेवच ॥ गृहाणसरितांनाथेयमुनायैन० ॥ यमुना० मधु० ॥ सितयादेवदेवेशिस्नपनंक्रियतेमया ॥ संगृहाणजगन्नाथेयमुनायैन० ॥ यमुनायै० शर्करा० ॥ आपोहिष्ठेतिशुद्धोदकेनसंस्नाप्य ॥ गंधाक्षतपुष्पाणिसमर्प्यश्रीसूक्तेनमहाभिषेकः ॥ ॐ उपैतुमां० ॥ सिंहासनसमारूढेदेविभक्तजनप्रिये ॥ सर्वलक्षणसंपूर्णेवस्त्रयुग्मंगृहाणमे ॥ यमुनायै० वस्त्रं० ॥ गोदावरिनमस्तुभ्यंसर्वाभीष्टप्रदायिनि ॥ सर्वसौभाग्यदेदेविगृहाणकंचुकींशुभां ॥ यमुना० कंचुकीं० ॥ ॐ क्षुत्पिपासा० ॥ नंदिपादेनमस्तेस्तुशंकरप्रियवल्लभे ॥ कंठसूत्रंसोत्तरीयंगृहाणवरदाभव ॥ यमुना० कंठसूत्रं० ॥ मणिमुक्ताफलैर्हारैर्नूपुरैर्बाहुभूषणैः ॥ मुकुटाद्यैश्च

सर्वेशिभूषयेहंजनप्रिये० ॥ यमु० भूषणानि० ॥ ॐ गंधद्वारां० ॥ चंदनागरुकस्तूरीरोचनंकुंकुमंतथा ॥ कर्पूरादिसमायुक्तंचं
दनंप्रतिगृह्यतां ॥ यमुनायै० चंदनं० ॥ यमुनायैनमस्तुभ्यंसर्वाभीष्टप्रदायिनि ॥ सर्वसौभाग्यदेदेविहरिद्राद्यंगृहाणमे ॥ यमु
नायै० हरिद्रां० ॥ कुंकुमंकांतिदंदिव्यंकामिनीकामसंभवं ॥ कुंकुमेनार्चितेदेवियमुनेप्रतिगृह्यतां ॥ यमु० कुंकुमं० ॥ कालिके
कृष्णवर्णेत्वंसुभगेशक्तितारके ॥ अक्षिभ्यांकज्जलंदत्तंगृहाणपरमेश्वरि ॥ यमु० कज्जलं० ॥ कालरात्रिनमस्तुभ्यंनमस्तुभ्यंमहाबले ॥
ताडपत्रंमयादत्तंगृहाणपरमेश्वरि ॥ यमुनायै० ताडपत्रं० ॥ ॐ अहिरिवभोगैः० ॥ कस्तूर्याद्याश्चयेगंधाभोगार्थंतेमयाहृताः ॥ अने
कगंधसंयुक्ताःप्रीत्यर्थंप्रतिगृह्यतां ॥ यमुनायै० परिमलद्रव्यं ॥ अक्षताःपरमादिव्याःसर्वकामफलप्रदाः ॥ पूजासंरक्षणार्थाय
अक्षतान्प्रददाम्यहं ॥ यमुनायै० अक्षतान्० ॥ ॐ मनसःकाम० ॥ मंदारपारिजाताद्यैरनेकैःकुसुमैःशुभैः ॥ पूजयामिशिवेभ
क्त्यायमुनायैनमोनमः ॥ यमुनायै० पुष्पाणि० ॥ ॥ अथांगपूजा ॥ यमुनायैनमः पादौपूजयामि ॥ चंचलायै० जानुनीपू० ॥
कमलायै० कटिं० ॥ चित्रायै० नाभिंपू० ॥ मन्मथवासिन्यै० स्तनौ० ॥ ललितायै० भुजौ० ॥ रत्नकंठायै० कंठंपू० ॥
मायाशक्त्यै० मुखंपू० ॥ चंद्रशेखरायै० ललाटंपू० ॥ भीमरथ्यै० शिरःपू० ॥ यमुनायै० सर्वांगंपूजयामि ॥ ॥ अथ
नामपूजा ॥ यमुनायै० मायायै० शंकरार्धधारिण्यै० कनककट्यै० उत्पलायै० धात्र्यै० सिंधवे० चूडामण्यै० शांतायै० त्रि
गुणात्मिकायै० महायोगिन्यै० ब्रह्मांडरूपिण्यै० जटिलायै० तपस्विन्यै० गंगायै० नर्मदायै० गौर्यै० भागीरथ्यै० तुंगायै०
भद्रायै० कृष्णायै० वेण्यै० भीमरथ्यै० भवनाशिन्यै० कावेर्यै० सरस्वत्यै० सावित्र्यै० गायत्र्यै० गोदावर्यै० गोमत्यै० गरु

डायै० गिरिजायै० मलापहारिण्यै० श्रीयमुनायै० इतिनामपूजा ॥ ॐकर्दमेन० ॥ दशांगंगुग्गुलंधूपंसुगंधंचमनोहरं ॥ आघ्रे यंसर्वदेवानांयमुनेप्रतिगृह्यतां ॥ यमु० धूपं० ॥ ॐ आपःस्रजंतु० ॥ घृताक्तवर्तिसंयुक्तंमहातेजोमयोज्वलं ॥ गृहाणमंगलं दीपंत्रैलोक्यतिमिरापहं ॥ यमु० दीपं० ॥ ॐ आर्द्रायुः० ॥ सर्वभक्ष्यसमायुक्तंषड्रसैश्चसमन्वितं ॥ नैवेद्यंयमुनेदेविगृह्यतांमे प्रसीदच ॥ यमु० नैवेद्यं० ॥ पानीयंपावनंश्रेष्ठंगंगादिसरितोद्भवं ॥ प्राशनार्थंमयानीतंप्रीत्यर्थंप्रतिगृह्यतां ॥ यमु० नैवेद्यमध्ये पानीयं० उत्तरापोशनं० हस्तप्रक्षालनं० मुखप्रक्षालनं० उत्तराचमनीयं० करोद्वर्तनार्थेचंदनं० ॥ इदंफलमितिमहाफलं० ॥ पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं ॥ कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां ॥ यमुनायै० तांबूलं० ॥ न्यूनातिरिक्तपूजायाःसर्व संपूर्णहेतवे ॥ दक्षिणांकांचनींदेविस्थापयामितवाग्रतः ॥ यमु० दक्षिणां० ॥ ॐ श्रियेजात० ॥ घृतवर्तिप्रदीपाश्चमयादत्ताहिभ क्तितः० ॥ नीराजनंगृहाणेदंयमुनेभक्तवत्सले ॥ यमु० नीराजनं० ॥ ॐ तांमआवह० ॥ सर्वपापहरेदेविसर्वोपद्रवनाशिनि ॥ सरिच्छ्रेष्ठेजगद्वंद्येयमुनायैनमोनमः ॥ यमुनायै० नमस्कारान् ॥ ॐ आर्द्रांपुष्करिणीं० यानिकानिचपापानिजन्मांतरकृता निच ॥ तानितानिविनश्यंतिप्रदक्षिणपदेपदे ॥ यमु० प्रदक्षिणाः ॥ ॐ यःशुचिःप्रयतो० ॥ नानाविधैःसुकुसुमैःपुष्पांजलिमिमं शुभं ॥ गृहाणकृपयादेवियमुनायैनमोस्तुते ॥ यमुनायै० मंत्रपुष्पम् ॥ सुरासुरेंद्रादिकिरीटमौक्तिकप्रभाभिजुष्टंतवपादपंकजं ॥ परात्परंचारुतरंसुमंगलंनमामिभक्त्याममकामसिद्ध्यै ॥ भवपत्निमहादेविइष्टकामप्रदायिनि ॥ अनंतव्रतसिद्धिंमेदेहित्वंयमुनेधु ना ॥ आवाहनंन० यस्यस्मृत्या० मंत्रहीनं० ॥ अनेनकृतपूजनेनयमुनादेवताप्रीयतां ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ अथशेषपूजा

कुर्यात् ॥ तत्रायंक्रमःकारिकोक्तः ॥ आराधितयमुनापश्चिमदेशेशालितंडुलराशौअतोदेवाइतिमंत्रेणपद्ममष्टदलंकृत्वापंचरंगैः सुशोभनंपद्मंरंगवल्ल्यादिनाआयतनंचयथारुचिरंकृत्वापीठपूजांकुर्यात् ॥ अद्येत्यादि० श्रीमदनंताराधनांगत्वेनशेषपूजांकरिष्ये ॥ तत्रादौमंडपादिपूजांकरिष्ये ॥ ॥ सामंडपपूजायथा॥पूर्वद्वारे॥श्रियैनमः नंदायै० सुनंदायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिधये० पद्मनिधये० ॥ दक्षिणद्वारे ॥ द्वारश्रियै० चंडायै० प्रचंडायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिधये० पद्मनिधये० ॥ पश्चिमद्वारे ॥ द्वारश्रियै० बलायै० प्रबलायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिधये० पद्मनिधये० ॥ उत्तरद्वारे ॥ द्वारश्रियै० महाबलायै० प्रबलायै० धात्र्यै० विधात्र्यै० चिच्छक्त्यै० मायाशक्त्यै० शंखनिधये० पद्मनिधये० ॥ अथपीठपूजा ॥ मध्येवास्तुपुरुषायनमः मंडूकाय० कालाग्निरुद्राय० आधारशक्त्यै० कूर्माय० पृथिव्यै० अमृतार्णवाय० श्वेतार्णवाय० द्वीपेभ्यो० कल्पवृक्षेभ्यो० मणिमंदिराय० हेमपीठाय० धर्माय० अधर्माय० ज्ञानाय० अज्ञानाय० वैराग्याय० अवैराग्याय० ऐश्वर्याय० अनैश्वर्याय० सहस्रमणिफणान्वितायानंताय० ॥ सर्वतत्त्वपद्माय० आनंदकंदाय० संविन्नालाय० विकारमयकेसरेभ्यो० प्रकृतिमयपत्रेभ्यो० सूर्यमंडलाय० चंद्रमंडलाय० वह्निमंडलाय० संसत्त्वाय० रंरजसे० तंतमसे० अंआत्मने० पंपरमात्मने० अंअंतरात्मने० ज्ञानात्मने० प्राणात्मने० कालात्मने० विद्यात्मने० ॥ ततःपूर्वादिदिक्षुक्रमेण जयायै० विजयायै० अजितायै० अपराजितायै० नित्यायै० विमलासनायै० दोग्ध्र्यै० अघोरायै० मंगलायै० आधारशक्तिकमलासनाय० इतिपीठदेवताआवाह्यगंधादिभिःपूजयेत् ॥ ततस्तत्राष्टदलेकल

शस्थापनम् ॥ ॐमहीद्यौः० ॐऔषधयःसंवदंते० ॐआकलशेषु० ॐइमंमेगंगे० ॐगंधद्वारां० ॐयाओषधीः० ॐकांडांत्कांडात्० ॐअश्वत्थेवो० ॐयाःफलिनीर्या० ॐसहिरत्नानि० ॐहिरण्यरूपः० ॐयुवासुवासाः० ॐपूर्णादर्वि० ॥ यन्मध्यस्थं डिलामेघाःसरितःसागरास्तथा ॥ ब्रह्मांडकलशंतंतुपूजार्थंस्थापयाम्यहं ॥ इतिकलशस्थापनमंत्रः ॥ ॐतत्त्वायामि० वरुणंपंचोपचारैःपूजयेत् ॥ ततःकलशेदेवताआवाहयेत् ॥ यथा केशवादिचतुर्विंशतिदेवताः मत्स्यादिदशदेवताश्चावाह्य ॥ ततः अनिरुद्धायनमः अनिरुद्धमावाहयामिएवमेवाग्रेपि प्रद्युम्नाय० संकर्षणाय० वासुदेवाय० अष्टवसुभ्यो० एकादशरुद्रेभ्यो० द्वादशादित्येभ्यो० ध्रुवाय० अध्वराय० सोमाय० अद्भ्यो० अनलाय० प्रत्यूषाय० प्रभाताय० शिंशुमाराय० ब्रह्मणे० व्यासाय० दत्तात्रेयाय० विश्वरूपाय० अनंताय० एताःकलशेआवाह्य कलशोपरिस्थापितपूर्णपात्रेवस्त्रंप्रसार्य कुंकुमेनाष्टदलंलिखित्वातत्रपीठदेवतावाहनं कुर्यात् ॥ यथा पीठस्यपूर्वादिदिक्षु गणपतयेनमः दुर्गायै० क्षेत्रपालाय० वास्तोष्पतये० मध्येसप्तमातृभ्यो० ॥ पुनःपूर्वादिषु इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० इत्यावाह्य ॥ ॐनमोभगवतेवासुदेवायेतिमूलमंत्रेणावाहयेत् ॥ यथा अनंतंमोहिनीशक्तिसहितंआवाहयामि० १ वामनंश्रीशक्तिसहितं० २ शौरिणंपद्मिनीशक्तिसहितं० ३ वैकुंठं महाबलशक्तिसहितं० ४ पुरुषोत्तमंअजाशक्तिसहितं० ५ पद्मनाभंमंगलाशक्तिसहितं० ६ हृषीकेशंवरदाशक्तिसहितं० ७ त्रिविक्रमंशुभाशक्तिसहितं० ८ मधुसूदनंभगवतीशक्तिसहितं० ९ अच्युतंअपराजिताशक्तिसहितं० १० अनंतंजयाशक्तिसहितं० ११ गोविंदंविजयाशक्तिसहितं० १२ कृष्णंसुभद्राशक्तिसहितं० १३ अपराजितंसर्वगाशक्तिसहितं० १४ श्रीमदनंतंलक्ष्मीशक्तिसहितं

पूज़ासमु॰ आवाहयामिइत्यावाह्य ॥ अथाष्टदलेकर्णिकामध्ये परमदेवतायै॰ सव्ये सर्वगुरुभ्योनमः ॥ दक्षिणे सर्वदेवताभ्यो॰ ॥ आग्ने अनंतचतु॰
य्यादिचतुष्कोणेषु गरुडाय॰ व्यासाय॰ दुर्गायै॰ सरस्वत्यै॰ ॥ पुनर्याम्यादिषु धर्माधिपतयेयमाय॰ पश्चिमे ज्ञानाधिपतयेवरु
॥ ४९ ॥ णाय॰ उत्तरे वैराग्याधिपतयेसोमाय॰ पूर्वे ऐश्वर्याधिपतयेइंद्राय॰ ॥ पुनःपूर्वे धर्माधिपतयेनिर्ऋतये॰ दक्षिणे ज्ञानाधिपत ॥ ४७ ॥
येदुर्गायै॰ पश्चिमे अवैराग्याधिपतयेकामायन॰ उत्तरे अनैश्वर्याधिपतयेरुद्राय॰ मध्येपरमपुरुषायानंतायनमः ॥ मंमंडूकाय
नमः मंडूकंआवाहयामि ॥ एवंसर्वत्र ॥ कंकालाय॰ कुंकूर्माय॰ आंआधारशक्त्यै॰ पंप्रकृत्यै॰ शिंशिलारूपकमलाय॰ शंशे
षाय॰ पंपृथिव्यै॰ क्षींक्षीरसिंधवे॰ नवरत्नद्वीपाय॰ रत्नोज्वलितमहामंडलाय॰ नवरत्नमयपारिजाताय॰ इतिएकैकोपरि
पूर्वतःमंडलानिसंपूज्य तदधःरत्नवेदिकायैनमः ॥ चतुरस्रस्याग्नेयादिकोणेषु आग्नेये धर्माय॰ नैर्ऋते ज्ञानाय॰ वायव्ये वैरा
ग्याय॰ ऐशाने ऐश्वर्याय॰ ॥ चतुरस्रस्यपूर्वरेखायां अंअधर्माय दक्षिणे अंअज्ञानाय॰ पश्चिमे अंअवैराग्याय॰ उत्तरे अंअ
नैश्वर्याय॰ ॥ ततःकर्णिकामध्येसप्ततिवलयोपेतायसहस्रफणायअनंताय॰ तन्मध्यफणोपरि आंआनंदकंदाय॰ संसंविन्नालाय॰
संसर्वतत्त्वकमलाय॰ पंप्रकृतिपत्रेभ्यो॰ विंविकारमयकेसरेभ्यो॰ पंपंचाशद्वर्णाढ्यायैकर्णिकायै॰ अंअर्कमंडलाय॰ द्वादश
कलाभ्यो॰ उंसोममंडलायषोडशकलाभ्यो॰ वंवह्निमंडलायदशकलाभ्यो॰ संसत्त्वायप्रबोधात्मने॰ रंरजसेप्रकृत्यात्मने॰ तं ॥ ४९ ॥
तमसेसोमात्मने॰ आंआत्मने॰ अंअंतरात्मने॰ पंपरमात्मने॰ ह्रींज्ञानात्मने॰ मांमायातत्त्वाय॰ कांकालतत्त्वाय॰ विंविद्या
तत्त्वाय॰ पंपरतत्त्वाय॰ ॥ ततःपूर्वकेसरेषुपीठशक्तीःपूजयेत् ॥ यथा ॥ विंविमलायै॰ उंउत्कर्षिण्यै॰ ज्ञांज्ञानायै॰ योंयोगायै॰

पंप्रह्वायै० ईंईशानायै० संसरस्वत्यै० कर्णिकायांअनुग्रहायै० ॥ ततःपुष्पाणिगृहीत्वा ॐ नमोभगवतेविष्णवेसर्वभूतात्मनेवासु देवायसर्वात्मनेसंयोगपीठात्मनेश्रीमदनंतायनमइतिपीठेर्पयेत् ॥ ततःअष्टौभैरवानावाहयेत् ॥ असितांगभैरवायनमः रुरुभैर वाय० चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभैरवाय० भीषणभैरवाय० संहारभैरवाय० ॥ ततःपूर्वे विप्रवर्णं श्वेतंसहस्रफणालंकृतंशेषंआवाहयामि ॥ आग्नेय्यां वैश्यवर्णंनीलपंचशतफणालंकृततक्षकंआवाह० ॥ दक्षिणे विप्रवर्णंकुंकुमाभं सहस्रफणालंकृतंअनंतंआवा० ॥ नैर्ऋत्यां क्षत्रियवर्णपीतंसप्तफणायुतंवासुकिंआवा० ॥ पश्चिमे क्षत्रियवर्णपीतंसप्तशतफणालंकृ तंशंखपालंवाआवा० ॥ वायव्यां वैश्यवर्णंनीलंपंचशतफणालंकृतंमहापद्मंआवा० ॥ उत्तरे शूद्रवर्णंश्वेतंत्रिंशत्फणालंकृतंकंबलं आवा० ॥ ईशान्यां शूद्रवर्णंश्वेतंत्रिंशत्फणालंकृतंकर्कोटकंआवा० ॥ इत्थंपीठदेवताआवाह्य ॥ ॐ तदस्तुमित्रावरुणा० गृहावैप्रति ष्ठा० ॥ कृत्वादर्भमयंशेषंमुष्टिमात्रमिदंशुभं ॥ फणासमन्वितानंतशायिनंचचतुर्भुजं ॥ वस्त्रोपरिसप्तफणान्वितंसलक्षणंदर्भमयं शेषंसंस्थाप्यपूजयेत् ॥ तद्यथा ॥ तक्षकंपन्नगाधीशंफणानेकशतोज्वलं ॥ दिव्यांबरधरंदीप्तंरत्नकुंडलमंडितं ॥ नानारत्नपरिक्षि प्तमुकुटद्युतिरंजितं ॥ फणामणिसहस्राढ्यैरसंख्यैःपन्नगोत्तमैः ॥ नागकन्यासहस्रेणसमंतात्परिवारितं ॥ दिव्याभरणदीप्तांगंदि व्यचंदनचर्चितं ॥ कालाग्निमिवदुर्धर्षंतेजसादित्यसन्निभं ॥ ब्रह्मांडाधारभूतंतंयमुनांतर्निवासिनं ॥ फणैःसप्तभिराश्लिष्टंविष्णु स्वापविराजितं ॥ दिव्याभरणदीप्तांगंदिव्यांबरविराजितं ॥ ध्यायाम्येतादृशंशेषंपूजार्थमिहतेनमः ॥ इतिध्यात्वा ॥ ॐ सहस्र शीर्षा० ॥ शेषंसप्तफणायुक्तंकालियंनागनायकं ॥ अनंतशयनार्थंत्वांभक्त्याआवाहयाम्यहं ॥ शेषायनमः आवाहनंस० ॥ ॐ पुरु

षण्वेदं० ॥ नवनागकुलाधीशशेषोद्धारककाश्यप ॥ नानारत्नसमायुक्तमासनंप्रतिगृह्यतां ॥ शेषाय० आसनं० ॥ ॐ एतावा
नस्य० ॥ अनंतप्रियशेषेशजगदाधारविग्रह ॥ पाद्यंगृहाणभक्त्यात्वंकाद्रवेयनमोस्तुते ॥ शेषाय० पाद्यं० ॥ ॐ त्रिपादू० ॥
कश्यपानंदजनकमुनिवंदितहेप्रभो ॥ अर्घ्यंगृहाणत्वंशेषसादरंशंकरप्रिय ॥ शेषाय० अर्घ्यं० ॥ ॐ तस्माद्विराळ० ॥ सहस्रफणिरू
पेणवसुधोद्धारकप्रभो ॥ गृहाणाचमनंदेवपावनंचसुशीतलं ॥ शेषाय० आचमनंस० ॥ ॐ यत्पुरुषेण० ॥ गंगादिपुण्यतीर्थैस्त्वा
मभिषिंचामिभूधर ॥ बलभद्रावतारेशनंदनश्रीपतेःसखे ॥ शेषाय० शुद्धोदकस्नानं० ॥ कुमाररूपिणेतुभ्यंदधिमध्वाज्यसंयुतं ॥
मधुपर्कंप्रदास्यामिसर्पराजनमोस्तुते ॥ शेषाय० मधुपर्कं० ॥ क्षीरंदधिघृतंचैवमधुशर्करयान्वितं ॥ पंचामृतस्नानमिदंस्वीकुरुष्व
दयानिधे ॥ शेषाय० पंचामृतस्नानं० पुरुषसूक्तेनमहाभिषेकः ॥ ॐ तंयज्ञं० ॥ कौशेययुग्मंदेवेशप्रीत्यातवमयार्पितं ॥ पन्नगा
धीशनागेंद्रताक्ष्यशत्रोनमोस्तुते ॥ शेषाय० वस्त्रयुग्मं० ॥ ॐ तस्माद्यज्ञात्सर्व० ॥ सुवर्णनिर्मितंसूत्रंपीतितोरंजितंप्रभो ॥ अनेकर
त्नखचितंसर्पराजार्पयाम्यहं ॥ शेषाय० यज्ञोपवीतं ॥ ॐ तस्माद्यज्ञात्सर्वहुतऋचः० ॥ कर्पूरकस्तूरिककेशराढ्यंगोरोचनंचागरुरक्तचं
दनं ॥ श्रीचंदनाढ्यंशुभदंसुगंधंगृहाणविष्णुप्रियतेमयार्पितं ॥ शेषाय० चंदनं० ॥ काश्मीरपंकलिप्तांश्चशालीयानक्षतान्शुभान् ॥
पातालाधिपतेतुभ्यमर्पयामिगृहाणभो ॥ शेषाय० अक्षतान्० ॥ अनेकरत्नान्वितहेमकुंडलेमाणिक्यसंकाशितकंकणद्वयं ॥ हीरै ॥ ५० ॥
स्तुसंशोभितरत्नमुद्रिकांहैमंकिरीटंफणिराजतेर्पितं ॥ शेषाय० सर्वाभरणानि० ॥ ॐ अहिरिवेतिपरिमलद्रव्यं० ॥ ॐ तस्मादश्वा० ॥
करवीरैर्जातिपुष्पैश्चंपकैर्बकुलैःशुभैः ॥ तवपूजांकरोम्यत्रविष्णुप्रियनमोस्तुते ॥ शेषाय० पुष्पाणि० ॥ अथांगपूजा ॥ सहस्रप

देनमः पादौपूजयामि ॥ गूढगुल्फाय० गुल्फौ० ॥ हेमजंघाय० जंघे० ॥ मंदगतये० जानुनी० ॥ पीतांबरधराय० कटिं० ॥ गंभीरनाभाय० नाभिं० ॥ वाताशनाय० उदरं० ॥ उरगाय० स्तनौ० ॥ कालियाय० भुजौ० ॥ कंबुकंठाय० कंठं० ॥ विषवक्राय० मुखं० ॥ मणिभूषणाय० ललाटं० ॥ सुलक्षणाय० शिरः० ॥ अनंतप्रियाय० सर्वांगंपूजयामि ॥ ततःसप्तफणा उदक्संस्थाःपूजयेत् ॥ शेषायनमः तक्षकाय० वासुकये० कालियाय० बलभद्राय० लक्ष्मणाय० सुब्रह्मणे० अनंतप्रियाय० ॥ अथनामपूजा ॥ उरगाय० पन्नगाय० शंकरभूषणाय० अनंतशिखिने० पातालवासिने० यमुनांतर्वासिने० विषग्रहाय० विषहंत्रे० नागेंद्राय० नागकन्यापरिवृताय० शेषाय० नागलोकाधिपतये० ॥ इतिनामपूजा ॥ ॐ यत्पुरुषं० ॥ वनस्पति० ॥ शेषाय० धूपं० ॥ ॐ ब्राह्मणोस्य० ॥ आज्यंचवर्ति० ॥ शेषाय० दीपं० ॥ ॐ चंद्रमाम० ॥ नैवेद्यंगृ० ॥ शेषाय० नैवेद्यं० ॥ मध्येपानीयं० उत्तरापोशनं० हस्तप्रक्षालनादि० ॥ इदंफलं० महाफलं० ॥ पूगीफलंमहत्० तांबूलं० ॥ हिरण्यगर्भ० दक्षिणां० ॥ ॐ श्रियेजात० ॥ सर्पराजनमस्तुभ्यंतडित्संकाशभूधर ॥ आर्तिक्यंकल्पितंभक्त्यागृहाणहरभूषण ॥ नीराजनं० ॥ ॐ नाभ्याआसी० ॥ अनंतसंसाररुचिःसदाहंकालीयनागाधिपतेसदात्वां ॥ नतोस्मिमत्वाकृपणंहिदीनंरक्षस्वमांशंकरभूषणेश ॥ नमस्कारान् ॥ ॐ सप्तास्यासन्० ॥ यानिकानिच० ॥ प्रदक्षिणाः ॥ ॐ यज्ञेनयज्ञ० ॥ नानाकुसुमसंयुक्तंपुष्पांजलिमिमंप्रभो ॥ कश्यपानंदजनकस्पदिप्रतिगृह्यतां ॥ मंत्रपुष्पं० ॥ अनंतव्रतकल्पोक्तफलंदेहिफणीश्वर ॥ सांगपूजाफलंप्राप्तुंप्रार्थयेभक्तवत्सल ॥ आवाहनं० ॥ यस्यस्मृत्या० मंत्रहीनं० ॥ अनेनयथाशक्तियथाज्ञानेनयथामिलितोपचारैः कृतपूजनेनभगवान्श्रीशेषःप्रीयताम् ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥

अथानंतपूजा० ॥ ॥ तत्रसमीपतःपात्रांतरेपाद्याद्यभिषेकांतकरणप्राशस्त्यात् चतुर्दशग्रंथियुतंकुंकुमाक्तदोरकद्वयमुपकल्प्य अग्न्युत्तारणं कुर्यात् ॥ अग्निःसप्तिमितिअग्निपदरहितंसूक्तंपठित्वातत्सहितंपुनःपठित्वाजलंपातयेत् एवंदोरकशुद्धिंविधायप्राण प्रतिष्ठांकुर्यात् ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिछंदांसि पराप्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः क्रोंकीलकं दोरकयोःश्रीमदनंतप्राणप्रतिष्ठापनेविनियोगः ॥ ॐ आंह्रींक्रों अंयंरंलंवंशंषंसंहंळंक्षंअःक्रोंह्रींआं हंसः सोहं श्रीमदनंतस्यप्राणाइहप्राणाः ॥ ॐ आंह्रीमित्यादिहंसःसोहं श्रीमदनंतस्यजीवइहस्थितः ॥ ॐ आंह्रीमित्यादि श्रीमदनंत स्यसर्वेंद्रियाणि ॥ ॐ आंह्रींक्रोमित्यादि सर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहागत्यसुखंसुचिरंतिष्ठंतुस्वाहा ॐ असुनीते० १ ॥ ॐ चत्वारिवाक्० १ ॥ गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थंपंचदशप्रणवावृत्तीःकरिष्ये ॐ १५ ॥ रक्तांभोधि स्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैःपाशंकोदंडमिक्षूद्भवमथगुणमप्यंकुशंपंचबाणान् ॥ बिभ्राणासृक्कपालंत्रिनयनलसिता पीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः ॥ इतिप्राणप्रतिष्ठा ॥ अथध्यानं ॥ नवाम्रपल्लवाभासंपिंग भ्रूश्मश्रुलोचनं ॥ पीतांबरधरंदेवंसर्वाभरणभूषितं ॥ समुद्रालंकृतंदिव्यंकौस्तुभाद्यैर्विराजितं ॥ शंखचक्रगदापद्मलक्ष्मीगरुड शोभितं ॥ ध्यायाम्येतादृशंभक्तवत्सलंशेषशायिनं ॥ शांताकारं० मेघश्यामं० इतिध्यात्वावाह्यपूजयेत् ॥ ॐ सहस्र शीर्षा० ॥ ॐ हिरण्यवर्णां० ॥ आगच्छानंतदेवेशतेजोराशेजगत्पते ॥ इमांमयाकृतांपूजांगृहाणपुरुषोत्तम ॥ ॐ नमोभगव ॥ ५१ ॥

१ द्वादशार्णोमूलमंत्रोनंतपूजायांप्रशस्यते अतःसर्वोपचारेषुमूलमंत्रोत्रनिर्दिष्टवत्सर्वत्रप्रयोक्तव्यः ॥

तेवासुदेवायश्रीमदनंतायनमःआवाहयामि ॥ अत्रचतुर्दशग्रंथिदेवतावाहनं ॥ तत्रादौपुंदोरके अनघायनमः अनघंआवाह
यामि १ इतिसर्वत्र वामनाय० २ शौरये० ३ वैकुंठाय० ४ पुरुषोत्तमाय० ५ पद्मनाभाय० ६ हृषीकेशाय० ७ माधवाय०
८ मधुसूदनाय० ९ अच्युताय० १० अनंताय० ११ गोविंदाय० १२ कृष्णाय० १३ अपराजिताय० १४ ॥ अथस्त्रीदोरके
मोहिन्यै० १ श्रियै० २ देव्यै० ३ पद्मिन्यै० ४ महाबलायै० ५ अजायै० ६ मंगलायै० ७ वरदायै० ८ भगवत्यै०
९ अपराजितायै० १० जयायै० ११ विजयायै० १२ सुभद्रायै० १३ सर्वगायै० १४ इत्यावाह्य ॥ नमस्तेजगदाधारनमस्ते
नंतमूर्तये ॥ नमस्तेदेवदेवेशपुराणपुरुषायते ॥ इतिनत्वा ॥ आगच्छभगवन्विष्णोस्थानेचात्रस्थिरोभव ॥ यावद्व्रतंसमाप्येत तावत्त्वं
संनिधोभव ॥ क्रियमाणांमयापूजांगृहाणसुरसत्तम ॥ इतिसंप्रार्थ्य ॥ ॐपुरुषएवेदं० ॥ ॐतांमआवह० ॥ नानारत्नसमायुक्तंकार्त
स्वरविभूषितं ॥ आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां ॥ आसनं० ॥ ॐएतावानस्य० ॥ ॐअश्वपूर्वां० ॥ गंगादिसर्वतीर्थेभ्योजल
मानीतमुत्तमं ॥ पाद्यार्थंदेवतेभक्त्यागृहाणपुरुषोत्तम ॥ ॐनमो० श्रीम० पाद्यं० ॥ ॐत्रिपादूर्ध्व० ॥ ॐकांसोस्मितां० ॥ अनंता
नंतदेवेशअनंतफलदायक ॥ नागेशानंतरूपोसिअर्घोयंप्रतिगृह्यतां ॥ ॐनमो० अर्घ्यं० ॥ ॐतस्माद्विराळ० ॥ ॐचंद्रांप्र
भासां० ॥ गंगाजलंसुगंधाद्यैःसंस्कृतंकनकेस्थितं ॥ आचम्यतांहृषीकेशत्रैलोक्यस्याघनाशन ॥ ॐनमो० आचमनीयं० ॥ ॐय
त्पुरुषेण० ॥ ॐआदित्यवर्णे० ॥ गंगाचयमुनाचैवगोदावरीसरस्वती ॥ तापीपयोष्णीरेवाचताभ्यःस्नानंकुरुप्रभो ॥ ॐनमो० मला
पकर्षस्नानं० ॥ ॐ आपोहिष्ठेतितृचेनच ॥ अनंतसर्वकामानामधीशसर्वसौख्यद ॥ मधुपर्कंगृहाणेदंमयादत्तमधोक्षज ॥ मधुवाते

तिऋचः३ ॐनमो० मधुपर्कं० ॥ पयोदधिघृतक्षौद्रशर्कराभिरनुक्रमात् ॥ पृथक्संस्नापयेदेवंमूलमंत्रमनुस्मरन् ॥ ॐआप्याय
स्व० ॥ सुरभेस्तुसमुत्पन्नंदेवर्षिपितृतृप्तिदं ॥ मयादत्तंपयोदेवस्नानार्थंप्रतिगृह्यतां ॥ ॐनमो० श्रीम० पयःस्नानं० ॥ ॐदधि
क्राव्णोअ० ॥ दध्नाचैवमहादेवस्नापनंक्रियतेमया ॥ गृहाणत्वंसुराधीशप्रसन्नोमांभवाव्यय ॥ ॐनमो० श्रीम० दधिस्नानं० ॥ ॐ
घृतंमिमिक्षे० ॥ सर्पिषाचजगन्नाथस्नापनंक्रियतेधुना ॥ गृहाणश्रद्धयानंततवप्रीत्यैमनोहरं ॥ ॐनमो० श्रीम० घृतस्नानं० ॥ ॐ
मधुवाताऋ० ॥ इदंमधुमयादत्तंतवतुष्ट्यर्थमेवच ॥ स्नातुंगृहाणदेवेशततःशांतिंप्रयच्छमे ॥ ॐनमो० मधुस्नानं० ॥ ॐस्वादुःप
वस्व० ॥ सितयाचसुरश्रेष्ठस्नापनंक्रियतेत्वयि ॥ तस्माद्भक्तपराधीनप्रसन्नोभवसर्वदा ॥ ॐनमो० शर्करास्नानं० ॥ गंधोदकेन
देवेशकुशपुष्पफलोदकैः ॥ रत्नांबुनाचशुद्धेनस्नापयामिपृथक्पृथक् ॥ ॐगंधद्वारां० ॥ कृष्णागरुप्रचुरकर्दमगंधसारकस्तूरि
कामलकचर्चितरोचनाद्यैः ॥ त्वांकेशरैःसुरुचिरैश्चसुगंधवार्भिर्भक्त्यानिरंतरमहंस्नपयामिदेव ॥ ॐनमो० गंधोदकस्नानं० ॥ श
रासःकुशरासइतिऋक् ॥ गोधूमदूर्वउशिराकुशपिंजुलैश्चकाशायवास्तुलसिवञ्जुलबिल्वखंडैः ॥ अश्वत्थबल्वजशरांकुरलाजधान्यै
र्भक्त्यानिरंतरमहंस्नपयामिदेव ॥ ॐनमो० श्रीम० कुशोदक० ॥ ॐओषधीःप्रतिमोदध्वमितिऋक् ॥ कह्लारनीलकमलो
त्पलपारिजातपुन्नागकैःकदलिचंपकपाटलैश्च ॥ बिल्वप्रवालतुलसीशतपत्रजातीपुष्पैर्निरंतरमहंस्नपयामिदेव ॥ ॐनमो० पुष्पोदक ॥ ५२ ॥
स्नानं० ॥ खर्जूरपूगकदलीफलमातुलुंगदाडिंबकादिऋतुसंभवकैस्तथाच ॥ धात्रीफलैःसुरुचिरैश्चतथाचपक्वैर्भक्त्यानिरंतरमहंस्नप
यामिदेव ॥ ॐनमो० फलोदकस्नानं० ॥ ॐसहिरत्नानीतिऋक् ॥ माणिक्यमुक्ताफलविद्रुमाद्यैर्गारुत्मकैःपुष्पकवज्रनीलैः ॥ गोमे

दकैःसंस्कृतचारुवार्भिर्भक्त्यानि० ॥ ॐनमो० रत्नोदकस्नानं० ॥ शुद्धोदकेनदेवेशस्वर्णकुंभाहृतेनच ॥ सर्वतीर्थोदकस्नानंगृ
हाणजगदीश्वर ॥ ॐनमो० शुद्धोदकस्नानं० ॥ पूर्वपूजांसमाप्यपुरुषसूक्तश्रीसूक्तविष्णुसूक्तादिभिर्महाभिषेकःकार्यः ॥ ॐनमो०
श्रीम० महाभिषेकः ॥ नखाग्रपातसंभूतसर्वदोषापनुत्तये ॥ अनंतशेषरूपत्वंगृहाणाचमनीयकं ॥ ॐनमो० आचमनीयं० ॥
ऐश्वर्यपुत्रकामार्थधनधान्यसमृद्धये ॥ वास्तुवाहनसंभूततुष्टिपुष्टियशस्करं ॥ इतिदेवमभिषेकस्थानतउत्थाप्यशेषोपरिसंस्थाप
येत् ॥ ॐ तदस्तु० गृहावैप्रतिष्ठा० ॥ ॐतंयज्ञं० ॐ उपैतुमां० ॥ नवकांचनसंकाशंनिर्मलंमृदुलंशुभं ॥ पीतांबरयुगंदेवदामोदरगृहा
णभो ॥ ॐनमो० वस्त्रयुग्मंस० ॥ आचमनं० ॥ ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतं० ॥ ॐक्षुत्पिपासामलां० ॥ नारायणनमस्तुभ्यंत्राहिमां
भवसागरात् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम ॥ ॐनमो० उपवीतं० ॥ आचमनं० ॥ ॐ तस्माद्यज्ञात्सर्वहुतऋचः सा० ॐ गंध
द्वारां० ॥ कुंकुमागरुकर्पूरकुष्ठंरोचनसर्जकं ॥ जटामांसीमृगमदोविष्णोर्गंधाष्टकंविदुः ॥ मलयाचलसंभूतंकस्तूरीकेशरान्वितं ॥
गंधंमनोहरंदेवअनंतप्रतिगृह्यतां ॥ ॐनमो० चंदनं० ॥ श्वेतान्कुंकुमसंयुक्तानुत्तमान्शालितंडुलान् ॥ गृहाणदेवदेवेशप्रस
न्नोभवतेनमः ॥ ॐनमो० अक्षतान्० ॥ केयूरहारमुकुटकुंडलेमेखलादिकं ॥ कौस्तुभंमुद्रिकादीनिअनंतप्रतिगृह्यतां ॥ ॐ
नमो० आभरणानि० ॥ ॐ तस्मादश्वा० ॥ ॐमनसःकाम० ॥ करवीरैर्जातिपुष्पैश्चंपकादिऋतूद्भवैः ॥ नानाविधैःसुकुसुमैःपू
जयामिरमापतिं ॥ ॐनमो० श्रीम० यथालाभपुष्पाणि० ॥ अहिरिवेत्यादिपरिमलद्रव्याणि ॥ लक्ष्म्यैसौभाग्यद्रव्याणिच ॥ अथ
नामपूजा ॥ ॐकारःसर्वत्रादौनामपूजासु ॥ ॐअनघाय० वामनाय० शौरये० वैकुंठाय० पुरुषोत्तमाय० पद्मनाभाय० हृषी

केशाय० माधवाय० मधुसूदनाय०अच्युताय० अनंताय० गोविंदाय० कृष्णाय० अपराजिताय० १४॥ मोहिन्यै० श्रियै० देव्यै०पद्मिन्यै० महाबलायै० अजायै० मंगलायै० वरदायै० भगवत्यै० अपराजितायै० जयायै० विजयायै० सुभद्रायै० सर्वगायै० १४ ॥ अथांगपूजा ॥ अनंतायनमः पादौपूजयामि ॥ संकर्षणाय० गुल्फौपू० ॥ कालात्मने० जंघेपू० ॥ विश्वरूपिणे० जानुनीपू० ॥ विश्वात्मने० ऊरूपू० ॥ जगत्पतये० कटिंपू० ॥ सर्वभूतात्मने० गुह्यंपू० ॥ पद्मनाभाय० नाभिंपू० ॥ दामोदराय० उदरंपू० ॥ परमात्मने० हृदयंपू० ॥ मुकुंदाय० स्तनौपू० ॥ चतुर्भुजाय० हस्तान्पू० ॥ सर्वास्त्रधारिणे० बाहूपू० ॥ कंबुग्रीवाय० कंठंपू० ॥ वाचस्पतये० मुखंपू० ॥ कमलपत्राक्षाय० नेत्रेपू० ॥ केशवाय० ललाटंपू० ॥ सर्वात्मने० शिरःपू० ॥ सर्वेश्वराय० सर्वांगंपूजयामि ॥ चंचलायै० पादौपू० ॥ चपलायै० गुल्फौपू० ॥ अजायै० जानुनी० ॥ कमलायै० कटिं० ॥ क्षेत्रज्ञायै० नाभिं० ॥ मन्मथवासिन्यै० स्तनौ० ॥ महाबलायै० बाहुद्वयं० ॥ उत्कंठायै० कंठं० ॥ श्रियै० मुखं० ॥ विजयायै० ललाटं० ॥ भगवत्यै० शिरःपू० ॥ सर्वेश्वर्यै० सर्वांगंपू० ॥ ॥ अथावरणपूजा ॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० ब्रह्मणे० अनंताय० वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० अंबुजाय० चक्राय० ॥ दयाब्धेत्राहिसंसारसर्पान्मांशरणागतं ॥ भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनं ॥ इत्यनंतायगंधंपुष्पंशंखोदकंचसमर्पयेदितिप्रत्यावरणं १ ॥ ध्रुवाय० अध्वराय० सोमाय० अद्भ्यो० अनिलाय० अनलाय० प्रत्यूषाय० प्रभासाय० ॥ दयाब्धेत्राहि० इतिद्वितीयावरणं २ ॥ वीरभद्राय० शंभवे० गिरिशाय० अजैकपदे० अहिर्बुध्न्याय०

पिनाकिने० भुवनेश्वराय० कपिलाय० दिक्पतये० स्थाणवे० भवाय० ॥ दयाब्धेत्राहि० ३ ॥ धात्रे० विधात्रे० अर्यम्णे० मित्राय० अंशुमते० वरुणाय० इंद्राय० भर्गाय० विश्वतेजसे० पूष्णे० त्वष्ट्रे० विष्णवे० ॥ दयाब्धेत्राहि० ४ ॥ आदित्याय० सोमाय० भौमाय० बुधाय० गुरवे० शुक्राय० शनैश्चराय० राहवे० केतवे० ॥ दयाब्धेत्राहि० ५ ॥ वसंताय० ग्रीष्माय० वर्षाभ्यो० शरद्भ्यो० हेमंताय० शिशिराय० ॥ दयाब्धेत्रा० ६ ॥ मेषाय० वृषभाय० मिथुनाय० कर्काय० सिंहाय० कन्यायै० तुलायै० वृश्चिकाय० धनुषे० मकराय० कुंभाय० मीनाय०॥ दयाब्धे० ७ ॥ ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० ॥ दयाब्धेत्राहि० ८ ॥ असितांगभैरवाय० रुरुभैरवाय० चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभैरवाय० भीषणभैरवाय० संहारभैरवाय० ॥ दयाब्धेत्राहि० ९ ॥ मत्स्याय० कूर्माय० वराहाय० नारसिंहाय० वामनाय० परशुरामाय० रामाय० कृष्णाय० बौद्धाय० कलंकिने० ॥ दयाब्धेत्राहि० १०॥ दीप्तायै० सूक्ष्मायै० जयायै० भद्रायै० विभूत्यै० विमलायै० अमोघायै० विद्युतायै० विश्वतोमुख्यै० अनंतमुख्यै० ॥ दयाब्धेत्राहि० ११॥ मधवे० माधवाय० शुक्राय० शुचये० नभाय० नभस्याय० इषाय० ऊर्जाय० सहाय० सहस्याय० तपसे० तपस्याय०॥ दयाब्धेत्राहि० १२॥ लक्ष्म्यैनमः श्रियै० दुर्गायै० तुष्ट्यै० पुष्ट्यै० ऋद्ध्यै० शक्तये० कांत्यै० श्रीमहालक्ष्म्यै०॥ दयाब्धेत्राहि० १३॥ शंखायुधाय० चक्रायुधाय० गदायुधाय० पद्मायुधाय० मुसलायुधाय० खड्गायुधाय० शार्ङ्गायुधाय० बाणायुधाय० ॥ दयाब्धेत्राहि० १४ ॥ इतिचतुर्दशावरणानि ॥ अथपत्रपूजा ॥ अनंताय० तुलसीपत्रं० ॥ संकर्षणाय० भृंगराजपत्रं ॥ परमा

त्मने० जातीपत्रं०॥ विश्वरूपिणे० अपामार्गपत्रं० ॥ विश्वनाथाय० बिल्वपत्रं० ॥ पद्मनाभाय० करवीरपत्रं०॥ महात्मने० शमीपत्रं० ॥ श्रीकंठाय० अर्जुनपत्रं०॥ सर्वास्त्रधारिणे० धत्तूरपत्रं० ॥ वाक्पतये० विष्णुक्रांतपत्रं० ॥ केशवाय० दाडिमीपत्रं०॥ सर्वात्मने० मातुलुंगप० ॥ महीधराय० देवदारुप० ॥अच्युताय० मरुपत्रंसमर्पयामि १४ ॥ इतिपत्रपूजा ॥ अथ पुष्पपूजा ॥ अनंताय० पद्मपुष्पं०॥ विषणवे० जातीपुष्पं० ॥ शिष्टेष्टाय० करवीरपुष्पं० ॥ केशवाय० चंपकपुष्पं० ॥ अच्युताय० कह्लारपु० ॥ सहस्रजिते० केतकीपु० ॥ अनंतरूपाय० पारिजातकपुष्पं० ॥ इष्टाय० शतपु० ॥ विशिष्टाय० पुन्नागपु० ॥ शिखंडिने० धत्तूरपु० ॥ नहुषाय० नंद्यावर्तपु० ॥ विश्वबाहवे० मल्लिकापु० ॥ महीधराय० मालतीपु० ॥ श्रीकंठाय० कर्णिकापुष्पं० १४ ॥ इतिपुष्पपूजा ॥ अथाष्टोत्तरशतनामावलिः ॥ ॐ अनंतायनमः अच्युताय० अद्भुतकर्मणे० अमितविक्रमाय० अपराजिताय० अखंडाय० अग्निनेत्राय० अग्निवपुषे० अदृश्याय० अत्रिपुत्राय० ॥ १० ॥ अट्टहासाय० अनाकुलाय० अघनाशिने० अनघाय० अप्सुनिलयाय० अर्हाय० अष्टमूर्तये० अनिरुद्धाय० अनिर्विण्णाय० अचंचलाय० ॥ २० ॥ अष्टदिक्पालमूर्तये० अखिलमूर्तये० अव्यक्ताय० अरूपाय० अनंतरूपाय० अभयंकराय० अक्षराय० अभ्रवपुषे० अयोनिजाय० अरविंदाक्षाय० ॥ ३० ॥ अशनवर्जिताय० अधोक्षजाय० अत्रिपुत्राय० अंबिकापतिपूर्वजाय० अपस्मारनाशिने० अव्ययाय० अनादिनिधनाय० अप्रमेयाय० अघशत्रवे० अमरारिघ्ने० ॥ ४० ॥ अमरविघ्नहंत्रे० अनीश्वराय० अजाय० अनादये० अमरप्रभवे० अग्राह्याय० अक्रराय० अनुत्तमाय० अर्ह्ये० अमोघाय० ॥ ५० ॥ अक्षयाय० अमृताय०

अघोरवीर्याय० अव्यंगाय० अविघ्नाय० अतींद्रियाय० अमिततेजसे० अष्टांगन्यस्तरूपाय० अनिलाय० अवशाय० ॥ ६० ॥
अणोरणीयसे० अशोकाय० अनुकूलाय० अमिताशनाय० अरण्यवासिने० अप्रमत्ताय० अनलाय० अनिर्देश्यवपुषे० अ
होरात्राय० अमृत्यवे० ॥ ७० ॥ अकारादिहकारांताय० अनिमिषाय० अस्त्ररूपाय० अग्रण्याय० अप्रथिताय० असंख्याय०
अमरवर्याय० अन्नपतये० अमृतपतये० अजिताय० ॥ ८० ॥ अपांनिधये० अपांपतये० असुरघातिने० अमरप्रियाय० अ
धिष्ठानाय० अरविंदप्रियाय० अरविंदोद्भवाय० अष्टसिद्धिदाय० अनंतशयनाय० अनंतब्रह्मांडपतये० ॥ ९० ॥ अशिववर्जि
ताय० अतिभूषणाय० अविद्याहराय० अतिप्रियाय० अकल्मषाय० अकल्पाय० अब्दादिकाय० अचलरूपाय० अघोराय०
अक्षोभ्याय० ॥ १०० ॥ अलक्ष्मीशमनाय० अतिसुंदराय० अमोघौघाधिपतये० अक्षताय० अमितप्रभावाय० अवनीपतये०
अर्चिष्मते० अपवर्गप्रदाय० ॥ १०८ ॥ इत्यष्टोत्तरशतनामावलिः ॥ अथपुष्पमालांसमर्पयेत् ॥ तत्रमंत्रः ॥ वनमालांसुगंधा
ढ्यांनानापुष्पैःसमन्वितां ॥ पूजार्थंसाधितांदेवप्रीत्यर्थंप्रतिगृह्यतां ॥ इतिमालासमर्पणं ॥ ॐयत्पुरुषं० ॐकर्दमेन० ॥ दशांगंगु
ग्गुलंधूपंसुगंधंसुमनोहरं ॥ सर्वेषामुत्तमंधूपंगृहाणसुरपूजित ॥ ॐनमो० श्रीम० धूपं० ॥ ॐ ब्राह्मणोस्य० ॐ आपःस्रजंतु० ॥ अग्नि
ज्योंतीरविज्योंतिरात्मज्योतिरयंहरिः ॥ दीपोयंदेवराजेंद्रप्रीत्यर्थंप्रतिगृह्यतां ॥ ॐनमो० श्रीम० दीपंस० ॥ ॐचंद्रमाम०
ॐ आर्द्रांयःकरिणीं० ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ नैवेद्यंगृह्यतांदेवप्रसादंकुरुसर्वदा ॥ ॐनमो० श्रीम० नैवेद्यंस० ॥
पानीयंशीतलंस्वच्छंवस्त्रपूतंसुगंधयुक् ॥ भक्त्यादत्तंगृहाणत्वमनंतफलदायक ॥ ॐनमो० श्रीम० पानीयं० ॥ उत्तरापोशनं०

हस्तप्रक्षालनं० मुखप्रक्षालनं० ॥ चंदनंमलयोद्भूतंकर्पूरादिसमन्वितं ॥ करोद्वर्तनकंदेवअनंतप्रतिगृह्यतां ॥ ॐ नमो० श्रीम०
करोद्वर्तनं० ॥ नालिकेरंमातुलिंगंकपित्थंकदलीफलं ॥ कूष्मांडंकर्कटीयुक्तंगृह्यतामखिलार्थद ॥ इदंफलंमयादेव० ॐ नमो०
श्रीम० महाफलं०॥ पूगीफलंमहद्दिव्यं० ॐनमो० श्रीम० तांबूलं०॥ अनंतगुणितांचैतांनानारत्नगुणैर्युतां॥ दक्षिणांगृह्यतांदेव
यथाशक्तिनिवेदितां ॥ हिरण्यगर्भ० ॐनमो० श्रीम० दक्षिणां०॥ ॐश्रियेजातः०॥ ज्ञानप्रकाशकंदेवगृहाणत्वंरमापते॥ नी
राजनंसुमांगल्यंतिमिरस्यनिवारणं ॥ ॐनमो० श्रीम० नीराजनदीपं०॥ ॐनाभ्याआसीद्० ॐआर्द्रांपुष्करिणीं ०॥ नमस्तेदेव
देवेशनमस्तेधरणीधर॥ नमस्तेसर्वनागेंद्रनमस्तेनंतमाधव॥ ॐनमो० श्रीम० नमस्कारान्०॥ ॐसप्तास्यासन्० ॥ ॐतांमआवह०॥
प्रदक्षिणत्रयंदेवप्रणामंचकरोम्यहं ॥ तेनपापानिसर्वाणिव्यपोहंतुममाच्युत ॥ ॐनमो० श्रीम० प्रदक्षिणाः० ॥ ॐयज्ञेनयज्ञ०
ॐयःशुचिःप्रयंतोभूत्वा०॥देवदेवकृपासिंधोत्राहिमांभवसागरात्॥अपराधंक्षमस्वाद्यगृहाणकुसुमांजलिं॥ॐराजाधिरा० ॐनमो०
मंत्रपुष्पं० ॥ गीतंवाद्यंनृत्यंछत्रंचामरंदर्पणंआंदोलनंसर्वराजोपचारार्थेअक्षतान्० ॥ अत्रस्तुत्यर्थंविष्णुसूक्तानिपुराणोक्तस्तोत्राणि
चपठेत् ॥ स्तुतिंकृत्वातद्विष्णोःपरमंपदमितिमंत्राभ्यांपुष्पांजलिंसमर्पयेत् ॥ अथप्रार्थना ॥ भुक्तिमुक्तिप्रदस्त्वंहिशरीरारोग्य
दायक ॥ सर्वपापहरानंतत्राहिमांभवसागरात् ॥ नमस्तेदेवदेवेशदेवदेवजनार्दन ॥ लोकनाथनमस्तेस्तुसर्वान्कामान्प्रयच्छमे ॥
यथात्वंसर्वलोकानांनागादीनांचतक्षकः ॥ तथामांत्राहिदेवेशत्वदंघ्रीशरणागतं ॥ लक्ष्मिदेविनमस्तेस्तुसौभाग्यवरदायिनि ॥
धनधान्यसुपुत्रादिदेहिमह्यंसुशोभने ॥ ४ ॥ आवाहनंन० यस्यस्मृत्या० मंत्रहीनं० कायेनवाचा० ॥ अनेनयथाशक्तियथा

ज्ञानेनयथामिलितोपचारैर्ध्यानावाहनादिषोडशोपचारैः कृतपूजनेनभगवान्श्रीमदनंतःप्रीयताम् ॥ अथार्घ्यदानं ॥ नमःसर्वहितानंतजगदानंदकारिणे ॥ सर्गस्थित्यंतरूपायगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यंदद्यात् ॥ ॐतत्सद्ब्रह्मार्पणमस्तु ॥ अथदोरकग्रहणं ॥ स्वीकरोमिनवंसूत्रंममविज्ञानदोभव ॥ दोररूपेणमांरक्षपुराणपुरुषोत्तम ॥ अनंतसंसारमहासमुद्रमग्नंसमभ्युद्धरवासुदेव ॥ अनंतरूपेविनियोजयस्वअनंतसूत्रायनमोनमस्ते ॥ इतिनमस्कृत्वाग्रहणंकार्यं ॥ अनंतसर्वदेवेशभुक्तिमुक्तिफलप्रद ॥ अनंताख्यमिदंसूत्रंधारयामितवप्रियं ॥ संसारगह्वरगुहासुसुखंविहर्तुंवांछंतियेकुरुकुलोद्भवशुद्धसत्त्वाः ॥ संपूज्यचत्रिभुवनेशमनंतदेवंबध्नंतिदक्षिणकरेवरदोरकंते ॥ इतिमंत्रेणअनंतदोरकंस्वदक्षिणकरेबध्वालक्ष्मीदोरकंपत्नीवामकरेवध्नीयात् ॥ अनंतगुणरत्नायविश्वरूपधरायच ॥ सूत्रग्रंथिषुसंस्थायअनंतायनमोनमः इति ॥ अनंतःसर्वदेवानामधिपःसर्वकामदः ॥ व्रतेनानेनसुप्रीतोभवत्विहसदामम ॥ इतिनमस्कृत्य ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥ त्राहिमांकृपयानंतशरणागतवत्सल ॥ अद्यमेसफलंजन्मजीवितंचसुजीवितं ॥ यत्तवांघ्रियुगांभोजेमन्मूर्धाभ्रमरायते ॥ नमस्तेदेवदेवायविश्वरूपधरायच ॥ जीर्णदोरंपरित्यज्यन्तनेऽस्मिन्वसप्रभो ॥ इतिजीर्णदोरकोत्तारणं ॥ नमस्तेदेवदेवेशविश्वरूपधरायच ॥ सूत्रग्रंथिषुसंतिष्ठअनंतायनमोनमः ॥ इतिप्रार्थना ॥ अथजीर्णदोरकविसर्जनं ॥ अद्यपूर्वोच्चरित० जीर्णदोरकस्थश्रीमदनंतस्यगंधाद्युपचारैरुत्तरपूजांकरिष्ये इतिसंकल्प्ययथावत्पूजांविधाय ॥ विसर्जयामिदेवेशजीर्णदोरस्थितंपरं ॥ संपूर्णमेव्रतंचास्तुदेवदेवनमोस्तुते ॥ अधिष्ठायनवेऽन्यस्मिन्यतऽनंतनिवेशितः ॥ अतोजीर्णमधिष्ठानंविसर्जयरमापते ॥ संवत्सरकृतांपूजांसंपाद्यविधिवन्मया ॥ व्रजेदानीमनंतत्वंस्वंलोकंहिय

दिच्छया ॥ संवत्सरकृतापूजांगृहीत्वानंतविक्रम ॥ स्वस्थानंगम्यतांविष्णोत्राहिमांत्वमहर्निशं ॥ न्यूनातिरिक्तानिपरिस्फुटानिया
नीहकर्माणिमयाकृतानि ॥ क्षम्याणिचैतानिममक्षमस्वप्रयाहितुष्टःपुनरागमाय ॥ इतिजीर्णदोरकविसर्जनं ॥ अथदोरकदानं ॥
कृतस्यकर्मणःसांगतासिद्ध्यर्थंब्राह्मणपूजनंतस्मैअनंतदोरकदानंवायनदानंचकरिष्ये ॥ विप्रंसंपूज्य ॥ अनंतानंतदेवेशअनंतफल
दायक ॥ अनंतानंतरूपायअनंतायनमोनमः ॥ प्रतिगृह्णद्विजश्रेष्ठसमस्तफलदायक ॥ त्वत्प्रसादादहंविप्रमुच्येयंकर्मबंधनात् ॥
अनंतःप्रतिगृह्णातिअनंतोवैददातिच ॥ अनंतस्तारकोस्माकमनंतायनमोनमः ॥ सुपक्वान्सफलान्साज्यान्पुंनाम्नोघृतपाचितान् ॥
अनंतायप्रदास्यामिप्रसन्नोवरदोस्तुमे ॥ सधान्यंसफलंपक्वंजीर्णदोरसमन्वितं ॥ सदक्षिणंद्विजेंद्रायददाम्यनंततुष्टये ॥ देवस्यत्वा०
विप्रायवेदवि० एतद्वायनंसफलंसधान्यंश्रीमदनंतजीर्णदोरकसहितंसदक्षिणाकंतुभ्यमहंसंप्रददेनमम ॥ अनेनकर्मणाभगवान्श्री
परमेश्वरःप्रीयताम् ॥ कर्मणःसांगतासिद्ध्यर्थंब्राह्मणसमाराधनंकरिष्ये तेभ्योभूयसींदक्षिणां दातुमहमुत्सृज्ये ॥ श्रीमदनंतार्पण
मस्त्वितिकर्मेश्वरार्पणंकृत्वासुहृद्युतोभुंजीत ॥ इतिअनंतव्रतपूजाविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ४८ ॥ शारदनवरात्रपूजा ॥ कर्ताप्रातःकृतनित्यक्रियःपूजांगत्वेनसंकल्पपूर्वंशुक्लतिलैःस्नात्वापरिहितधौतवासाःकुंकुमचंद
नादिकृतपुंड्रोबद्धशिखःपूर्वाह्णेदशघटीमध्येऽभिजिन्मुहूर्तेवापीठेपत्न्यासहप्राङ्मुखउपविश्याचमनादिदेशकालकीर्तनांतेअमुकगो
त्रस्यामुकशर्मणःसकुटुंबस्यसपरिवारस्यत्रिगुणात्मकश्रीदुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यसमृद्धिपुत्रपौत्रा
द्यविच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीःकीर्तिलाभशत्रुपराजयविद्याविजयविविधश्रेयःसंपदाद्यभीष्टसिद्ध्यर्थं अद्यारभ्यनवमीपर्यंतंप्र

त्यहमुपवासादिनियमोपेतःश्रीमहाकालीमहालक्ष्मीमहासरस्वतीनवदुर्गापूजनमालाबंधनाखंडदीपप्रज्वालन (बलिदानचंडिका स्तोत्रपाठतन्मन्त्रजपकुमारीपूजन) ब्राह्मणसुवासिनीभोजनादिविविधनियमरूपंशारदनवरात्रमहोत्सवंकरिष्ये ॥ (संकल्पेन्य दपिकुलाचारानुसारेणयथायथमूहनीयं ॥) तदंगत्वेनप्रतिपदिविहितंकलशस्थापनादिकरिष्ये ॥ गणेशंसंपूज्यस्वस्तिवाचना द्यंतेआसनविधिंभूशुद्ध्यादिन्यासांश्चकरिष्ये ॥ ॥ अथासनविधिन्यासाश्च ॥ यथा ॥ आसनाधोजलादिनात्रिकोणंविलिख्य ॐ ह्रींआधारशक्तिकमलासनायनमः इत्याधारशक्तिंसंपूज्य तदुपर्यनुद्विग्नताकरंकुशकंबलाद्यन्यतममासनमास्तीर्य ॥ पृथ्वी तिमंत्रस्यमेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदः आसनेविनियोगः ॥ ॐ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारय मांदेविपवित्रंकुरुचासनं ॥ इतिमंत्रेणाधारशक्तिंसंप्रार्थ्य ॥ ॐ भूर्भुवःस्वःइत्यासनंसंप्रोक्ष्य तदुपरिप्राङ्मुखउदङ्मुखोवाउप विश्य ॥ ॐ अनंतासनायनमः ॥ कूर्मासनायनमः ॥ विमलासनायनमः ॥ पद्मासनायनमः ॥ योगासनायनमः ॥ आधार शक्त्यैनमः ॥ दुष्टविद्रावणनृसिंहासनायनमः ॥ मध्येपरमसुखासनायनमः ॥ इतिनत्वा ॥ ॐ ऊर्ध्वकेशिविरूपाक्षिमांसशोणितभ क्षणे ॥ तिष्ठदेविशिखाबंधेचामुंडेह्यपराजिते ॥ इतिमंत्रेणशिखामाबध्य ॥ ॥ अथबाह्यभूतशुद्धिः ॥ अपसर्पंत्वित्यस्यभूता न्यनुष्टुप् भूतोत्सारणेवि० ॥ ॐ अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया ॥ अपक्रामंतु भूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामवरोधेनपूजाकर्मसमारभे ॥ इतिभूतान्युत्सार्य ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ इतिभैरवाज्ञांगृहीत्वा ॥ ॥ अथस्थलशुद्धिः ॥ देवतामंडपंचतुर्द्वारंविचिंत्य ॥ ॐ अंत

रित ँ रक्षोंतरिताअरातयः हुंफट्इतिमंडपांतःअक्षतान्क्षिप्त्वा ॥ वामतो गुंगुरुभ्योनमः ॥ दक्षिणतो भंभद्रकाल्यैनमः ॥ उप रिष्टात् गंगणपतयेनमः ॥ इतिद्वारदेवताः संपूज्य ॥ ॥ अथविघ्नोत्सारणंआत्मरक्षणं ॥ यथा ॥ मूलंपठन्दिव्यदृष्ट्यवलो कनेनदिव्यान्विघ्नानुत्सारयामि ॥ ॐ फडितिप्रोक्षणेनांतरिक्षान्विघ्नानुत्सारयामि ॥ ॐ फडितिवामपादपार्ष्णिघातेनभौमान् विघ्नानुत्सारयामि ॥ ॐ अस्त्रायफट्इतितालत्रयेणदिग्बंधनंकृत्वा ॥ ॐ नमःसुदर्शनायअस्त्रायफट्इतिमंत्रेणछोटिकयावह्नि प्राकारत्रयंविभाव्यभूशुद्ध्यादीनिकुर्यात् ॥ ॥ अथभूशुद्धिः ॥ गायत्र्याप्राणानायम्य हुंइतिबीजेनकुंडलिनीमुत्थाप्य हृदिस्थं दीपकलिकाकारंजीवं ॐ हंसःइतिमंत्रेणब्रह्मणिसंयोज्य स्वदक्षिणकुक्षिस्थंपापपुरुषंध्यात्वा यंइति १६ षोडशवारोच्चारितवायु बीजेनपिंगलयापूरकेणतंपापपुरुषंशोषयित्वाकुंभके रंइति ६४ चतुःषष्टिवारोच्चारितवह्निबीजेनतंदग्ध्वापुनःयंइति ३२ द्वात्रिं शद्वारोच्चारितवायुबीजेनतद्भस्मइडयारेचयेत् ॥ ब्रह्मरंध्रगतेचंद्रमंडलेऽमृतवर्षिणीं ॥ भवानींभूमिशुद्ध्यर्थंभावयेदमृतेश्वरीं ॥ ततस्तन्मौलिनिष्पंदसुधाकल्लोलवृष्टिभिः ॥ चिंतयेन्मनसात्मानंभूमिशुद्धिरियंभवेत् ॥ इतिसंक्षेपतोभूशुद्धिः ॥ ॥ अथभूत शुद्धिः ॥ इडयावायुमापूर्यकुंभकेलंवंरंयंहंइतिपंचभूतबीजानिसकृदावर्त्यपिंगलयारेचयेत् ॥ ततोवमित्यमृतबीजेनप्राणायामं कृत्वा सद्वासनात्मकंदेवीशरीरमुत्पाद्यसोहंइतिमंत्रेणकुंडलिनींब्रह्मणोवहृत्यतत्रस्थंजीवंहृदिनिधायकुंडलिनींमूलाधारगतांविभा वयेदितिसंक्षेपतोभूतशुद्धिः ॥ ॥ अथप्राणप्रतिष्ठा ॥ हृदिहस्तंदत्वा ॐ आंह्रींक्रोंममप्राणाइहप्राणाः ॥ ॐ आंह्रींक्रोंमम जीवइहस्थितः ॥ ॐ आंह्रींक्रोंममसर्वेंद्रियाणि ॥ ॐ आंह्रींक्रोंममवाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहागत्यसुखंसुचि

रंतिष्ठंतुस्वाहा ॥ ॐ असुनीतेपुनरस्मासुचक्षुःपुनःप्राणमिहनोधेहिभोगं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानःस्वस्ति ॥ ममगर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थंपंचदशप्रणवावृत्तीःकरिष्ये ॥ ॐ १५ वारं ॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैःपाशंकोदंडमिक्षूद्भवमथगुणमप्यंकुशंपंचबाणान् ॥ बिभ्राणासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभ वतुसुखकरीप्राणशक्तिःपरानः ॥ सुप्रतिष्ठितमस्तु ॥ इतिसंक्षेपेणप्राणप्रतिष्ठा ॥ ॥ अथमातृकान्यासोयथा ॥ अंजलिंबध्वा अंआंइंईंउंऊंऋंॠंलृंलॄंएंऐंओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषंसंहंळंक्षं इतिमातृकाबीजा न्यंजलिगतानिविभाव्य मूर्धादिपादांतंत्रिर्न्यसेदितिसंक्षेपः ॥ सहस्रशीर्षाषोळशनारायणःपौरुषमानुष्टुभंत्रिष्टुबंतं शरीरशुद्ध्यर्थे न्यासेपूजायांचविनि० ॥ पौरुषंन्यस्य ॥ श्रीसूक्तन्यासः ॥ हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य ॥ आनंदकर्दमचिक्लीतेंदिरासु ताऋषयः श्रीरग्निश्चेत्युभेदेवते आद्यास्तिस्रोनुष्टुभःचतुर्थीबृहती पंचमीषष्ठ्यौत्रिष्टुभौ ततोष्टावनुष्टुभःअंत्याप्रस्तारपंक्तिःव्यंजनानि बीजानिस्वराःशक्तयःबिंदवःकीलकं ममअलक्ष्मीपरिहारपूर्वकलक्ष्मीप्राप्त्यर्थेश्रीसूक्तन्यासेपूजायांचविनियोगः॥ ॐ हिरण्यवर्णां० मूर्ध्नि ॥ ॐतांमआवह० नेत्रयोः ॥ ॐअश्वपूर्वां० कर्णयोः ॥ ॐकांसोस्मितां० नासिकायां ॥ ॐ चंद्रांप्रभासां० मुखे० ॥ ॐआदि त्यवर्णे० कंठे ॥ ॐउपैतुमां० बाह्वोः ॥ ॐक्षुत्पिपासा० हृदये ॥ ॐगंधद्वारां० नाभौ ॥ ॐमनसःकाम० गुह्ये ॥ ॐकर्दमेन० अपाने ॥ ॐआपःस्रजंतु० ऊर्वोः ॥ ॐआर्द्रांयःकरिणीं० जान्वोः ॥ ॐ आर्द्रांपुष्करिणीं० जंघयोः ॥ ॐ तांमआवह० पादयोः ॥ ॐ यः शुचिःप्र० सर्वांगे ॥ अथांगुलिन्यासः ॥ ॐहिरण्यवर्णायैनमः अंगुष्ठाभ्यांनमः ॥ ॐसुवर्णायै० तर्जनीभ्यां० ॥ ॐ रजतस्रजायै०

मध्यमाभ्यां० ॥ ॐ चंद्रायै० अनामिकाभ्यां० ॥ ॐ हिरण्मय्यै० कनिष्ठिकाभ्यां० ॥ ॐ लक्ष्म्यै० करतलकरपृष्ठाभ्यां० ॥ एवं हृदयादि ॥ (अथमूलषडंगन्यासः ॥ अस्यश्रीनवार्णमंत्रस्य ब्रह्मविष्णुरुद्राऋषयः गायत्र्युष्णिगनुष्टुभश्छंदांसि श्रीमहाकाली महालक्ष्मीमहासरस्वत्योदेवताः नंदाशाकंभरीभीमाःशक्तयः रक्तदंतिकादुर्गाभ्रामर्योबीजानि अग्निवायुसूर्यास्तत्त्वानि श्रीजग दंबाप्रीत्यर्थेन्यासेपूजायांचविनियोगः ॥ ॐऐंअंगुष्ठाभ्यांनमः ॥ ॐह्रींतर्जनीभ्यांनमः ॥ ॐक्लींमध्यमाभ्यांनमः ॥ ॐचामुंडा यैअनामिकाभ्यांनमः ॥ ॐविच्चेकनिष्ठिकाभ्यांनमः ॥ ॐऐंह्रींक्लींचामुंडायैविच्चे करतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादि ॥ ततो ऽक्षरन्यासः ॥ ॐऐंनमः शिखायां ॥ ॐह्रींनमः दक्षिणनेत्रे ॥ ॐक्लींनमः वामनेत्रे ॥ ॐचांनमः दक्षिणकर्णे ॥ ॐमुंनमः वामकर्णे ॥ ॐडांनमः दक्षिणनासायां ॥ ॐयैंनमः वामनासायां ॥ ॐविंनमः मुखे ॥ ॐच्चेंनमः गुह्ये ॥ एवंविन्यस्याष्टवारंमूलमंत्रेणव्यापकं कुर्यात् ॥ अथाङ्गन्यासः ॥ ॐऐंप्राच्यैनमः ॥ ॐऐंआग्नेय्यैनमः ॥ ॐह्रींदक्षिणायैनमः ॥ ॐह्रींनैर्ऋत्यैनमः ॥ ॐक्लींप्रतीच्यैनमः ॥ ॐक्लींवायव्यैनमः ॥ ॐचामुंडायै उदीच्यैनमः ॐविच्चेईशान्यैनमः ॥ ॐऐंह्रींक्लींचामुंडायैविच्चे ऊर्ध्वायैनमः ॥ ॐऐंह्रींक्लींचामुं डायैविच्चेभूम्यैनमइति ॥) ततोनित्यवत्कलशादिदीपपूजांतेअपवित्रइतिसंभारान्प्रोक्षेत् ॥ ततोघटस्थापनंतत्रप्रधानदेवतानांघटेस्था पनपक्षेस्वपुरतःमध्येएववेदिंकृत्वातदुपरिस्थापयेत् ॥ अथवाकलशभिन्नासनेप्रधानदेवतास्थापनपक्षेमुख्यदेवतादक्षिणभागेवेदिंकृ त्वातदुपरिस्थापयेत् ॥ ॐमहीद्यौरितिभूमिंस्पृष्ट्वाओषधयःसमितियवान्निक्षिप्य आकलशेष्वितिकुंभंसंस्थाप्य इमंमेगंगेइतिजलेनापूर्य गंधद्वारामितिगंधंयाओषधीरितिसर्वौषधीः कांडात्कांडादितिदूर्वानिक्षिप्य अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीभवेतिसप्तमृदः

याः फलिनीरितिफलं सहिरत्नानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यं क्षिप्त्वा युवासुवासाइतिवस्त्रेणसूत्रेणवावेष्ट्य तदुपरिपूर्णादर्वी
तिपूर्णपात्रंनिधाय ततःकुंभेतत्त्वायामीतिवरुणमावाह्यपंचोपचारैःपूजयेत् ॥ कलशाधःकृतवेद्युपरि ॐ स्योनापृथिविभवानृक्षरा
निवेशनी ॥ यच्छानःशर्मसप्रथः ॥ इतिमृदंविकीर्य तदुपरि ॥ ॐ येनतोकायतनयायधन्यं१बीजंवहध्वेअक्षितं ॥ अस्मभ्यं
तद्धत्तनयद्वईमहेराधोविश्वयुसौभगं ॥ इतिधान्यंविकीर्य ॥ ॐ पर्जन्यायप्रगायतदिवस्पुत्रायमीढुषे ॥ सनोयवसमिच्छतु ॥ इति
जलंसिक्त्वा ॥ ॐ वर्षंतुतेविभावरिदिवोअभ्रस्यविद्युतः ॥ रोहंतुसर्वबीजान्यवब्रह्मद्विषोजहि ॥ इतिप्रार्थ्य ॥ घटंप्रार्थयेत् ॥ दे
वदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं ॥ त्वत्तोयेसर्वतीर्थानि देवाःसर्वेत्वयिस्थिताः ॥ त्व
यितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥
त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः ॥ त्वत्प्रसादादिमांपूजांकर्तुमीहेजलोद्भव ॥ सांनिध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ॥ आगच्छ
वरदेदेविदैत्यदर्पनिषूदनि ॥ पूजांगृहाणसुमुखिनमस्तेशंकरप्रिये ॥ सर्वतीर्थमयंवारिसर्वदेवसमन्वितं ॥ इमंघटंसमागच्छसांनि
ध्यमिहकल्पय ॥ इतिप्रार्थना ॥ ततःघृतदीपस्थापनपक्षेदेवीदक्षिणतःस्थाप्यःतैलदीपस्थापनपक्षेदेवीवामतःउभयस्थापनपक्षेउभ
यत्र ॥ ॐ ऐंह्रींश्रींवास्तुपुरुषायनमः इतिगंधादिनास्थलंसंपूज्य तत्रगंधजलादिनात्रिकोणंविरच्य दीपाधारयंत्रंगंधादिनासंपू
ज्यतदुपरिघृतपूर्णंतैलपूर्णंवापात्रंसंस्थाप्यदीपंप्रज्वाल्य ॐ ऐंह्रींश्रींदीपायनमःइतिपंचोपचारैःसंपूज्यप्रार्थयेत् ॥ अखंडदीपकंदे
व्याःप्रीतयेनवरात्रकं ॥ उज्ज्वालयेअहोरात्रमेकचित्तोदृढव्रतः ॥ अस्मिन्क्षेत्रेदीपनाथनिर्विघ्नसिद्धिहेतवे ॥ लक्ष्मीयंत्रस्यपूजार्थं

मनुज्ञांदातुमर्हसि ॥ इतिसंप्रार्थ्यघटेआसनांतरेवायथाकुलाचारंपीठंपूजयेत् ॥ तच्चेत्थं ॥ ॐ आधारेमंमंडूकायनमः कालाग्नि रुद्राय० मूलप्रकृत्यै० आधारशक्तये० कूर्माय० अनंताय० वराहाय० पृथिव्यै० क्षुधासमुद्राय० रत्नद्वीपाय० सुवर्णद्वीपाय० नंदनोद्यानाय० मणिमंडपाय० सुवर्णमंडपाय० सुवर्णवेदिकायै० रत्नसिंहासनाय० धर्माय० ज्ञानाय० वैराग्याय० ऐश्व र्याय० ॥ पूर्वादिदिक्षु अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० अनंताय० पद्माय० अंअर्कमंडलाय० उंसोममंड लाय० मंवह्निमंडलाय० संसत्त्वाय० रंरजसे० तंतमसे० अंआत्मने० अंअंतरात्मने० पंपरमात्मने० ह्रींज्ञानात्मने० मायात त्त्वाय० कालतत्त्वाय० विद्यातत्त्वाय० परतत्त्वाय० ॥ अथाष्टदलेषुकर्णिकायांनवशक्तीर्विभावयेत् ॥ पूर्वादिप्रादक्षिण्येन इ च्छायै० ज्ञानायै० क्रियायै० कामिन्यै० कामदायिन्यै० रत्यै० रतिप्रियायै० नंदायै० मनोन्मनायै० मध्येमहाकालीमहा लक्ष्मीमहासरस्वतीभ्योनमः इतिपुष्पाक्षतैर्वापूजयेत् ॥ ततोगणपतिचतुष्टयं ॥ गणानांत्वेतिईशान्यां गणपतिं ॥ जज्ञानंसप्तइतिआ ग्नेय्यांमातॄः ॥ जातवेदसेइतिनैर्ऋत्यांदुर्गां क्षेत्रस्यपतिनाइतिवायव्यांक्षेत्रपालं ॥ पूर्वादिदिक्षुपूर्वे इंद्रत्वा० इंद्रं आग्नेये अग्निंदूतं० अग्निं दक्षिणे यमायसो० यमं नैर्ऋत्ये मोषुणःपरा० नैर्ऋतिं पश्चिमे त्वंनोअग्ने० वरुणं वायव्ये तववाय० वायुं उदीच्यां सोमो धेनुं० सोमं ईशान्यां तमीशानं० ईशानंइति पीठदेवताआवाह्यसंपूज्य तदुपरिवस्त्रादौशक्तिगंधाष्टकेनकुंकुमेनवायंत्रंविलिखेत् ॥ ॥ ५९ ॥
तदित्थं ॥ बिंदुत्रिकोणषट्कोणाष्टकोणद्वादशदलमिति ॥ तत्रत्रिकोणाद्बहिःषट्कोणांतःनवकोष्ठंविलिख्यतत्रप्रधानदेवताःस्थाप येत् ॥ तदित्थं ॥ त्रिखंडमुद्रयापुष्पंगृहीत्वास्वहृदिस्थांतेजोमयींदेवतांसंचिंत्यपुनस्तांमहाकालीमहालक्ष्मीमहासरस्वतीरूपेणवि

भाव्यब्रह्मरंध्रेणनासाद्वाराउच्छ्वासनेनपुष्पेसमानीय ॥ ध्यानं ॥ अरुणकमलसंस्थातद्रजःपुंजवर्णाकरकमलधृतेष्टाभीतियुग्मांबुजाच ॥ मणिमुकुटविचित्रालंकृताकल्पजालैर्भवतुभुवनमातासंततंश्रीःश्रियैनः ॥ चतुर्भुजांत्रिनेत्रांचवरदाभयपाणिकां ॥ रक्तांबरधरांदेवींदिव्यरूपांनमाम्यहं ॥ अक्षस्रक्परशूगदेषुकुलिशंपद्मंधनुःकुंडिकांदंडंशक्तिमसिंचचर्मजलजंघंटांसुराभाजनं ॥ शूलंपाशसुदर्शनेचदधतींहस्तैःप्रवालप्रभांसेवेसैरिभमर्दिनीमिहमहालक्ष्मींसरोजस्थितां ॥ इतिमहालक्ष्मींध्यात्वातत्पुष्पंमध्यकोष्ठस्थत्रिकोणेसंस्थापयेत् ॥ एवं ॥ खड्गंचक्रगदेषुचापपरिघान्शूलंभुशुंडींशिरःशंखंसंदधतींकरैस्त्रिनयनांसर्वांगभूषावृतां ॥ नीलाश्मद्युतिमास्यपाददशकांसेवेमहाकालिकांयामस्तौत्स्वपितेहरौकमलजोहंतुंमधुंकैटभं ॥ इतिध्यात्वामहालक्ष्मीदक्षिणकोष्ठेमहाकालीमावाहयेत् ॥ एवं ॥ घंटाशूलहलानिशंखमुसलेचक्रंधनुःसायकंहस्ताब्जैर्दधतींघनांतविलसच्छीतांशुतुल्यप्रभां ॥ गौरीदेहसमुद्भवांत्रिजगतामाधारभूतांमहापूर्वामत्रसरस्वतीमनुभजेशुंभादिदैत्यार्दिनीं ॥ इतिध्यात्वामहालक्ष्मीवामकोष्ठेमहासरस्वतीमावाहयेत् ॥ एवमेवमध्यकोष्ठेमहालक्ष्मीपुरतआरभ्यतत्तन्मंत्रैर्नवदुर्गाःध्यात्वामहालक्ष्मीपरितआवाहयेत् ॥ तेमंत्राश्चयथा ॥ जगत्पूज्येजगद्वंद्येसर्वशक्तिस्वरूपिणि ॥ पूजांगृहाणकौमारिजगन्मातर्नमोस्तुते ॥ शैलपुत्र्यैनमः शैलपुत्रींआवाहयामि० १॥ त्रिपुरांत्रिगुणाधारांमार्गज्ञानस्वरूपिणीं ॥ त्रैलोक्यवंदितांदेवींत्रिमूर्तिंपूजयाम्यहं ॥ ब्रह्मचारिण्यै० २॥ कालिकांतुकलातीतांकल्याणहृदयांशिवां ॥ कल्याणजननींनित्यंकल्याणींपूजयाम्यहं ॥ चंद्रघंटायै० ३॥ अणिमादिगुणोदारांमकराकारचक्षुषं ॥ अनंतशक्तिभेदांतांकामाक्षींपूजयाम्यहं ॥ कूष्मांडायै० ४ ॥ चंडवीरांचंडमायांचंडमुंडप्रभंजिनीं ॥ तांनमामिचदेवेशींचंडिकां

पूजयाम्यहं ॥ स्कंदमात्रेनमः ५ ॥ सुखानंदकरींशांतांसर्वदेवैर्नमस्कृतां ॥ सर्वभूतात्मिकांदेवींशांभवींपूजयाम्यहं ॥ कात्यायन्यै नमः ६ ॥ चंडवीरांचंडमायांचंडमुंडप्रभंजिनीं ॥ तांनमामिचदेवेशींगायत्रींपूजयाम्यहं ॥ कालरात्र्यै न० ७ ॥ सुंदरींस्वर्णवर्णांगींसुखसौभाग्यदायिनीं ॥ संतोषजननींदेवींसुभद्रांपूजयाम्यहं ॥ महागौर्यै० ८ ॥ दुर्गमेदुस्तरेकार्येभयदुर्गविनाशिनीं ॥ पूजयामिसदाभक्त्यादुर्गांदुर्गार्तिहारिणीं ॥ सिद्धिदायै० ९ ॥ इत्यावाह्य (अथवाप्रकारांतरेणकुलाचारानुरूपंदुर्गाध्यानं ॥ विद्युद्दामसमप्रभांमृगपतिस्कंधस्थितांभीषणांकन्याभिःकरवालखेटविलसद्धस्ताभिरासेवितां ॥ हस्तैश्चक्रदरालिखेटविशिखांश्चापंगुणं तर्जनींबिभ्राणामनलात्मिकांशशिधरांदुर्गांत्रिनेत्रांभजे ॥ इतिमहालक्ष्मीस्थानेदुर्गांध्यात्वाआवाहयेत्) ॥ श्रीमहाकालीमहालक्ष्मी महासरस्वतीत्रिगुणात्मिकांनवदुर्गांध्यायामि ॥ ॐ हिरण्यवर्णां० ॐ सहस्रशीर्षा० ॥ तप्तकांचनसंकाशांमुक्ताभरणभूषितां ॥ रत्नसिंहासनासीनांवंदेतांवैमहेश्वरीं ॥ आवाहनं० ॥ ॐ तांमआवह० ॐ पुरुषएवेदं० ॥ खड्गशूलगदाहस्तामभयंदधतींकरैः ॥ गजारूढांमहादेवींसर्वैश्वर्यप्रदायिनीं ॥ आसनं० ॥ ॐ अश्वपूर्वां० ॐ एतावानस्य० ॥ विद्याधरींमहादेवींपद्माभांलोकनायकां ॥ सर्वैश्वर्यप्रदांदेवीं महालक्ष्मींप्रपूजये ॥ पाद्यं० ॥ ॐ कांसोस्मितां० ॐ त्रिपादूर्ध्व० ॥ दधिदूर्वाक्षतायुक्तंगंगातोयसमन्वितं ॥ अर्घ्यंगृहाणभोदेविमया भक्त्यानिवेदितं ॥ अर्घ्यं० ॥ ॐ चंद्रांप्रभासां० ॐ तस्माद्विरा० ॥ नानारत्नप्रभांदेवींनानागणसमन्वितां ॥ नारायणींमहालक्ष्मींवंदे ताविष्णुवल्लभां ॥ आचम० ॥ ॐ आदित्यवर्णे० ॐ यत्पुरुषेणह० ॥ आपोहिष्ठेतिमलापकर्षस्नानं ॥ ततःपंचामृतंआप्यायस्वेत्यादिमंत्रैः पौराणैश्चपृथक्कार्यं ॥ दधिमध्वाज्यसंयुक्तशर्कराभिःसमन्वितं ॥ गंगोदकंसमानीतंत्वंगृहाणसुरेश्वरि ॥ ॐ गंधद्वारां० इतिगंधोदकं ॥

ॐकानिंक्रदत्० इतिमांगलिकस्नानं ॥ पूर्वपूजांसमाप्य ततःश्रीसूक्तेनपुरुषसूक्तेनचाभिषेकंकुर्यात् ॥ आचमनं ॥ ॐउपैतुमां० ॐतंयज्ञं बर्हिषि० ॥ मुक्तामणिगणस्पर्शस्फुरत्कंचुकमुत्तमं ॥ पीतांबरंसोत्तरीयंगृहाणपरमेश्वरि ॥ वस्त्रं० ॥ आचमनं० ॥ ॐक्षुत्पिपासा० ॐतस्माद्यज्ञात्सर्वहुतःसंभृतं० ॥ नानासिद्धिप्रदांदेवींनानागुणविवर्धिनीं ॥ नानासूत्रधरांदेवींसर्वलोकमहेश्वरीं ॥ उपवस्त्रं० ॥ तप्तकांचनसंकाशांमहालक्ष्मींवरप्रदां ॥ नानाभरणशोभाढ्यांवंदेतांवरदासनां ॥ कंचुकीं सर्वाभरणानिच० ॥ महागुणसमायुक्तंनानामणिसमन्वितं ॥ कंठसूत्रंमयानीतंगृहाणभक्तवत्सले ॥ कंठसूत्रं० ॥ ॐगंधद्वारां० ॐतस्माद्यज्ञात्सर्वहुतऋचः० ॥ चंदनागरुकर्पूरकुंकुमारोचनैस्तथा ॥ कस्तूर्यादिसुगंधंचसर्वांगेषुविलेपये ॥ गंधं० ॥ अक्षतान्निर्मलान्शुद्धान्मुक्तामणिसमप्रभान् ॥ गृहाणेमान्महादेविदेहिमेनिर्मलांधियं ॥ अक्षतान्० हरिद्रां० कुंकुमं० सिंदूरं० कज्जलं० ॥ ॐमनसःकाम० ॐतस्मादश्वा० ॥ मंदारपारिजातादिपाटलीकेतकानिच ॥ जातीचंपकपुष्पाणिगृहाणेमानिशोभने ॥ पुष्पाणि० ॥ पद्मशंखजपुष्पादिशतपत्रैर्विचित्रितां ॥ पुष्पमालांप्रयच्छामिगृहाणत्वंसुरेश्वरि ॥ पुष्पमालां० ॥ दूर्वादलश्यामलेत्वंमहीरूपेहरिप्रिये ॥ अतोदूर्वाभिर्भवतींपूजयामिसदाशिवे ॥ दूर्वांकुरान्स० ॥ अमृतोद्भवःश्रीवृक्षोमहादेवप्रियःसदा ॥ बिल्वपत्रंप्रयच्छामिपवित्रंतेसुरेश्वरि ॥ बिल्वपत्रं० ॥ उग्रद्वारेचोग्रमयिदुष्टासुरनिबर्हिणि ॥ पूजांकरोमिचार्वंगिपल्लवैर्नंदनोद्भवैः ॥ पल्लवान्० ॥ शरत्कालेसमुद्भूतांनिशुंभेमर्दितेत्वया ॥ फलमालांवरांदेविगृहाणसुरपूजिते ॥ फलमालां० ॥ ॥ अथांगपूजा ॥ दुर्गायैनमः पादौपूजयामि ॥ महाकाल्यै० गुल्फौ० ॥ मंगलायै० जानुद्वयं० ॥ कात्यायन्यै० ऊरू० ॥ भद्रकाल्यै० कटिं० ॥ कमलवासिन्यै० नाभिं० ॥ शिवायै० उदरं० ॥

क्षमायै० हृदयं० ॥ कौमार्यै० स्तनौ० ॥ उमायै० हस्तौ० ॥ महागौर्यै० दक्षिणबाहुं० ॥ वैष्णव्यै० वामबाहुं० ॥ रमायै० स्कंधौ० ॥ स्कंदमात्रे० कंठं० ॥ महिषमर्दिन्यै० नेत्रे० ॥ सिंहवाहिन्यै० मुखं० ॥ महेश्वर्यै० शिरः० ॥ कात्यायन्यै० सर्वांगंपूजयामि ॥ अथावरणपूजा ॥ महालक्ष्मीपश्चिमकोष्ठे स्वरयासहविरिंचयेनमः स्वरयासहविरिंचिश्रीपादुकांपूजयामि ॥ तद्दक्षिणकोष्ठे गौर्यासहरुद्रायनमः गौर्यासहितरुद्रश्रीपादुकांपू० ॥ वामकोष्ठे लक्ष्म्यासहहृषीकेशायनमः लक्ष्म्यासहहृषीकेश श्रीपादुकांपू० ॥ महाक्ष्मीपुरःकोष्ठेअष्टादशभुजायैनमः अष्टादशभुजाश्रीपादुकां० ॥ तद्वामकोष्ठे दशाननायैनमः दशानना श्रीपादुकांपू० ॥ दक्षिणकोष्ठे अष्टभुजायै० अष्टभुजाश्रीपा० ॥ अभीष्टसिद्धिंमेदेहिशरणागतवत्सले ॥ भक्त्यासमर्पयेतुभ्यंप्रथ मावरणार्चनं ॥ १ ॥ प्रथमावरणार्चनेनश्रीमहालक्ष्मीःप्रीयतां ॥ षट्कोणेमहालक्ष्मीपूर्वकोणमारभ्ययथाक्रमं ऐं हृदयायनमः हृदयश्रीपादुकांपू० ॥ ह्रीं शिरसेस्वाहा शिरःश्रीपा० ॥ क्लीं शिखायैवषट् शिखाश्रीपा० ॥ चामुंडायै कवचायहुं कवचश्रीपा० ॥ विच्चे नेत्रत्रयायवौषट् नेत्रत्रयश्रीपा० ॥ ऐंह्रींक्लींचामुंडायैविच्चे अस्त्रायफट् अस्त्रश्रीपा० ॥ तत्रैवमहालक्ष्मीपुरःकोणमारभ्य हिर ण्यायै० हिरण्याश्रीपा० ॥ चंद्रायै० चंद्राश्रीपा० ॥ रजतस्रजायै० रजतस्रजाश्रीपा० ॥ हिरण्यस्रजायै हिरण्यस्रजाश्रीपा० ॥ हिर ण्याक्षायै० हिरण्याक्षाश्रीपा० ॥ हिरण्यवर्णायै० हिरण्यवर्णाश्रीपा० ॥ अभीष्टसिद्धिं० ॥ २ ॥ ततःषड्दलेसंधिषु० ॥ देवी पुरोदलमारभ्य ॥ वसंताय० ॥ ग्रीष्माय० ॥ वर्षाभ्यः० ॥ शरद्भ्यः० ॥ हेमंताय० ॥ शिशिराय० ॥ अभीष्टसिद्धिं० ॥३॥ अष्टदलेमहालक्ष्मीपुरोदलमारभ्ययथाक्रमंप्रदक्षिणं ॥ ब्राह्म्यैनमः ब्राह्मीश्रीपादुकां० ॥ एवंसर्वत्र ॥ माहेश्वर्यै० ॥ कौमार्यै० ॥

वैष्णव्यै० ॥ वाराह्यै० ॥ इंद्राण्यै० ॥ चामुंडायै० ॥ महालक्ष्म्यै० ॥ तत्रैवपूर्वक्रमेणप्रदक्षिणं ॥ पद्मासनायै० ॥ पद्मवर्णायै० ॥ पद्मस्थायै० ॥ आर्द्रायै० ॥ तर्पयंत्यै० ॥ तृप्तायै० ॥ ज्वलंत्यै० ॥ हिरण्यप्राकारायै० ॥ तत्रैवपूर्वक्रमेणप्रदक्षिणं ॥ असितांग भैरवाय० ॥ रुरुभैरवाय० ॥ चंडभैरवाय० ॥ क्रोधभैरवाय० ॥ उन्मत्तभैरवाय० ॥ कपालभैरवाय० भीषणभैरवाय० ॥ संहारभैरवाय० ॥ अभीष्टसिद्धिं० ॥ ४ ॥ महालक्ष्मीपृष्ठतः पूर्वदिशमारभ्य ॥ इंद्रायनमः इंद्रश्रीपा० ॥ एवंअग्नये० ॥ यमाय० ॥ निर्ऋतये० ॥ वरुणाय० ॥ वायवे० ॥ सोमाय० ॥ ईशानाय० ॥ अभीष्ट० ॥ ५ ॥ अष्टदलसंधिषु ॥ आदि त्याय० ॥ सोमाय० ॥ अंगारकाय० बुधाय० ॥ बृहस्पतये० ॥ शुक्राय० ॥ शनैश्चराय० ॥ राहुकेतुभ्यां० ॥ अभीष्टसिद्धिं० ॥ ६ ॥ द्वादशदलमूलेषुदेवीपुरोभागमारभ्यप्रदक्षिणं ॥ मेषाय० ॥ वृषभाय० ॥ मिथुनाय० ॥ कर्काय० ॥ सिंहाय० ॥ कन्यायै० ॥ तुलायै० ॥ वृश्चिकाय० ॥ धनुषे० ॥ मकराय० ॥ कुंभाय० ॥ मीनाय० ॥ अभीष्टसिद्धिं० ॥ ७ ॥ द्वादश दलमध्येषुपूर्वदलमारभ्यप्रदक्षिणं ॥ मधवे० ॥ माधवाय० ॥ शुक्राय० ॥ शुचये० ॥ नभाय० ॥ नभस्यांय० ॥ इषाय० ॥ ऊर्जाय० ॥ सहाय० ॥ तैषाय० ॥ तपसे० ॥ तपस्याय० ॥ अभीष्ट० ॥ ८ ॥ पुनःद्वादशदलाग्रेषुपूर्वक्रमेण ॥ दीप्तायै० ॥ सूक्ष्मायै० ॥ जयायै० ॥ विमलायै० ॥ लक्ष्म्यै० ॥ श्रियै० ॥ गौर्यै० ॥ तुष्ट्यै० ॥ बुद्ध्यै० ॥ शांतायै० ॥ कांत्यै० ॥ महा लक्ष्म्यै० ॥ अभीष्ट० ॥ ९ ॥ ॐकर्दमेन० ॥ ॐयत्पुरुषं० ॥ दशांगंगुग्गुलंधूपंचंदनागरुसंयुतं ॥ समर्पितंमयाभक्त्यामहालक्ष्मि प्रगृह्यतां ॥ धूपं० ॥ ॐआपःस्रजं० ॐब्राह्मणोस्य० घृतवर्तिसमायुक्तंमहातेजोमहोज्ज्वलं ॥ दीपंदास्यामिगिरिजेसुप्रीताभवसर्वदा ॥

दीपं०॥ ॐआ॒र्द्राय॒ःकरि० ॐचं॒द्रम॒ाम०॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं॥नैवेद्यंगृह्यतांदेविभक्तिंमेह्यचलांकुरु॥नैवेद्यं०॥
गंधतोयंसमानीतंसुवर्णकलशेस्थितं ॥ हस्तप्रक्षालनार्थायपानीयंतेनिवेदये॥ हस्तप्रक्षा०॥ द्राक्षाखर्जूरकदलीपनसाम्रकपित्थकं॥
नारिकेलेक्षुजंब्वादिफलानिप्रतिगृह्यतां॥ फलंस०॥ एलालवंगकस्तूरीकर्पूरैःपुष्पवासितां॥ वीटिकांमुखवासार्थमर्पयामिसुरे
श्वरि॥ तांबूलं०॥ पूजाफलसमृद्ध्यर्थंतवाग्रेस्वर्णमीश्वरि॥ स्थापितंतेनमेप्रीतापूर्णान्कुरुमनोरथान्॥ दक्षिणां०॥ ॐश्रि॒ये
जा॒तः०॥ कौशेयवर्तिसंयुक्तंगोघृतेनसमन्वितं॥नीराजनंमयादत्तंगृहाणपरमेश्वरि॥ नीराजनं०॥ॐआ॒र्द्रांपु॒०॥ ॐनाभ्यांआसी०॥
नमस्तेदेवदेवेशिनमस्तेईप्सितप्रदे॥ नमस्तेदेवदेवेशिनमस्तेशंकरप्रिये॥नमस्कारान्॥ ॐतां॒मआवह० ॐस॒प्तास्यां० यानिकानिच०
प्रदक्षिणाः॥ ॐयःशु॒चि॒ःप्रयतो०॥ ॐय॒ज्ञेनय॒ज्ञ०॥ दामोदरिनमस्तेस्तुनमस्त्रैलोक्यनायके॥ नमस्तेस्तुमहालक्ष्मित्राहिमांपरमे
श्वरि॥ मंत्रपुष्पं०॥ नानापुष्पकृतांमालांनानापुष्पैःसमन्वितां॥ प्रयच्छामिसुरेशानिसुप्रीतावरदाभव॥ मालार्पणं०॥ प्रार्थ
ना॥ पूजाफलाग्निकार्याद्यैःसुकृतंयन्मयार्चितं॥ तत्सर्वंफलदंमेस्तुभुक्तिमुक्त्यर्थदेहिमे॥ लक्ष्मित्वत्प्रज्ञयानित्यंकृतापूजातवा
ज्ञया॥ स्थिराभवगृहेह्यस्मिन्ममसंतानकारिणी॥ न्यूनंवाप्यधिकंवापियन्मयामोहतःकृतं॥ सर्वंतदस्तुसंपूर्णंत्वत्प्रसादान्महे
श्वरि॥ ममाभीष्टप्रदानित्यंभवसुप्रीतमानसा॥ इतिप्रार्थना॥ (अथवा आवाहनं०॥ मंत्रहीनं०॥ महिषघ्निमहामायेचामुं ॥ ६२ ॥
डेमुंडमालिनि॥ द्रव्यमारोग्यविजयंदेहिदेविनमोस्तुते॥ भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहेश्वरि॥ देवेभ्योमानुषेभ्यश्चभयेभ्यो
रक्षमांसदा॥ कुंकुमेनसमालब्धेचंदनेनविलेपिते॥ बिल्वपत्रकृतापीडेदुर्गेत्वांशरणंगतः॥ सर्वमंगल०॥ रूपंदेहि०॥ दुर्गे

स्मृता० ॥ प्रार्थनां ॥) ततोदुर्गास्तोत्रपाठार्थंब्राह्मणंवृत्वास्वयंवाकृत्वावैदिकमागमोक्तंवादुर्गामंत्रंयथाशक्तिजपित्वा ॥ गुह्यातिगु
ह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं ॥ सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि ॥ इतिदेव्यैजपंनिवेद्य तस्याउपरिपुष्पमालांबध्नीयात् ॥
मंत्रः ॥ ग्रथितांतिलकह्लारजातिमंदारचंपकैः ॥ पुष्पमालांप्रयच्छामिप्रथमेह्नितवांबिके ॥ यद्वा ॥ मालाहिसर्वदेवानांप्रीतिदा
शुभदायतः ॥ लंबितासौमयाभक्त्यागृहाणजगदंबिके ॥ द्वितीयादिदिनेषु द्वितीयेह्नि तृतीयेह्नीत्याद्यूहनीयं ॥ ततो द्विवर्षादि
दशवर्षांतांषोडशवर्षांतांवाऽप्राप्तरजस्कामुक्तलक्षणांकन्यांपादप्रक्षालनपूर्वकंरम्यासनउपवेश्य ॥ मंत्राक्षरमयींलक्ष्मींमातृणांरूपधा
रिणीं ॥ नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं ॥ इतिमंत्रेणावाह्यगंधपुष्पहरिद्राकंचुकादिभिस्तांसंपूज्यशनैःपायसाद्यन्नंभो
जयेत् ॥ ब्राह्मणभोजनमपिशक्त्याकुर्यात् ॥ अन्येविशेषाः कौस्तुभादौज्ञेयाः ॥ इतिनवरात्रपूजा ॥ ॥ ॥ छ ॥

॥ ४९ ॥ नवरात्रोत्थापनम् ॥ तत्रयथाकुलाचारमष्टम्यांनवम्यांदशम्यांवाविसर्जनदिनेसंकल्पादिकृत्वानित्यवद्देवदेवीपू
जांतेतांप्रणम्यकृताञ्जलिः ॥ दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियां ॥ सर्वलोकप्रणेत्रींतांप्रणमामिसदाशिवां ॥ इत्यादिस्तोत्रैः
स्तुत्वा महिषघ्नीत्याद्युक्तमंत्रैःप्राथ्यं ॥ विधिहीनंक्रियाहीनंभक्तिहीनंयदर्चितं ॥ पूर्णंभवतुतत्सर्वंत्वत्प्रसादान्महेश्वरि ॥ मातः
क्षमस्वेत्युक्त्वा ॐ दुर्गायैनमइत्यैशान्यामेकपुष्पनिक्षेपेणविसर्जयेत् ॥ स्थापितकलशोदकेनयजमानाभिषेकः ॥ ततोमृदादिमू
र्तिंसत्त्वेस्रोतसितत्प्रवाहणंकर्तुमुत्थापयेत् ॥ तत्रमंत्रः ॥ उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच ॥ कुरुष्वममकल्याणमष्टाभिःश
क्तिभिःसह ॥ गच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके ॥ व्रजस्रोतोजलेवृद्ध्यैतिष्ठगेहेचभूतये ॥ ततोगीततूर्यमंत्रघोषैःस्रोतोजलं

नीत्वा ॥ दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिता ॥ संवत्सरेव्यतीतेतुपुनरागमनायवै ॥ पूजामिमांमयादेवियथाशक्तिनिवे
दितां ॥ रक्षणार्थंसमादायव्रजस्थानमनुत्तमं ॥ इतिस्रोतसिप्रवाह्यतन्मनागृहमेत्यहस्तपादौप्रक्षाल्याचम्यपूजास्थानेयजमानःसपरि
वारउपविश्यविप्रभोजनादिसमाप्यबंधुभिःसहभुंजीत ॥ इतिशारदानवरात्रपूजाविधिःसविस्तरःसंपूर्णः ॥ ॥ ॥ छ ॥

॥ ५० ॥ उपांगललितापूजा ॥ व्रतकर्ताप्रातःसमुत्थाययथाविधिशौचाचमनादिकृत्वाअपामार्गकाष्ठैर्दंतधावनंकुर्यात् ॥
अपामार्गप्रार्थना ॥ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इतिमंत्रेणकाष्ठंगृहीत्वागंगादिती
र्थंगत्वादेशकालौसंकीर्त्यउपांगललिताव्रतांगत्वेनदंतधावनपूर्वकंअपामार्गपत्रैःअष्टाचत्वारिंशत्स्नानानिकरिष्ये ॥ दंतधावनमंत्रः ॥
मुखदुर्गंधिनाशायदंतानांचविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ ततोयथाविधिस्नात्वाप्रातराह्निकंकुर्यात् ॥ दुर्वा
प्रार्थना ॥ दूर्वेअमृतसंपन्नेशतमूलेशतांकुरे ॥ शतंनाशयपापानिशतमायुष्यवर्धनं ॥ त्वंदूर्वेअमृतोत्पन्नेवंदितासिसुरासुरैः ॥
सौभाग्यसंपदोदेहिसर्वकामफलप्रदे ॥ यथाशाखाप्रशाखाभ्यांविस्तृतासिमहीतले ॥ तथाममापिसंतानंदेहित्वमजरामरे ॥ एवंमं
त्रैर्दूर्वांगृहीत्वागृहमागत्यमध्याह्नेमंगलस्नानंकृत्वावस्त्राभरणाद्यभियुक्तःसन्मंडपिकामध्येप्राङ्मुखःसपत्नीकउपविश्य आचम्यप्रा
णानायम्यदेशकालौसंकीर्त्य अस्माकमित्यादिममसर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यविच्छिन्नसंततिवृद्धिस्थिर
लक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थंश्रीउपांगललितादेवताप्रीत्यर्थंदेशकालानुसारतःयथाशक्तियथाज्ञानेनयथामिलितो
पचारद्रव्यैःध्यानावाहनादिषोडशोपचारपूजांकरिष्ये ॥ तदंगत्वेनकलशार्चनंशंखार्चनंघंटार्चनंपुरुषसूक्तेनश्रीसूक्तेनचन्यासादि

करिष्ये ॥ गणपतिंसंपूज्य ॥ पृथ्वीत्यादिआसनेउपविश्य ॥ आधारशक्त्यैनमः कूर्मायनमः अनंताय० वराहाय० पृथिव्यैनमः इत्यासनंसंपूज्य ॥ अपसर्पंतु० अपक्रामंतु० इतिमंत्राभ्यांभूतान्युत्सार्य ॥ भूर्भुवःस्वरोमित्यासनेउपविश्य ॥ इतिदिग्बंधः ॥ तीक्ष्णदंष्ट्रमहाकायेति भैरवानुज्ञांगृहीत्वान्यासान्कुर्यात् ॥ ऋष्यादिन्यासः ॥ लक्ष्मींदिरासुतऋषिभ्योनमः शिरसि ॥ अनुष्टु बादिछंदोभ्यो० मुखे ॥ महालक्ष्म्यै० हृदये ॥ स्वरादिभ्यो० गुह्ये ॥ अणिमादिभ्यो० पादयोः ॥ अर्धचंद्रकलिकायै० सर्वांगे॥ अथषडंगन्यासः॥ हिरण्यायैनमः अंगुष्ठाभ्यांन० हृदयाय०॥ चंद्रायै० तर्जनीभ्यां० शिरसेस्वाहा ॥ रजतस्रजायै० मध्यमाभ्यां० शिखायै० ॥ हिरण्यस्रजायै० अनामिकाभ्यां० कवचायहुं ॥ हिरण्याक्ष्यै० कनिष्ठिकाभ्यां० नेत्रत्रयायवौषट् ॥ हिरण्यवर्णायै० करतलकरपृष्ठाभ्यां० अस्त्रायफट् ॥ ततः पुरुषसूक्तन्यासः ॥ श्रीसूक्तन्यासः ॥ हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य आद्यमंत्रस्यलक्ष्मीऋषिःउत्तरचतुर्दशमंत्राणामानंदकर्दमचिक्लीतेंदिरासुताऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतुर्थी बृहती पंचमीषष्ठ्यौत्रिष्टुभौसप्ताद्याअनुष्टुभः अंत्याप्रस्तारपंक्तिःव्यंजनानिबीजानिस्वराःशक्तयःबिंदवःकीलकं ममअलक्ष्मीपरिहारार्थेलक्ष्मीप्राप्त्यर्थेश्रीसूक्तन्यासेपूजायांचवि० ॥ ॐ हिरण्यवर्णांहरिणीं०॥ मूर्ध्नि तांमआवह० नेत्रयोः ॥ ॐ अश्वपूर्वां० कर्णयोः ॐकांसोस्मितां० नासिकयोः॥ ॐचंद्रांप्रभासां० मुखे॥ॐआदित्यवर्णे० कंठे ॥ॐउपैतुमां० हृदये॥ॐक्षुत्पिपासा० नाभौ ॥ ॐगंधद्वारां०गुह्ये॥ ॐमनसःकाम० अपाने॥ॐकर्दमेन० ऊर्वोः॥ॐआपःस्रजंतु० जान्वोः॥ॐआर्द्रांयःक० जंघयोः॥ॐआर्द्रांपुष्क० गुल्फयोः॥ॐतांमआवह० पादयोः ॥ ततःकलशादिपूजांते स्वपुरतःमहीद्यौरित्यादिमंत्रैःकलशंप्रतिष्ठाप्यउदकमापूर्यमुक्ताफलादिगंधाक्षतफलहिर

ण्यंचतत्तन्मंत्रैर्निक्षिप्य अश्वत्थेवइत्याम्रपल्लवंनिधाय पूर्णादर्वीतिमंत्रेणपूर्णपात्रंनिधाय तस्योपरिवस्त्रंप्रसार्यगंधादिनाअष्टदलंविलि
ख्यद्वारपूजांकुर्यात् ॥ पूर्वद्वारे ॐगं गणपतयेनमः दक्षिणेद्वारे ॐक्षं क्षेत्रपालाय० वामे ॐवं बटुकाय० अधः ॐयों योगिनीभ्यो० ॥
पूर्वादिचतुर्द्वारेषु पूर्वे ॐगं गंगायै० दक्षिणे ॐयं यमुनायै० पश्चिमे ॐश्रीं श्रियै० उत्तरे ॐ ऐंसरस्वत्यै० एवंद्वारचतुष्टयं संपूज्य
पीठपूजांकुर्यात् ॥ पूर्वे कामगिरिपीठाय० पश्चिमे जालंधरपीठाय० उत्तरे वीड्यानपीठाय० पूर्वदले ॐगं गणपतये० ॐक्षं क्षेत्र
पालाय० ॐमं मंडूकाय० ॐवं बटुकभैरवाय० ॥ आग्नेयदले जयायै० विजयायै० जयंत्यै० अपराजितायै० ॥ दक्षिणे चेतनायै०
बुद्ध्यै० निद्रायै० क्षुधायै० ॥ नैर्ऋत्यदले शक्त्यै० तृष्णायै० क्षांत्यै० जात्यै० लज्जायै० ॥ पश्चिमदले शांत्यै० श्रद्धायै० कीर्त्यै०
लक्ष्म्यै० धृत्यै० प्रीत्यै० ॥ वायव्यदले स्मृत्यै० छेदायै० तुष्ट्यै० मात्रे० ॥ उत्तरदले छायायै० शांत्यै० तृष्णायै० श्रद्धायै० ॥ ईशानदले
क्षुधायै० निद्रायै० दयायै० स्मृत्यै० ॥ एताःपंचविंशतिदेवताः अष्टदलेषुस्थापयेत् ॥ पीठमध्यभागे ॥ ॐकूर्मायनमः आधारशक्त्यै०
शेषाय० पृथिव्यै० पद्माय० संविन्नालाय० पद्मनाभाय० अनंताय० एताअष्टदेवताअष्टदलेषुस्थापयेत् ॥ अथाष्टदलेषुद्वेद्वे
देवतेआवाहयेत् ॥ ब्राह्म्यै० हंसवाहिन्यै० माहेश्वर्यै० वृषभारूढायै० कौमार्यै० मयूरवाहनायै० वैष्णव्यै० गरुडवाहनायै०
वाराह्यै० दंष्ट्रोद्धृतवसुंधरायै० नारसिंह्यै० ऐंद्र्यै० गजारूढायै० स्कंदगणेशयुतायै० चामुंडायै० मुंडमथनायै० ॥ कर्णिकायां
मध्ये ब्राह्म्यै० नंदजायै० हेमगर्भायै० सुरक्तायै० रक्तदंतिकायै० शाकंभर्यै० नीलपत्रासिन्यै० धरायै० तेजोमंडलदुर्धर्षायै०
अजितायै० महाकाल्यै० महालक्ष्म्यै० महासरस्वत्यै० मध्ये श्रीउपांगललितायै० इतिपीठपूजा ॥ ततःसुवर्णादिप्रतिमादौ ॥

निजासनेतियुक्तासिललितेभक्तवत्सले ॥ उपांगललितेनुज्ञांदेहिमेव्रतसिद्धये ॥ इतिव्रतानुज्ञांगृहीत्वा ॥ अथध्यानं ॥ नीलकौशे यवसनांहेमाभांकमलासनां ॥ भक्तानांवरदांनित्यंललितांचिंतयाम्यहं ॥ श्रीललितांध्यायामि ॥ ॐ सहस्रशीर्षा० ॐ हिरण्यवर्णां० ॥ आगच्छललितेदेविसर्वसंपत्प्रदायिनि ॥ यावद्व्रतंसमाप्येततावत्त्वंसंनिधाभव ॥ आवाहयामि ॥ ॐ पुरुषएवेदं० ॐ तांमआवह० ॥ कार्तस्वरमयंदिव्यंनानामणिगणान्वितं ॥ अनेकशक्तिसंयुक्तमासनंप्रतिगृह्यतां ॥ आसनं० ॥ ॐ एतावानस्य० ॐ अश्वपूर्वां० ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं ॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां ॥ पाद्यं० ॥ ॐ त्रिपादूर्ध्व० ॐ कांसोस्मितां० ॥ निधीनांसर्वरत्नानांत्वमनर्घगुणाह्यसि ॥ तथापिभक्त्याराधेत्वांगृहाणार्घ्यंनमोस्तुते ॥ अर्घ्यं० ॥ ॐ तस्माद्विरा० ॥ ॐ चंद्रांप्रभासां० ॥ पाटलोशीरकर्पूरसुरभिस्वादुशीतलं ॥ तोयमाचमनीयार्थंललितेप्रतिगृह्यतां ॥ आचमनीयं० ॥ ॐ यत्पुरुषेण० ॐ आदित्यवर्णे० ॥ तापत्रयहरंदिव्यंपरमानंदलक्षणं ॥ तापत्रयविनिर्मुक्तललितेप्रतिगृह्यतां ॥ मलापकर्षस्नानंस० ॥ पयोदधिसमायुक्तंमधुपर्कंमयाहृतं ॥ महालक्ष्मीस्वरूपेणललितेप्रतिगृह्यतां ॥ मधुपर्कं० ॥ पंचामृतंमयानीतंपयोदधिघृतंमधु ॥ शर्करादिसमायुक्तंस्नानार्थंप्रतिगृह्यतां ॥ आप्यायस्वेत्यादिमंत्रैःपृथक्पंचामृतस्नानांतेपूर्वपूजांसमाप्य पुरुषसूक्तेनश्रीसूक्तेनचमहाभिषेकः ॥ आचमनं० ॥ तदस्तुमित्रा० गृहावैप्रतिष्ठा० इतिपीठेसंस्थाप्यपूर्वादिचतुर्दिक्षु ॥ गणपतयेनमः सप्तमातृभ्यो० दुर्गायै० क्षेत्राधिपतये० ॥ पुनःपूर्वाद्यष्टदिक्षु इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० मध्ये उपांगललितायै० उपांगललितांस्थापयामिपूजयामि ॥ ॐ तंयज्ञं० ॐ उपैतुमां० ॥ सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे ॥ मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां ॥

जगन्मात्रे० वस्त्रं० ॥ ॐ तस्माद्यज्ञात्सर्वहुतःसंभृतं० ॐक्षुत्पिपासा० ॥ मुक्तामणिगणोपेतमनर्घ्यंचसुखप्रदं ॥ त्वदर्थमुपवस्त्रंचललि
तेप्रतिगृह्यतां ॥ उपवस्त्रं० ॥ अनेकरत्नखचितंसर्वाभरणभूषितं ॥ गृहाणभूषणंदेविइष्टसिद्धिंचदेहिमे ॥ सर्वाभरणं० ॥ ॐ तस्मा
द्यज्ञात्सर्वहुतऋचः० गंधद्वारां० ॥ मलयाचलसंभूतंघनसारंमनोहरं ॥ हृदयानंदनंचारुचंदनंप्रतिगृह्यतां ॥ चंदनं० ॥ अक्षताश्च
सुरश्रेष्ठेकुंकुमाक्ताःसुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपरमेश्वरि ॥ अक्षतान्० ॥ कंठसूत्रंचसौभाग्यंतथातेपादभूषणं ॥
नासामुक्तंचजननिकुसुमंचार्पितंमया ॥ पुष्पैःकुंकुमसिंदूरैस्तांबूलैःकंठसूत्रकैः ॥ वासोभिर्भूषणैःशक्त्याललितेपूजयाम्यहं ॥ कंठ
सूत्रं० हरिद्रारं० कुंकुमंका० कालिकेकृ० कज्जलं० ॥ ॐतस्मादश्वाअ० ॐमनसःकाम० ॥ चंपकैःपारिजाताख्यैर्जातीमालतिका
दिभिः ॥ मंदारशतपत्रैश्चपूजयामिसुरेश्वरि ॥ पुष्पाणि० ॥ ॐअहिरिवभोगैः० परिमलद्रव्याणि० ॥ अथांगपूजा ॥ दुर्गायै०
पादौपूज० ॥ कपिलायै० गुल्फौ० ॥ सावित्र्यै० जानुनी० ॥ सरस्वत्यै० जंघे० ॥ भद्रकाल्यै० कटिं० ॥ मंगलायै० नाभिं० ॥
शिवायै० उदरं० ॥ क्षांत्यै० हृदयं० ॥ विश्वरूपिण्यै० बाहू० ॥ धात्र्यै० हस्तौ० ॥ स्वधायै० कंठं० ॥ महिषमर्दिन्यै०
मुखं ॥ नारायण्यै० नासिकां० ॥ रौद्रमुख्यै० श्रोत्रे० ॥ कुमार्यै० ललाटं० ॥ सिंहवाहिन्यै० नेत्रे० ॥ कालरात्र्यै० शिरःपूज० ॥
श्रीउपांगललितायै० सर्वांगंपू० ॥ अथावरणपूजा० ॥ महाविद्यायै० जगन्मात्रे० महालक्ष्म्यै० शिवप्रियायै० विष्णुप्रियायै० ॥ ६५ ॥
शुभायै० शांतायै० सिद्धायै० सिद्ध्यै० सरस्वत्यै० क्षमायै० कांत्यै० प्रभायै० ज्योत्स्नायै० पार्वत्यै० सर्वमंगलायै० ॥ अभी
ष्टसिद्धिंमेदेहिशरणागतवत्सले ॥ भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनं ॥ अनेन० ॥ १ ॥ हिंगुलायै० चंडिकायै० दांतायै०

पद्मायै० लक्ष्म्यै० हरिप्रियायै० त्रिपुरमर्दिन्यै० नंदिन्यै० सुनंदायै० सुरवंदितायै० महामायायै० वेदमात्रे० सुधायै० धृत्यै० प्रीत्यै० प्रियायै० प्रसिद्धायै० मृडान्यै० ॥ अभीष्ट० द्वितीयाव० २ ॥ विंध्यवासिन्यै० हिमाचलवासिन्यै० पद्मायै० पृथिव्यै० नारदसेवितायै० पुरुहूतायै० प्रियायै० कांत्यै० कामिन्यै० पद्मलोचनायै० प्रह्लादिन्यै० महामात्रे० दुर्गायै० दुर्गतिनाशिन्यै० ज्वालामुख्यै० सुनेत्रायै० ॥ अभीष्टसिद्धिं० तृतीयाव० ३ ॥ कुमुदवासिन्यै० दुर्गमायै० दुर्लभायै० विद्यायै० स्वर्गवत्यै० त्रिपुरवासिन्यै० अपर्णायै० शांभव्यै० मायायै० मदिरायै० मृदुहासिन्यै० नारायण्यै० महानिद्रायै० योगनिद्रायै० प्रभाविन्यै० ॥ अभीष्टसि० चतुर्थी० ४ ॥ कालरात्र्यै० महारात्र्यै० महाकाल्यै० कुलेश्वर्यै० प्रज्ञापरिमितायै० तारायै० मधुभंजिन्यै० मधुमत्यै० तोतुलायै० तुलजायै० ताम्रायै० मनोन्मन्यै० माहेश्वर्यै० क्षीरार्णवसुतायै० हारायै० ॥ अभीष्टसि० ५ ॥ बालिकायै० हंसवाहिन्यै० शार्ङ्गाकारायै० वसुधाकारायै० चेतनायै० कोपनायै० क्षित्याधारायै० अर्धबिंबधारिण्यै० धरायै० विश्वपात्रे० कुलवत्यै० सुवस्त्रायै० प्रद्युम्नायै० सुचेतनायै० जगद्धात्र्यै० राजलक्ष्म्यै० ॥ अभीष्ट० ६ ॥ गणेशाय० सप्तमातृभ्यो० दुर्गायै० क्षेत्राधिपतये० गौर्यै० शंभुपत्न्यै० भक्तवत्सलायै० भक्तप्रियायै० मधुकैटभनाशिन्यै० शुंभमर्दिन्यै० निशुंभनाशिन्यै० भगवत्यै० मुनित्राणदायिन्यै० देवाराधितायै० विष्णुपूजितायै० महालक्ष्म्यै० ॥ अभीष्टसि० ७ ॥ महासरस्वत्यै० भुवनेश्वर्यै० दक्षकन्यायै० हिमाचलसुतायै० पार्वत्यै० भद्रकाल्यै० उमायै० चंडिकायै० कालिकायै० आर्यायै० दुर्गायै० भव्यायै० विश्वरूपायै० धात्र्यै० शाकंभर्यै० इंद्राण्यै० भूत

दायिन्यै० सारायै० रक्तबीजहंत्र्यै० अंबिकायै० शंभुपत्न्यै० ॥ अभीष्ट० ८ ॥ रक्तदंतिकायै० स्थूलायै० सूक्ष्मायै० सौम्यायै० दुष्टदैत्यनाशिन्यै० विश्वनाथायै० विधिपूजितायै० विश्ववंदितायै० लिंगधारिण्यै० ललितायै० कामचारिण्यै० विश्वकायायै० मदोत्कटायै० रंभायै० मार्गदर्शिन्यै० बिल्वप्रियायै० भद्रेश्वर्यै० रुद्राण्यै० कालिकायै० मुकुटेश्वर्यै० श्रीउपांगललितायै० ॥ अभीष्टसिद्धिं० ९ ॥ अथपत्रीपूजा ॥ देव्यै० मल्लिकापत्रं० ॥ महाशक्त्यै० जातीपत्रं० ॥ शिवायै० करवीरपत्रं० ॥ प्रकृत्यै० चूतपत्रं० ॥ भद्रायै० जंबीरपत्र ॥ निद्रायै० चंपकपत्रं० ॥ नित्यायै० पनसपत्रं० ॥ गौर्यै० पुंनागपत्रं० ॥ धात्र्यै० शमीपत्रं० ॥ ज्योत्स्नायै० अर्कपत्रं० १० ॥ चंद्ररूपिण्यै० धत्तूरपत्रं० ॥ सरस्वत्यै० बिल्वपत्रं० ॥ कल्याण्यै० कपित्थप० ॥ प्राणदायै० विष्णुक्रांतपत्रं० ॥ वृद्ध्यै० दाडिमीपत्रं० ॥ सिद्ध्यै० बदरीपत्रं० ॥ कौमार्यै० नारंगप० ॥ नैर्ऋत्यै० मालतीप० ॥ लक्ष्म्यै० अपामार्गपत्रं० ॥ शर्वाण्यै० धात्रीपत्रं० २० ॥ दुर्गायै० कदंबपत्रं० ॥ सुगंधायै० श्रीपत्रं० ॥ शारदायै० बकुलपत्रं० ॥ पार्वत्यै० नागपत्रं० ॥ ख्यातरूपिण्यै० केतकीपत्रं० ॥ कृष्णायै० शतपत्रं० ॥ सौम्यै० अर्जुनपत्रं० ॥ रौद्रायै० वटपत्रं० नित्यायै० मंदारपत्रं० ॥ चेतनायै० पाटलीपत्रं० ३० ॥ ऋद्ध्यै० शतावरीपत्रं० ॥ भगवत्यै० पलाशपत्रं० ॥ जयायै० अगस्तिपत्रं ॥ छायारूपिण्यै० भृंगराजपत्रं० ॥ शक्त्यै० शारदीपत्रं० ॥ तृष्णायै० कदलीपत्रं० ॥ बुद्ध्यै० देवदारुपत्रं० ॥ कांतरूपिण्यै० अशोकपत्रं० ॥ लज्जारूपिण्यै० तुलसीपत्रं० ॥ शांतरूपिण्यै० चंदनपत्रं० ४० ॥ सुधारूपिण्यै० दूर्वापत्रं० ॥ कांतिरूपिण्यै० कंकतीपत्रं० ॥ लक्ष्म्यै० कौमोदकीपत्रं० ॥ धृतिरूपिण्यै० कुमुदपत्रं० ॥ पार्वत्यै० गोकर्ण

पत्रं० ॥ महादेव्यै० हरिद्रापत्रं० ॥ खड्गिन्यै० सुरंगपत्रं० ॥ लज्जितायै० मातुलुंगपत्रं० ४८ ॥ इतिपत्रपूजा ॥ अथाष्टोत्तरशतनामपूजा ॥ गौर्यै० जगन्मात्रे० जनेंद्रायै० शारदायै० हंसवाहिन्यै० राजलक्ष्म्यै० वषट्कारायै० सुधारायै० राजार्चितायै० दंडिन्यै० १० ॥ क्रियावत्यै० सद्भूत्यै० तारिण्यै० श्रद्धायै० सद्गतये० शरण्यायै० सिद्ध्यै० मंदाकिन्यै० गंगायै० यमुनायै० २० ॥ सरस्वत्यै० गोदावर्यै० विपाशायै० कावेर्यै० शरयवे० चंद्रभागायै० कौशिकप्रियायै० गंडक्यै० शिवायै० नर्मदायै० ३० ॥ कर्मनाशायै० चर्मण्वत्यै० वेदिकायै० वेत्रवत्यै० वितस्तायै० वरदायै० वरवाहनायै० सत्यभूत्यै० साध्व्यै० चक्षुष्मत्यै० ४० ॥ कुंडभासिन्यै० एकचक्षुष्यै० सहस्राक्ष्यै० सुश्रोण्यै० भगमालिन्यै० सेनान्यै० श्रेष्ठायै० पताकिन्यै० गुहायै० युद्धकांक्ष्यै० ५० ॥ दयारंभायै० विपत्प्रणाशिन्यै० पंचमप्रियायै० परायै० कलायै० कांत्यै० स्त्रीशक्त्यै० मोक्षदायिन्यै० ऐंद्र्यै० ६० ॥ माहेश्वर्यै० ब्राह्म्यै० कौमार्यै० शिखिवाहिन्यै० इलायै० भगवत्यै० इक्षुधन्विन्यै० अनेकाग्रायै० कामधेनवे० कृपावत्यै० वज्रायुधायै० ७० ॥ चंडपराक्रमायै० सुपर्णायै० स्थित्यै० ईशकांतायै० संहारकायै० एकाग्रायै० महेज्यायै० शतपत्रवाहिन्यै० महाभुजायै० ८० ॥ भुजंगभूषणायै० षट्चक्रक्रमवासिन्यै० षट्चक्रक्रमभेदिन्यै० शमायै० कामस्थायै० कामभूषणायै० सुस्मितायै० सुमुखायै० क्षमायै० मूलप्रकृत्यै० ९० ॥ ऐश्वर्यै० अजायै० बहुवर्णायै० पुरुषार्थप्रकृत्यै० रक्तायै० नीलायै० श्यामायै० कृष्णायै० पीतायै० सितायैनमः १०० ॥ कर्बुरायै० कालस्वरूपायै० महादेव्यै० दुष्टदैत्यनाशिन्यै० कदंबवनवासिन्यै० शंभुपत्न्यै० पांचालिन्यै० श्रीउपांगललितायैनमः ॥ १०८ ॥ ॐयत्पुरुषं० ॐ कर्दमेनप्र

जा० ॥ देवद्रुमरसोद्भूतःकालागरुसमन्वितः॥ आग्नेयस्तेमयादत्तोधूपोयंप्रतिगृह्यतां ॥ धूपंस० ॥ ॐब्राह्मणोस्य० ॐआपःसृजंतु० ॥
चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणं ॥ आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वरि॥दीपं० ॥ ॐचंद्रमामनसो० ॐआर्द्रांयःकरिणीं० ॥
मोदकापूपलड्डूकवटकोदुंबरादिभिः ॥ सघृतंपायसान्नंचनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं० ॥ मध्येपानीयं० उत्तरापोशनं० हस्तप्रक्षा
लनं० मुखप्रक्षालनं० करोद्वर्तनार्थेचंदनं० ॥ इदंफलं० उपांगल० फलं० ॥ नागपर्णैश्चसंयुक्तंकर्पूरैलालवंगकं ॥ पूगीफलसमा
युक्तंतांबूलंप्रतिगृह्यतां ॥ तांबूलं० हिरण्यगर्भ० दक्षिणां० ॥ अथदूर्वापूजा ॥ प्रार्थनामंत्रास्तुप्रागेवलिखितास्तैः संप्रार्थनपू
र्वकमर्पयेत् ॥ दूर्वांकुरान्त्समग्रांश्चचत्वारिंशित्तथाष्टभिः ॥ अधिकान्हस्तआदायअर्पयेद्भक्तितःसुधीः ॥ अंकुरेषुगंधपुष्पाक्षतान्नि
क्षिप्य ॥ मंत्रस्तु ॥ बहुप्ररोहासततममृताहरितालता ॥ यथेयंललितेमातस्तथामेस्युर्मनोरथाः ॥ अथाष्टचत्वारिंशन्नामभिःपू
जयेत् ॥ शंभुपत्न्यैनमः दूर्वांकुरान्समर्पयामीत्येवंसर्वत्र भक्तप्रियायै० भक्ताभिलषितदायिन्यै० मधुकैटभनाशिन्यै० महिषा
सुरमर्दिन्यै० शुंभभंजिन्यै० निशुंभनाशिन्यै० भगवत्यै० मुनित्राणदायिन्यै० देवाराधितायै० १० विष्णुपूजितायै० महा
काल्यै० महासरस्वत्यै० दक्षयज्ञविध्वंसिन्यै० अंबिकायै० हिमाचलसुतायै० पार्वत्यै० भद्रकाल्यै० उमायै० चंडिकायै०
२० कमलवासिन्यै० आर्यायै० विश्वरूपायै० धात्र्यै० शाकंभर्यै० इंद्रायै० भूतिदायै० सारायै० रक्तबीजहंत्र्यै० सरस्व
त्यै० ३० शंभुशक्त्यै० सर्वेश्वर्यै० रक्तदंतिकायै० स्थूलायै० सूक्ष्मायै० सत्यसंधायै० दुष्टदैत्यनाशिन्यै० चंचलायै० विश्व
जायै० भक्ताभिलषितदायै० ४० विधिपूजितायै० विश्ववंदितायै० युद्धकांक्षिण्यै० दयारंभायै० पंचमप्रियायै० परायै०

अपरायै० मोक्षदायिन्यै० ४८॥ इतिदूर्वापूजनं ॥ ॐश्रियेजात० ॥ कौशेयवर्तिसंयुक्तंगोघृतेनसमन्वितं ॥ नीराजनंमयादत्तंगृहाणप
रमेश्वरि ॥ इतिनीराजनं ॥ ॐ नाभ्याआसी० ॐआर्द्रांपुष्करिणीं०॥ दामोदरिनमस्तेस्तुनमस्त्रैलोक्यनायिके॥ नमस्तेस्तुमहालक्ष्मि
त्राहिमांपरमेश्वरि ॥ नमोदेव्यै० नमस्कारान्०॥ ॐसप्तास्यां० ॐतांमआवह०॥ शिवेसदानंदमयेत्र्यधीश्वरिश्रीपार्वतिज्ञानघनेंबि
केशिवे ॥ मातर्विशालाक्षिभवानिसुंदरित्वामन्नपूर्णांशरणंप्रपद्ये ॥ प्रदक्षिणाः ॥ ॐयज्ञेनयज्ञ० ॐयःशुचिःप्रय० ॐयद्वाग्वदं०
ॐदेवींवाच० ॐ प्रणोदेवी० ॐ राजाधिराजाय० ॐ तदस्येष० श्रीउपांगललितायै० मंत्रपुष्पं ॥ गीतंवाद्यंनृत्यंछत्रंचामरंदर्पणंस
र्वराजोपचारार्थेअक्षतान् ॥ अथप्रार्थना ॥ नमस्तुभ्यंजगद्धात्रि० ॥ सापराधोस्मिशरणंप्राप्तस्त्वांजगदंबिके ॥ इदानीमनुकंप्योहं
यद्वांछसिकुरुष्वतत् ॥ पुत्रान्देहियशोदेहिदेहिसौभाग्यसंपदौ॥ विद्यांधनंचमेदेहिसर्वान्कामांश्चदेहिमे ॥ इतिप्रार्थना ॥ अथार्घ्य
दानं ॥ अर्घ्यपात्रेशुद्धोदकंगंधपुष्पाक्षतान्दूर्वाहिरण्यंचनिक्षिप्य ॥ अर्घ्यमंत्रः ॥ नमस्तेललितेमातर्भक्तकामप्रपूरके ॥ गृहा
णार्घ्यंमयादत्तंव्रतस्यपरिपूर्तये ॥ श्रीउपांगललितायै० इदमर्घ्यं० ॥ निधीनांसर्वरत्नानांत्वमनर्घगुणाह्यसि ॥ तथापिभक्त्या
राध्येत्वांगृहाणार्घ्यंनमोस्तुते ॥ श्रीउपांगल० इदमर्घ्यं० ॥ आवाहनंनजानामि० यस्यस्मृत्या० मंत्रहीनं० ॥ अनेनयथाशक्ति
षोडशोपचारैःकृतपूजनेनभगवत्युपांगललितादेवताप्रीयतां ॥ कर्मणःसांगतासिद्ध्यर्थंब्राह्मणपूजांकरिष्ये ॥ वायनप्रदानंचकरि
ष्ये ॥ ततोवायनमादायविंशतिवटकादिभिः ॥ भक्त्याह्येतेनमंत्रेणब्राह्मणायनिवेदयेत् ॥ उपांगललितादेव्याव्रतसंपूर्तिहेत
वे ॥ वायनंद्विजवर्यायसहिरण्यंददाम्यहं ॥ विप्रायवेदविदुषे० ॥ ततोयथाशक्तिब्राह्मणसुवासिनीदंपतीसमाराधनंकरिष्ये ॥

ततःकथांसमाकर्ण्यवाणकापूपसंख्यया ॥ स्वयमेवतदेवान्नंवाग्यतःसहबांधवैः ॥ रात्रौजागरणंकुर्यान्नृत्यगीतादिमंगलैः ॥ प्रभातेपूजयेद्देवींततःकुर्याद्विसर्जनं ॥ सवाहनाशक्तियुतावरदापूजितामया ॥ मातर्मामनुगृह्याथगम्यतांनिजमंदिरं ॥ पीठदेवतानांयांतुदेवगणाःसर्वेपूजामादायेतिविसर्जनम् ॥ इत्युपांगललितापूजा ॥ ॥ छ ॥ ॥ छ ॥

॥ ५१ ॥ रविवारपूजा ॥ ॥ प्रातरुत्थायमौनेनस्नात्वा नित्यकर्मांते नागवल्लीदलेरक्तचंदनेनद्वादशपरिधिकमर्कवद्वर्तुलंमंडलं विरच्य तत्रसंज्ञायुतंसूर्यंपूजयेत् ॥ देशका० ममसंज्ञायुतश्रीसूर्यप्रीतिद्वारासकलदौर्भाग्यदुरितदोषनिरासपूर्वकंअक्षय्यसौभाग्यकुलाभ्युदयधनधान्यसमृद्ध्यायुरारोग्यसुखाभिवृद्ध्याद्यभीष्टसिद्ध्यर्थं श्रावण(आश्विन)रविवारप्रयुक्तंसंज्ञायुतश्रीसूर्यपूजनंकरिष्ये ॥ संभारप्रोक्षणांते ध्येयःसदा० इतिध्यात्वा नाम्नापौराणमंत्रैर्वा रक्तगंधाक्षतजपापुष्पखंडशर्करायुतनारिकेलबीजनैवेद्याद्युपचारैःसंपूज्य नीराजनांते द्वादशप्रदक्षिणानमस्कारान्कृत्वापुष्पांजलिंदत्त्वा षट्तंतुनिर्मितंषड्ग्रंथियुतंरक्तसूत्रंदेवायसमर्प्य स्वकंठेबध्वाभूमौजानुनीनिपात्य रक्तगंधादियुतजलेन मित्रादिनामभिर्वक्ष्यमाणमंत्रेणवाद्वादशार्घ्याणिदद्यात् ॥ नमःसहस्रकिरण सर्वव्याधिविनाशन ॥ गृहाणार्घ्यंमयादत्तंसंज्ञयासहितोरवे ॥ ततोवायनंदत्वापरमान्नेनदंपतीसंभोजयेत् ॥ ॥ छ ॥

॥ ५२ ॥ सरस्वतीपूजा ॥ ॥ कर्तामंगलस्नानंकृत्वाक्षौमंवासःपरिधाय स्रग्वितानादिशोभितेमंडपेभद्रपीठेसर्वाणिपुस्तकानिसंस्थाप्य नित्यकर्मांतेगृहीतोपकरणआचम्यप्राणानायम्य देवादीनभिवाद्य देशकालौस्मृत्वा ममश्रीसरस्वतीप्रीतिद्वारासर्व

शास्त्रार्थविज्ञानविमलकीर्तिपुत्रपौत्राभिवृद्धिधनधान्यसंपदाद्यभीष्टसिद्ध्यर्थं मूलनक्षत्रविहितंसरस्वत्यावाहनं तदंगभूतंपूजनं चक०. गणेशपूजादिकृत्वा ॐप्रणोदेवी० ॥ अत्रागच्छजगद्वंद्येसर्वलोकैकपूजिते ॥ मयाकृतामिमांपूजांगृहाणत्वंसरस्वति ॥ सरस्वत्यैनमः सरस्वतीमावाहयामीत्यावाह्य वैदिकपौराणनाममंत्रैरेतदन्यतमेनवादेवींसंपूज्य पूर्वाषाढासुपूजनंकरिष्ये ॥ इति संकल्प्यावाहनवर्जंविविधपुष्पफलनैवेद्यादियुतंपूजनंकार्यं ॥ तत्र ध्यानमंत्रस्त्रिपुरासिद्धांते ॥ सुरासुरैःसेवितपादपंकजाकरे विराजत्कमनीयपुस्तका ॥ विरिंचिपत्नीकमलासनस्थितासरस्वतीनृत्यतुवाचिमेसदा॥[1] ॐसहस्र० ॥ अत्रागत्यजगद्वंद्येसर्वलोकैक पूजिते॥ मयाकृतामिमांपूजांगृहाणजगदीश्वरि॥ ॐ सरस्वत्यैआवाहनाभावात्पुष्पंसमर्प्य ॥ ॐपुरुष०॥ अनेकरत्नसंयुक्तंसुवर्णेन विराजितं ॥ मुक्तामण्यंकितंचारुआसनंतेददाम्यहं ॥ आसनं०॥ ॐ एतावा० ॥ गंधपुष्पाक्षतैर्युक्तंशुद्धतोयेनसंयुतं॥ शुद्धस्फटि कतुल्यांगिपाद्यंतेप्रतिगृह्यतां ॥ पाद्यं०॥ ॐत्रिपादू० ॥ भक्ताभीष्टप्रदेदेविदेवदेवादिवंदिते ॥ आधारादिजगद्धात्रिददाम्यर्घ्यंगृ हाणमे॥ अर्घ्यं ॥ ॐतस्माद्विराळ०॥ पूर्णचंद्रसमानास्येकोटिसूर्यसमप्रभे॥ भक्त्यासमर्पितंतुभ्यंगृहाणाचमनीयकं॥ आचमनीयं०॥ ॐयत्पुरुषेण०॥ सुवर्णकलशानीतैर्नानागंधसुवासितैः॥ शुद्धोदकैःस्नानमिदंस्वीकुरुष्वसुरेश्वरि ॥ स्नानं०॥ कमलभवनजायेकोटि

---

१ ध्यानांतरं।।प्रणवासनमारूढांतदर्थत्वेननिश्चितां।।अंकुशंचाक्षसूत्रंचपाशपुस्तकधारिणीं ॥ मुक्ताहारसमायुक्तांमोदरूपांमनोहरां ॥ सितेनदर्पणाभेन वक्रेणपरिशोभितां।।सुस्तनींवेदमध्यांतांचंद्रार्धकृतशेखरां।।जटाकलापसंयुक्तांपूर्णचंद्रनिभाननां ॥ त्रिलोचनांमहादेवींस्वर्णनूपुरधारिणीं ॥कटकैःस्वर्ण रत्नाढ्यैर्महावलयशोभितां।।कंबुकंठींसुताम्रोष्ठींसर्वाभरणभूषितां ॥ केयूरैर्मेखलाद्यैश्चद्योतयंतींजगत्त्रयं ॥ शब्दब्रह्मात्मिकांध्यायेध्यानकामःसमाहितः॥

सूर्यप्रकाशेशिवदशुचिविलासेकोमलाहारयुक्ते ॥ दधिमधुघृतयुक्तःस्वर्णपात्रस्थितोयःशुचिरयिमधुपर्कोगृह्यतांवेदवंद्ये ॥ मधुप र्कं०॥ दधिक्षीरघृतोपेतंशर्करामधुसंयुतं ॥ पंचामृतस्नानमिदंस्वीकुरुष्वसुरेश्वरि ॥ पंचामृतस्नानं०॥ महाभिषेकः॥ ॐ तंयज्ञं०॥ शुक्लवस्त्रद्वयंदेविविमलंकुटिलालके ॥ भक्त्यासमर्पितंवाणिब्रह्माणिप्रतिगृह्यतां ॥ वस्त्रं० ॥ ॐ तस्माद्यज्ञा० ॥ शब्दब्रह्मारणे देविशब्दशास्त्रकृतालये ॥ ब्रह्मसूत्रंगृहाणत्वंब्रह्मशक्रादिपूजिते ॥ कंठसूत्रं० ॥ कटकमुकुटहारैर्नूपुरैरंगदाद्यैर्विविधमणिसुयु क्तैर्मेखलामुक्तहारैः ॥ कमलवनविलासेकामदेत्वंगृहाणप्रकटितकरुणार्द्रैर्भूरिशोभूषणानि ॥ आभरणानि० ॥ ॐ तस्माद्य० श्री खंडंचंदनं० गंधं० ॥ अक्षताश्च० अक्षतान्० ॥ हरिद्रां० कुंकुमं० ॥ ॐ अहिरिव० नानापरिमलद्रव्यं० ॥ ॐ तस्मादश्वा० ॥ माल्या दीनि० पुष्पाणि० ॥ अथांगपूजा ॥ ब्रह्माण्यै० पादौपूजयामि ॥ ब्रह्मण्यमूर्तये० गुल्फौ० ॥ जगत्स्वरूपायै० जंघे० ॥ जग दादये० जानुनी० ॥ चारुविलासिन्यै० उरू० ॥ कमलभूतये० कटिं० ॥ जन्महीनायै० जघनं० ॥ गंभीरनाभये० नाभिं० ॥ वारिपूज्यायै० उदरं० ॥ लोकमात्रे० स्तनौ० ॥ विशालवक्षसे० वक्षःपू० ॥ सुविपश्चितायै० कंठं० ॥ स्कंदपूज्यायै० स्कंधौ० ॥ दीर्घसुबाहवे० बाहून्० ॥ पुस्तकधारिण्यै० हनुं० ॥ श्रोत्रियसंभवायै० श्रोत्रे० ॥ वेदस्वरूपायै० वक्त्रं० ॥ सुनासायै० नासिकां० ॥ बिंबसमानोष्ठ्यै० ओष्ठौ० ॥ कमलचक्षुषे० नेत्रे० ॥ तिलकधारिण्यै० भालं० ॥ चंद्रमूर्तये० केशा न्० ॥ सरस्वत्यै० शिरःपू० ॥ ब्रह्मरूपिण्यै० सर्वांगं० ॥ पुनरेतैर्नामभिःपुष्पाणिसमर्पयेत् ॥ ॐ यत्पुरुषं० ॥ वनस्पतिरसोद्भू० धूपं० ॥ ॐ ब्राह्मणोस्य० ॥ आज्यंचवर्तिसं० दीपं० ॥ ॐ चंद्रमा० ॥ अपूपान्विविधान्स्वादून्शालिपिष्टोपपाचितान् ॥ मृदुलान्गुड

संमिश्रान्सजीरकमरीचिकान् ॥ कदलीपनसाम्राणांसुपक्वानिफलानिच ॥ कंदमूलव्यंजनादिसोपस्करंमनोहरं ॥ अन्नंचतुर्विधोपेतंक्षीरान्नंसघृतंदधि ॥ नैवेद्यं० ॥ शीतोदकंचसुस्वादुकर्पूरैलादिवासितं ॥ मध्येमध्येगृहाणेदंकामधेनुशताधिके ॥ पानीयं ॥ ० ॥ इदंफलमितिफलं० ॥ तांबूलंचसकर्पूरंपूगनागदलैर्युतं ॥ गृहाणदेविदेवेशितत्त्वरूपेनमोस्तुते ॥ तांबूलं० ॥ हिरण्यगर्भगर्भस्थं० दक्षिणां०॥ ॐश्रियेजातः० नीराजनंगृहाणत्वंजगदानंददायिनि॥ जगत्तिमिरमार्तंडमंडलेतेनमोनमः ॥ महानीराजनदीपंकर्पूरदीपंच०॥ ततःशिष्यादिसंयुक्तः ॐनाभ्याआसी० ॥ पाहिपाहिजगद्वंद्येनमस्तेभक्तवत्सले ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः॥ इतिनमस्कुर्यात्॥ ॐसप्तास्यां० यानिकानिच० प्रदक्षिणाः॥ ॐयज्ञेन०॥ शारदेलोकमातस्त्वमाश्रिताभीष्टदायिनि॥ पुष्पांजलिंगृहाणेमंमयाभक्त्यासमर्पितं ॥ पुष्पांजलिं० ॥ पूजांतेप्रार्थयेत् ॥ पाशांकुशधरावाणीवीणापुस्तकधारिणी ॥ ममवक्त्रेवसेन्नित्यंदुग्धकुंदेंदुनिर्मला ॥ यथानदेविभगवान्ब्रह्मालोकपितामहः ॥ त्वांपरित्यज्यसंतिष्ठेत्तथाभववरप्रदा ॥ वेदाःशास्त्राणिसर्वाणिनृत्यगीतादिकंचयत् ॥ नविहीनंत्वयामातस्तथामेसंतुसिद्धयः ॥ लक्ष्मीर्मेधाधरापुष्टिर्धृतिस्तुष्टिःप्रभामतिः ॥ एताभिःपाहितनुभिरष्टाभिर्मांसरस्वति ॥ ततोब्राह्मणंसंपूज्य तस्मैचतुर्दशलड्डुकवायनंसघृतंसदक्षिणंमंत्रेणदद्यात् ॥ सरस्वति नमस्तुभ्यंवरदेभक्तवत्सले ॥ उपायनंप्रदास्यामिविद्यावृद्धिंकुरुष्वमे ॥ भारतीप्रतिगृह्णातिभारतीवैददातिच ॥ भारतीतारिकोभाभ्यांभारत्यैतेनमोनमः ॥ ततःकथांश्रुत्वाविप्रान्संभोज्य स्वजनयुतस्तैलवर्जंस्वयंचभुक्त्वा रात्रिंनृत्यगीताद्युत्सवेननयेत् ॥ एवं प्रत्यहंयथाशक्तिकार्यं ॥ अथोत्तराषाढासुबलिदानं तदंगभूतंपूजनंचसंकल्प्य पूजांतेपायसादिबलिंदत्वा श्रवणेवि

सर्जनंकर्तुंतदंगभूतंपूजनंक० ॥ पूर्ववत्संपूज्य ॥ उत्तिष्ठदेविकल्याणिगृहीत्वापूजनंमम ॥ स्वस्थानंगच्छसुभगेकामान्देहिसरस्वति ॥ इतिविसर्जयेत् ॥ इतिसरस्वतीपूजा ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ५३ ॥ महा[1]लक्ष्मीपूजा ॥ ॥ नित्यकर्मांते ॥ करिष्यामिव्रतंदेवित्वद्भक्त्यात्वत्परायणा ॥ तदविघ्नेनमेयातुसमाप्तिंत्वत्प्रसादतः ॥ इतिप्रार्थ्याचम्यदेशकालौसंकीर्त्यममश्रीमहालक्ष्मीप्राप्तिद्वाराअलक्ष्मीपरिहारपूर्वकंस्थिरसौभाग्यपुत्रपौत्रधनधान्यसमृद्धिसकलैश्वर्यदीर्घायुःक्षेमादिकल्पोक्तफलसिद्ध्यर्थंमहालक्ष्मीव्रतांगत्वेनपूजांकरिष्ये ॥ गणेशपूजादिसंभारप्रोक्षणांतेकदलीस्तंभादिमंडितेपीठेवेद्यांवाष्टदलोपरिलक्ष्मींसंस्थाप्यपूजयेत् ॥ ध्यायामितांमहालक्ष्मींकर्पूरक्षोदपांडुरां ॥ शुभ्रवस्त्रपरीधानांमुक्ताभरणभूषितां ॥ पंकजासनसंस्थानांस्मेराननसरोरुहां ॥ शारदेंदुकलाकांतिंस्निग्धनेत्रांचतुर्भुजां ॥ पद्मयुग्माभयवरव्यग्रचारुकरांबुजां ॥ अभितोगजयुग्मेनसिच्यमानांकरांबुना ॥ इतिध्यात्वाषोडशोपचारैःसंपूज्यपुष्पांजल्यंतेपात्रनिहितदोरकोपरिषोडशार्घ्यान्दत्वानमस्कुर्यात् ॥ महालक्ष्मिजगन्मातःसुखसौभाग्यदायिनि ॥ देहिमेसकलान्कामान्गृहाणार्घ्यंनमोस्तुते ॥ ततोदोरकबंधनं ॥ रात्रौवाचारात् ॥ तत्र लक्ष्म्यैनमइति दोरकंप्रतिग्रंथ्यभिमंत्र्य ॥ धनंधान्यंधरांधर्मंकीर्तिमायुर्यशःश्रियं ॥ तुरगान्दंतिनःपुत्रान्महालक्ष्मिप्रयच्छमे ॥ इतिवामकरेबध्वाप्रार्थयेत् ॥ विष्णोर्वक्षसिपद्मेचशंखेचक्रेतथांबरे ॥ लक्ष्मीदेवियथासित्वंमयिनित्यात ॥ ७० ॥

१ महाष्टम्यामिदंपंचवर्षात्मकंघटाध्मानरूपंव्रतंप्रायश्चित्तपावनकुलेप्रसिद्धमितिव्रतराजे ॥ विशेषपूजाप्रकारस्त्वग्रेयोजितलक्ष्मीपूजावज्ज्ञेयः ॥

थाभव॥ क्षीरोदार्णवसंभूतेकमलेकमलालये॥ प्रयच्छसर्वकामान्मेविष्णुवक्षःस्थलालये॥ पुत्रान्देहियशोदेहिदेहिसौभाग्यमव्ययं॥
कुरुश्रियंमहालक्ष्मिअश्रियंचाशुनाशय ॥ ततो गोधूमपिष्टनिर्मितान्षोडशलड्डुकादिभक्ष्यविशेषान्दीपांश्चसौभाग्यद्रव्यसहिता
न्वंशपात्रेनिधायविप्रायदद्यात्॥ तत्रमंत्रः॥ क्षीरोदार्णवसंभूतालक्ष्मीश्चंद्रसहोदरी॥ व्रतेनानेनमेदेवीप्रीयतांविष्णुवल्लभा॥ इंदिरा
प्रतिगृह्णातिइंदिरावैददातिच ॥ इंदिरातारकोभाभ्यामिंदिरायैनमोनमः ॥ ततः सुवासिनीभ्योहरिद्राकुंकुमवस्त्रादिदत्वाश
क्त्याविप्रान्संभोज्यकथांश्रुत्वास्वयंचदीपपिंडिकासहितंभुक्त्वारात्रौजागरोत्सवंकृत्वाप्रातर्देवींसंपूज्यलक्ष्मीर्देविगृहाणत्वंदोरकंय
न्मयाधृतं ॥ व्रतंसंपूर्णतांयातुकृपांकुरुसदामयि ॥ इतिदोरकमुत्तार्यदेव्यग्रेनिधायदेवींविसर्जयेत् ॥ पंकजंदेविसंत्यज्यमम
वेश्मनिसंविश॥ यथासपुत्रभृत्याहंस्वस्थास्यांत्वत्प्रसादतः॥ इतिसंप्रार्थ्यनमेत्॥ इतिमहाष्टम्यांविहितामहालक्ष्मीपूजा॥ ॥
॥ ५४ ॥ अथापराजितापूजा ॥ ॥ अपराह्णेग्रामादैशान्यामाचमनादिकृत्वा ममसपरिवारस्यक्षेमायुःपुष्टिमहैश्वर्यविजयसं
पदाद्यभीष्टसिद्धिद्वाराश्रीपरमे० अपराजितापूजनंक० (राजातु दुरितनाशसकलशत्रुपराभवपूर्वकंविजययशःश्रेयोर्थबलसंप
दभिवृद्धिधनधान्यसमृद्ध्याद्यभीष्टसिद्ध्य इत्यादिवदेत्) ॥ गणेशपूजांते उपलिप्तभूमौचंदनादिनालिखिताष्टदलपद्मेमध्येमृ
न्मयींलतारूपां अपराजितायैनमइत्यपराजितां तद्दक्षिणेक्रियाशक्त्यैनमइतिजयां वामेउमायैनमइतिविजयांचावाह्य षोड
शोपचारैःसंपूज्यनत्वा॥ इमांपूजांमयादेवियथाशक्तिनिवेदितां॥ रक्षणार्थंसमादायव्रजस्वस्थानमुत्तममितिविसृजेत्॥ राजा
तुप्रणामांते॥ चारुणामुखपद्मेनविचित्रकनकोज्वला॥ जयादेवीशिवेभक्तासर्वकामान्ददातुमे॥ कांचनेनविचित्रेणकेयूरेणवि

राजिता ॥ विजयातुमहाभागाकरोतुविजयंमम ॥ हारेणसुविचित्रेणभास्वत्कनकमेखला ॥ अपराजितारुद्रभक्ताकरोतुविजयं मभेतिप्रार्थ्य हरिद्रारंजितवस्त्रेदूर्वायुतसिद्धार्थान्प्रदक्षिणंवलयाकारेणाबध्य ॥ सदापराजितेयस्मात्त्वंलतासूत्तमामता ॥ सर्वकामार्थसिद्ध्यैत्वांतस्मात्पूजितवानहं ॥ भवापराजितेदेविममसर्वसमृद्धये ॥ पूजितायांत्वयिश्रेयोममास्तुदुरितंहतमिति तद्वलयमभिमंत्र्य ॥ जयदेवरदेदेविदशम्यामपराजिते ॥ धारयामिभुजेदक्षेजयलाभाभिवृद्धये ॥ बलमाधेहिवलयंमयिशत्रौपराभवं ॥ त्वद्धारणाद्भवेयुर्मेधनधान्यसमृद्धयः ॥ इतिदक्षिणभुजेधृत्वाप्राग्वद्विसृजेत् ॥ ॥ छ ॥ ॥ छ ॥

॥ ५५ ॥ शमीपूजाअश्मंतकपूजाच ॥ ॥ततः सर्वेजनाग्रामाद्बहिरैशानदिक्स्थांशमीमभावेऽश्मंतकंवापूजयेयुः ॥ सीमोल्लंघनंत्वस्मात्प्राक्पश्चाद्वाकार्यं ॥ राजात्वश्वमारुह्यसामात्यपुरोहितःशमीमूलंगत्वावतीर्यदेशकालौस्मृत्वा ममसपरिवारस्यनिखिलदुरितामंगलाधिव्याधिदुःखनिरासपूर्वकं यात्रायांविजयक्षेमैश्वर्यायुरारोग्यसौमंगल्याद्यभीष्टसिद्धिद्वाराश्रीपरमे० शमीपूजनंक० (शम्यलाभेऽश्मंतकपूजनं०) गणेशपूजास्वस्तिवाचनांते शमीमूलेदिक्पालान्वास्तुदेवतांचसंपूज्य ॥ अमंगलानांशमनीं शमनींदुष्कृतस्यच ॥ दुःस्वप्रणाशिनींधन्यांप्रपद्येहंशमींशुभां ॥ इतिशमींध्यानादिभिः संपूज्य प्रार्थयेत् ॥ शमीशमयतेपापं शमीलोहितकंटका ॥ धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी ॥ करिष्यमाणयात्रायांयथाकालंसुखंमया ॥ तत्रनिर्विघ्नकर्त्रीत्वं भवश्रीरामपूजिते ॥ अश्मंतकपूजनेतु ॥ अश्मंतकमहावृक्षमहादोषनिवारण ॥ इष्टानांदर्शनंदेहिकुरुशत्रुविनाशनं ॥ इतिप्रार्थ्यराजाशत्रोर्मूर्तिंकृत्वाशस्त्रेणविध्येत् ॥ ततःशमीमूलगतामार्द्रांसाक्षतांमृदमादायमंगलगीततूर्यघोषैःसहगृहमेत्यवस्त्राभरणा

दिस्वजनैः सहधृत्वास्त्रीभिर्नीराजितोविप्रेभ्योदक्षिणांतांबूलंचदत्वाशिषोगृहीत्वासर्वान्गृहंप्रतिविसृजेत् ॥ ॥ छ ॥

॥ ५६ ॥ छत्रशस्त्रादिपूजनं ॥ ॥ आचम्यदेशकालावुच्चार्यममसपरिवारस्यकीर्त्यायुर्यशोबलविजयादिलौहाभिसारिककर्मकल्पोक्तफलावाप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंच्छत्रचामरगजाश्वादिराजचिह्नपूजांकरिष्येइतिसंकल्प्यछत्रचामरादिदेवताभ्योनमइतिमंत्रेणपूजयित्वाप्रार्थयेत् ॥ तत्रपृथक्पृथक्मंत्राः ॥ यथांबुदश्छादयतिशिवायेमांवसुंधरां ॥ तथाच्छादयराजानंविजयारोग्यवृद्धये ॥ इतिछत्रस्य १ ॥ शशांककरसंकाशक्षीरडिंडीरपांडुर ॥ प्रोत्सारयाशुदुरितंचामरामरदुर्लभ ॥ इतिचामरस्य २ ॥ शक्रकेतोमहावीर्यश्यामवर्णार्चयाम्यहं ॥ पत्रिराजनमस्तेस्तुयथानारायणध्वज ॥ काश्यपेयारुणभ्रातर्नागारेविष्णुवाहन ॥ अप्रमेयदुराधर्षरणेदेवारिसूदन ॥ गरुत्मान्मारुतगतिस्त्वयिसन्निहितोयतः ॥ साश्ववर्मायुधान्योधान्रक्षत्वंचरिपून्दह ॥ इतिध्वजस्य ३ ॥ हुतभुग्वसवोरुद्रावायुःसोमोमहर्षयः ॥ नागकिन्नरगंधर्वयक्षभूतगणग्रहाः ॥ प्रमथस्तुसहादित्यैर्भूतेशोमातृभिःसह ॥ शक्रःसेनापतिःस्कंदोवरुणश्चाश्रितस्त्वयि ॥ प्रदहंतुरिपून्सर्वान्राजाविजयमृच्छतु ॥ यानिप्रयुक्तान्यरिभिरायुधानिसमंततः ॥ पतंतूपरिशत्रूणांहतानितवतेजसा ॥ हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा ॥ कालनेमिवधेयद्वद्यद्वत्त्रिपुरघातने ॥ शोभितासितथैवाद्यशोभयास्मांश्चसंचर ॥ नीलचेलामिमांदृष्ट्वानश्यंत्वाशुनृपारयः ॥ व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधिनिर्जिताः ॥ पूतनारेवतीनाम्नीकालरात्रिश्चयास्मृता ॥ दहचाशुरिपून्सर्वान्पताकेत्वंमयार्चिता ॥ इतिपताकायाः ४ ॥ असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः ॥ श्रीगर्भोविजयश्चैवधर्माधारस्तथैवच ॥ एतानितवनामानिस्वयमुक्तानिवेधसा ॥ नक्षत्रंकृत्तिकातेतु

गुरुर्देवोमहेश्वरः ॥ रोहिण्यश्चशरीरंतेदैवतंचजनार्दनः ॥ पितापितामहोदेवस्त्वंमांपालयसर्वदा ॥ नीलजीमूतसंकाशस्तीक्ष्ण
दंष्ट्रः कृशोदरः ॥ भावशुद्धोमर्षणश्चअतितेजास्तथैवच ॥ इयंयेनधृताक्षोणीहतश्चमहिषासुरः ॥ तीक्ष्णधारायशुद्धायतस्मैखड्गा
यतेनमः ॥ इतिखड्गस्य ५ ॥ सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना ॥ शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशुभं ॥ चंडिका
याःप्रदत्तासिसर्वदुष्टनिबर्हिणी ॥ तयाविस्तारिताचासिदेवानांप्रतिपादिता ॥ सर्वसत्त्वांगभूतासिसर्वाशुभनिबर्हिणी ॥ छुरिके
रक्षमांनित्यंशांतिंयच्छनमोस्तुते ॥ इतिछुरिकायाः ६ ॥ रक्षांगानिगजान्रक्षरक्षवाजिधनानिच ॥ ममदेहंसदारक्षकट्टारकन
मोस्तुते ॥ इतिकट्टारकस्य ७ ॥ सर्वायुधमहागात्रसर्वदेवारिषूदन ॥ चापमांसमरेरक्षसाकंशरवरैरिह ॥ धृतःकृष्णेनरक्षार्थंसं
हारायहरेणच ॥ त्रयीमूर्तिंगतंदेवंधनुरस्त्रंनमाम्यहं ॥ इतिधनुषः ८ ॥ प्रासपातयशत्रूंस्त्वमनयाकाममायया ॥ गृहाणजीवि
तंतेषांममसैन्यंचरक्षतां ॥ इतिकुंतस्य ९ ॥ शर्मप्रदस्त्वंसमरेचर्मसैन्येयशोद्यमे ॥ रक्षमांरक्षणीयोहंतापंनयनमोस्तुते ॥ इति
चर्मणः १० ॥ प्रोत्सारणायदुष्टानांसाधूनांरक्षणायच ॥ ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये ॥ यशोदेहिसुखंदेहिजयदोभ
वभूपतेः ॥ ताडयस्वरिपून्सर्वान्हेमदंडनमोस्तुते ॥ इतिकनकदंडस्य ११ ॥ दुंदुभेत्वंसपत्नानांघोरोहृदयकंपनः ॥ भवभूमि
पसैन्यानांतथाविजयवर्धनः ॥ यथाजीमूतघोषेणप्रहृष्यंतिचबर्हिणः ॥ तथास्तुतवशब्देनत्रस्यंत्वस्मद्विषोरणे ॥ इतिदुंदुभेः १२ ॥
पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं ॥ विष्णुनाविधृतोनित्यमतःशांतिप्रदोभव ॥ इतिशंखस्य १३ ॥ विजयोजयदोजेता
रिपुघातीशुभंकरः ॥ दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः ॥ एतेवैसन्निधौयस्मात्तवसिंहामहाबलाः ॥ तेनसिंहासनेनत्वंवेदै

मंत्रैश्चगीयसे ॥ त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरेश्वरः ॥ नमस्तेसर्वतोभद्रभद्रदोभवभूपतेः ॥ त्रैलोक्यंजयसर्वस्वसिंहास
ननमोस्तुते ॥ इतिसिंहासनस्य १४ ॥ महेंद्रनिर्मितेदिव्येदेवराजादिसेविते ॥ शिविकेपाहिमांनित्यंसदात्वंसन्निधाभव ॥ इति
शिविकायाः १५ ॥ गंधर्वकुलजातस्त्वंमाभूयाःकूलदूषकः ॥ ब्राह्मणःसत्यवाक्येनसोमस्यवरुणस्यच ॥ प्रभावाच्चहुताशस्यवर्ध
यत्वंतुरंगमान् ॥ तेजसाचैवसूर्यस्यमुनीनांतपसातथा ॥ रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच ॥ स्मरत्वंराजपुत्रत्वंकौस्तुभंचमणिं
स्मर ॥ यांगतिंब्रह्महागच्छेन्मातृहापितृहातथा ॥ भूमिहानृतवादीचक्षत्रियश्चपराङ्मुखः ॥ सूर्याचंद्रमसौवायुर्यावत्पश्यंतिदुष्कृ
तं ॥ व्रजाश्वतांगतिंक्षिप्रंतच्चपापंभवेत्तव ॥ विकृतंयदिगच्छेथायुद्धाध्वनितुरंगम ॥ रिपून्विजित्यसमरेसहभर्त्रासुखीभव ॥
इतिअश्वस्य १६ ॥ कुमुदैरावणौपद्मःपुष्पदंतोथवामनः ॥ सुप्रतीकोंजनोनीलएतेष्टौदेवयोनयः ॥ तेषांपुत्राश्चपौत्राश्चवनान्य
ष्टौसमाश्रिताः ॥ मंद्रोभद्रोमृगश्चैवगजःसंकीर्णएवच ॥ वनेवनेप्रसूतास्तेस्मरयोनिंमहागज ॥ यांतुत्वावसवोरुद्राआदित्याःस
मरुद्गणाः ॥ भर्तारंरक्षनागेंद्रस्वामिवत्प्रतिपाल्यतां ॥ अवाप्नुहिजयंयुद्धेगमनेस्वस्तिनोव्रज ॥ श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्या
ज्जवोऽनिलात् ॥ स्थैर्यंमेरोर्जयंरुद्राद्यशोदेवात्पुरंदरात् ॥ युद्धेरक्षंतुनागास्त्वांदिशश्चसहदैवतैः ॥ अश्विनौसहगंधर्वैःपांतुत्वां
सर्वतःसदा ॥ इतिगजस्य ॥ १७ ॥ छत्रादिष्वन्यतमद्येषांसद्मसुयत्सुलभंतत्संपूज्यतत्तन्मन्त्रैःप्रार्थयेत् ॥ ॥ छ ॥

॥ ५७ ॥ **कोजागरीपूजा** ॥ ॥ देशकालोत्कीर्तनांतेममलक्ष्मींद्रप्रीतिद्वारासकलदुःखदारिद्र्यनिरासपूर्वकंदीर्घायुरारोग्यपु
त्रपौत्रमहैश्वर्यसुखसंपदभिवृद्धिकुलाभ्युदयाद्यभीष्टसिद्ध्यर्थंकोजागरव्रतांगभूतंलक्ष्मींद्रपूजनंकरिष्ये ॥ आसनविधिंन्यासान्क

लशाद्यर्चनंनिर्विघ्नतायैगणपतिपूजांचक० ॥ पृथ्वीत्यादिपुरुषसूक्तन्यासांते ॥ हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्यआनंदक
र्दमचिक्लीतेंदिरासुताऋषयःश्रीरग्निश्चेत्युभेदेवते आद्यास्तिस्रोनुष्टुभः चतुर्थीबृहतीपंचमीषष्ठ्यौत्रिष्टुभौ ततोष्टावनुष्टुभः अंत्या
प्रस्तारपंक्ति व्यंजनानिबीजानि स्वराःशक्तयः बिंदवः कीलकं ममअलक्ष्मीपरिहारपूर्वकलक्ष्मीप्राप्त्यर्थेश्रीसूक्तन्यासेपूजायांचविनि
योगः ॥ ॐ हिरण्यवर्णां० मूर्ध्नि ॥ ॐ तांमआवह० नेत्रयोः ॥ ॐ अश्वपूर्वां० कर्णयोः ॥ ॐ कांसोस्मितांहिरण्य० नासिकायां ॥
ॐ चंद्रांप्रभासां० मुखे० ॥ ॐ आदित्यवर्णे० कंठे ॥ ॐ उपैतुमां० बाह्वोः ॥ ॐ क्षुत्पिपासा० हृदये ॥ ॐ गंधद्वारां० नाभौ ॥
ॐ मनसःकाम० गुह्ये ॥ ॐ कर्दमेन० अपाने ॥ ॐ आपःस्रजंतु० ऊर्वोः ॥ ॐ आर्द्रांयःकरिणीं० जान्वोः ॥ ॐ आर्द्रांपुष्करिणीं०
जंघयोः ॥ ॐ तांमआवह० पादयोः ॥ ॐयःशुचिःप्र० सर्वांगे ॥ अथांगुलिन्यासः ॥ ॐहिरण्यवर्णायैनमः अंगुष्ठाभ्यांनमः ॥ सुवर्णायै
नमःतर्जनीभ्यां० ॥ रजतस्रजायै० मध्यमाभ्यां० ॥ चंद्रायैनमः अनामिकाभ्यां० ॥ हिरण्मय्यैनमः कनिष्ठिकाभ्यां० ॥ लक्ष्म्यैन
मः करतलकरपृष्ठाभ्यां० ॥ एवंहृदयादि ॥ ततःकलशार्चनादिसंभारप्रोक्षणांतेपीठपूजा ॥ ॐ गुंगुरुभ्यो० पंपरमगुरुभ्यो० पंप
रात्परगुरुभ्यो० पंपरमेष्ठीगुरुभ्यो० ॥ वामभागे गंगणपतयेनमः दुंदुर्गायै० क्षंक्षेत्रपालाय० मध्येआधारशक्त्यै० मूलप्रकृ
त्यै० कालाग्निरुद्राय० मंमंडूकाय० कूर्माय० वराहाय० अनंताय० भूम्यै० अमृतार्णवाय० रत्नद्वीपाय० हेमगिरये० नंद
नोद्यानाय० मणिभूम्यै० रत्नमंडपाय० कल्पतरवे० रत्नसिंहासनाय० ॥ इतिसंपूज्य ॥ आग्नेयादिषु धर्माय० ज्ञानाय० वैरा
ग्याय० ऐश्वर्याय० ॥ पूर्वादिषु अधर्माय० अज्ञानाय० अवैराग्याय० अनैश्वर्याय० ऊर्ध्वंब्रह्मणेनमः अधःअनंताय० मध्ये

वास्तुपुरुषाय० इत्यावाह्य ॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय इत्यष्टौलोकपाला
नावाह्य ॥ गणपतिचतुष्टयं गणपतये० दुर्गायै० क्षेत्रपालाय० वास्तोष्पतये० चतुर्दिक्ष्वावाह्यसंपूज्य ॥ ततऐरावतारूढौलक्ष्मींद्रौ
तत्रसक्तुमिवृतितेतिलक्ष्मीं इंद्रत्वावृषभमितींद्रंचआवाहयेत् ॥ अथध्यानं ॥ यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी
गंभीरावर्तनाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीया ॥ लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैः स्नापिताहेमकुंभैर्नित्यंसापद्महस्तामपवस
तुगृहेसर्वमांगल्ययुक्ता ॥ चतुर्दंतगजारूढोवज्रपाणिःपुरंदरः ॥ शचीपतिश्चध्यातव्योनानाभूषणभूषितः ॥ श्रीलक्ष्मींद्रदेवतेध्याया
मीतिध्यात्वा ॥ ॐ हिरण्यवर्णां० ॐ सहस्रशीर्षा० ॥ आगच्छेहमहालक्ष्मिसर्वसंपत्प्रदायिनि ॥ यावद्व्रतंसमाप्येततावत्त्वंसन्नि
धाभव ॥ आवाहयामि ॥ ॐ तांमआवह० ॐ पुरुषएवेदं० ॥ अनेकरत्नसंयुक्तंनानामणिगणाचितं ॥ कार्तस्वरमयंदिव्यमासनंप्रति
गृह्यतां ॥ आसनं० ॥ ॐ अश्वपूर्वां० ॐ एतावानस्य० ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं ॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्य
तां ॥ पाद्यं० ॥ ॐ कांसोस्मितां० ॐ त्रिपादूर्ध्व० ॥ निधीनांसर्वरत्नानांत्वमनर्घ्यंगुणाह्यसि ॥ ऐरावतस्थितेदेविगृहाणार्घ्यंनमोस्तुते ॥
अर्घ्यं० ॥ ॐ चंद्रांप्रभासां० ॐ तस्माद्विराळ० ॥ कर्पूरेणसुगंधेनसुरभिस्वादुशीतलं ॥ तोयमाचमनीयार्थंलक्ष्मित्वंप्रतिगृह्यतां ॥ आ
चमनीयं० ॥ ॐ आदित्यवर्णे० ॐ यत्पुरुषेण० ॥ मंदाकिन्याःसमानीतैर्हेमांभोरुहवासितैः ॥ स्नानंकुरुष्वदेवेशिसलिलैश्चसुगंधिभिः ॥
स्नानं० ॥ दधिमधुसमायुक्तंपात्रयुग्मसमन्वितं ॥ मधुपर्कंगृहाणत्वंशुभदाभवशोभने ॥ मधुपर्कस० ॥ ॐ कनिक्रददिति सुगंध
तैलेनमंगलस्नानं० ॐ आप्यायस्वेतिपंचामृतस्नानं० ॐ आपोहिष्ठेतिशुद्धोदकस्नानं० पूर्वपूजांसमाप्य श्रीसूक्तादिभिर्महाभिषेकः ॥

तदस्तुमित्रा० गृहावैप्रतिष्ठा०॥ मध्येऐरावतस्थितलक्ष्मींद्रमूर्तिंस्थापयामि ॥ ॐउपैतु० ॐतंयज्ञं०॥ पट्टकूलयुगंदेविकंचुकेनसमन्वि
तं ॥ परिधेहिकृपाकृत्वादुर्गेदुर्गार्तिनाशिनि ॥ वस्त्रं० ॥ॐ क्षुत्पिपासा० ॐतस्माद्यज्ञात्सर्वहुतः०॥ स्वर्णसूत्रमयंदिव्यंब्रह्मणानिर्मितंपु
रा ॥ उपवीतंमयादत्तंगृहाणपरमेश्वरि ॥ उपवीतं० ॥ ॐ गंधद्वारा० ॐ तस्माद्यज्ञात्सर्वहुतऋचः०॥ श्रीखंडंचंदनं० ॥ सौभा
ग्यसूत्रंवरदेसुवर्णमणिसंयुते ॥ कंठेबध्नामिदेवेशिसौभाग्यंदेहिमेसदा ॥ कंठसूत्रंस० ॥ ताडपत्रंमयादेविहेमनिर्मितमुत्तमं ॥
कर्णाभ्यांभूषणंदेविगृहाणजगदंबिके ॥ ताडपत्रं० ॥ हारकंकणकेयूरमेखलाकुंडलादिभिः ॥ रत्नाढ्यंकुंडलोपेतंभूषणंप्रतिगृह्य
तां ॥ अलंकारान्० ॥ हरिद्रारंजितेदेविसुखसौभाग्यदायिनि ॥ तस्मात्त्वांपूजयाम्यत्रदुःखशांतिंप्रयच्छमे ॥ हरिद्रां०॥ कुंकुमं
कांतिदंदिव्यंकामिनीकामसंभवं ॥ कुंकुमेनार्चितेदेविप्रसीदपरमेश्वरि ॥ कुंकुमं० ॥ सिंदूरमरुणाभासंजपाकुसुमसंनिभं ॥
पूजितासिमयादेविप्रसीदपरमेश्वरि ॥ सिंदूरं० ॥ चक्षुभ्यांकज्जलंरम्यंसुभगेशांतिकारके ॥ कर्पूरज्योतिरुत्पन्नंगृहाणपरमे
श्वरि ॥ कज्जलं० ॥ अक्षताश्चसु० अक्षतान्० ॥ चंदनागरुकर्पूरकुंकुमंरोचनंतथा ॥ कस्तूर्यादिसुगंधांश्चसर्वांगेषुविलेपये ॥
ॐ अहिरिवेतिपरिमलद्रव्यं० ॐ मनसःकाममा० ॐ तस्मादश्वा० माल्यादीनि० पुष्पंस०॥ मुक्ताफलयुतांमालांरत्नवैडूर्यसुप्रभां ॥
माणिक्यस्वर्णग्रथितांगृह्यतांवरदेनमः ॥ रत्नमालां० ॥ पुष्पैर्नानाविधैर्दिव्यैःकुमुदैरथचंपकैः ॥ पूजार्थग्रथितातुभ्यंमालेयंप्रति
गृह्यतां ॥ पुष्पमालांसमर्प०॥ अथांगपूजा ॥ लक्ष्म्यैनमः पादौपूजयामि ॥ जयंत्यै० गुल्फौ० ॥ कात्यायन्यै जंघे० ॥ शांत्यै० गुह्यं०॥
वरदायै० नाभिं० ॥ देव्यै० स्तनौ० ॥ महाबलायै० बाहू० ॥ दैत्यनाशिन्यै० हस्तौ० ॥ ऐरावतस्थितायै० कंठं० ॥ सरस्वत्यै०

मुखं० ॥ वंशरूपिण्यै० नेत्रे० ॥ भक्तिप्रियायै० ललाटं० ॥ जगदात्मिकायै० शिरःपू० ॥ लक्ष्मींद्रसहितायै० सर्वांगंपू० ॥ अथपत्रीपूजा ॥ लक्ष्म्यैनमः चंपकपत्रंसमर्पयामि गौर्यै० करवीरपत्रं० नित्यायै० विष्णुक्रांतप० प्रकृत्यै० जातीपत्रं० सुरवंदितायै० बिल्वप० शाकंभर्यै० पारिजातप० कल्याण्यै० दाडिमीप० सिद्ध्यै० सेवंतिकाप० कौमार्यै० धत्तूरप० दुर्गायै० बकुलप० शांतिरूपिण्यै० तुलसीप० पार्वत्यै० शमीप० जगन्मात्रे० अपामार्गप० लोकवंदितायै० गोकर्णप० शांत्यै० अगस्तिप० ॥ इतिपत्रीपूजा ॥ अथपुष्पपूजा ॥ लक्ष्म्यै० सुवर्णपुष्पं० ऐरावतस्थितायै० पद्मपुष्पं० लोकवंदितायै० सेवंतिकापुष्पं० वैष्णव्यै० गोकर्णपुष्पं विद्युल्लतायै० मुनिपुष्पं० सिद्धिदायै० जपापुष्पं० वेदमात्रे० केतकीपु० जयायै० जातीपु० इंदिरायै० तगरपु० प्रकृत्यै० करवीरपु० शांत्यै० धत्तूरपु० ऋद्ध्यै० पारिजातपु० सिद्ध्यै० बकुलपु० तुष्ट्यै० विष्णुक्रांतपु० करवीरक्षेत्राधिपत्यायै० चंपकपु० ॥ इतिपुष्पपूजा ॥ अथावरणपूजा ॥ ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० लक्ष्म्यै० सिद्धिदायै० अभीष्टसिद्धिं० १ ॥ गजाननायै० सिंहमुखायै० गृध्रास्यायै० कालतुंडिकायै० उष्ट्रग्रीवायै० हयग्रीवायै० वाराह्यै० अभीष्ट० २ ॥ दुर्गायै० सिंहवाहिन्यै० महादेव्यै० कालरात्र्यै० धर्मचारिण्यै० कालिकायै० महालक्ष्म्यै० सरस्वत्यै० अभीष्ट० ३ ॥ इंद्राद्यष्टौलोकपालान्० अभीष्ट० ४ ॥ दीप्तायै० सूक्ष्मायै० जयायै० विजयायै० भद्रायै० विभूत्यै० विमलायै० आधारायै० विद्युल्लतायै० विश्वतोमुख्यै० अभीष्टसिद्धिं० ५ ॥ असितांगभैरवाय० रुरु० चंड० क्रोध० उन्मत्त० कपाल० भीषण० संहार० अभीष्ट० ६ ॥ आदित्यादिनवग्रहान् अभीष्ट० ७ ॥ इत्यावरणपूजा ॥

अथलक्ष्म्यष्टोत्तरशतनामभिः अक्षतपुष्पैःपूजाकार्या॥ ॐ कर्दमेनप्र० ॐ यत्पुरुषं०॥ दशांगंगुग्गुलंधूपंकृष्णागरुसमन्वितं॥ धूपंदे
विप्रदास्यामिलक्ष्मित्वंप्रतिगृह्यतां॥ धूपं०॥ ॐआर्पःस्रजंतु० ॐ ब्राह्मणोस्य० आज्यंचवर्तिं० दीपं०॥ ॐआर्द्रांपु० ॐचंद्रमाम०॥
मोदकापूपलड्डूकवटकोदुंबरादिभिः ॥ संयुतंपायसेनान्नंनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं० ॥ आचम्यतांत्वयादेविभक्तिंमेह्यचलांकु
रु॥ ईप्सितंमेवरंदेहिपरत्रचपरांगतिं॥ आचमनं०॥ करोद्वर्तनकंदेविसुगंधैःपरिवासितैः॥ ईप्सितंमेवरंदेहि०॥ करोद्वर्तनं०॥
पूगीफलमितितांबूलं० हिरण्यगर्भेतिदक्षिणां० इदंफलमितिफलं०॥ ॐ श्रियेजात०॥ चक्षुर्दसर्वलोकानांतिमिरस्यनिवारणं॥
आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वरि ॥ इतिनीराजनं० ॥ॐ आर्द्रांयःक० ॐ नाभ्याआसीत्० अन्यथाशरणं० नमस्कारः॥
ॐ तांमआवह० ॐसुप्तास्यां० यानिकानिच० प्रदक्षिणाः॥ ॐ यःशुचिः० ॐ यज्ञेनयज्ञ० ॐ नमोमहद्भ्योनमो०॥ नमस्तेसर्वदेवा
नांवरदासिहरिप्रिये॥ यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्चनात्॥ विचित्रैरावतस्थायभास्वत्कुलिशपाणये॥ पौलोम्यालिंगितांगा
यसहस्राक्षायतेनमः ॥ इतिमंत्रपुष्पं० ॥ गीतंवाद्यंनृत्यमि०॥ प्रार्थना॥ नमोदेव्यै०॥ समस्तसंपत्सुखदांमहाश्रियंसमस्तकल्याण
करींमहाश्रियं ॥ समस्तसौभाग्यकरींमहाश्रियंभजाम्यहंज्ञानकरींमहाश्रियं ॥ समस्तभूतांतरसंस्थितात्वंसमस्तभोक्त्रीश्वरिवि
श्वरूपे ॥ तन्नास्तियत्त्वद्व्यतिरिक्तवस्तुत्वत्पादपद्मंप्रणमाम्यहंश्रीः ॥ शांत्यैनमोस्तुशरणागतरक्षणायैकांत्यैनमोस्तुदुरितक्षयका ॥ ७५ ॥
रणायै॥ क्षांत्यैनमोस्तुकमनीयगुणाश्रयायैधात्र्यैनमोस्तुधनधान्यसमृद्धिदायै ॥ सर्वमंगलसंपूर्णासर्वैश्वर्यसमन्विता॥ आया
हिश्रीमहालक्ष्मीस्त्वत्कलामयितिष्ठतु ॥ इतिप्रार्थना ॥ पूजायायत्कृतंकर्मज्ञानतोऽज्ञानतोपिवा ॥ तत्सर्वंक्षम्यतांदेविप्रसीदपरमे

श्वरि ॥ इतिपूजासमर्पणं ॥ निधीनांसर्वरत्नानांत्वमनर्घ्यंगुणाह्यसि ॥ तथापिभक्त्यालक्ष्मित्वंगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यं दत्वा यस्यस्मृत्येतिनत्वा कर्मणःसांगतासिद्ध्यर्थंब्राह्मणपूजांकरिष्ये ॥ अनेनकोजागरव्रतपूजनेनभगवत्यौलक्ष्मींद्रदेवतेप्रीयेतां ॥ व्रतसांगतासिद्ध्यर्थंव्रतकथाश्रवणंअक्षक्रीडांचकरिष्ये ॥ नारिकेलोदकंपीत्वाअक्षक्रीडांसमारभेत् ॥ नारिकेलान्पृथुकांश्चदेवपितृभ्यः ब्राह्मणेभ्यश्चोपहारंसमर्प्यबंधुभिःस्वयंभक्षयेत् ॥ विप्रेभ्योभूयसींदत्वाशिषोग्राह्याः ॥ इतिकोजागरीपूजासंपूर्णा ॥ ॥ छ ॥

॥ ५८ ॥ कार्तिकस्नानं ॥ ॥ मुहूर्तावशिष्टरात्रौतीर्थादौगत्वाविष्णुंस्मृत्वा देशकालौ० ममानेकजन्मार्जितमहापातकादिसमस्तपापक्षयद्वाराश्रीराधादामोदरप्रीत्यर्थंकार्तिकस्नानमहंकरिष्ये इतिसंकल्प्य ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यंदत्वा ॥ कार्तिकेऽहंकरिष्यामिप्रातःस्नानंजनार्दन ॥ प्रीत्यर्थंतवदेवेशदामोदरमया सह ॥ ध्यात्वाऽहंत्वांचदेवेशजलेस्मिन्स्नातुमुद्यतः ॥ तवप्रसादात्पापंमेदामोदरविनश्यतु ॥ इतिमंत्राभ्यांस्नात्वा पुनरर्घ्यं दद्यात् ॥ तत्रमंत्रौ ॥ व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम ॥ गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन ॥ नित्यनैमित्तिकेकृष्णकार्तिकेपापनाशिनि ॥ गृहाणार्घ्यंमयादत्तं राधयासहितोहरे ॥ अर्घ्यं ॥ अयंविधिःप्रतिदिनंसमानःआदावनुदितहोमवत् ॥ मलापकर्षणनित्यस्नानंसंध्यावंदनंचकृत्वातदनंतरंकार्तिकस्नानंकुर्यादितिकमलाकरः ॥ अशक्तस्यतुकार्तिकस्नानेननित्यस्नानस्यप्रसंगसिद्धिः ॥ यथाकन्याग्निहोत्रेणनित्याग्निहोत्रस्य ॥ अपिवातंत्रं तंत्रपक्षेनित्यस्नानंकार्तिकस्नानंचतंत्रेणकरिष्यइतिसंकल्प्य नमःकमलनाभाय० इत्यर्घ्यंदत्वानित्यस्नानमंत्रान्पठित्वास्नायात् ॥ नित्यस्नानार्घ्यांतेव्रतिनःकार्तिकेमासीतिमंत्राभ्यामर्घ्यंदद्यात् ॥

॥ ५९ ॥ आकाशदीपः ॥ ॥ ममश्रीराधादामोदरप्रीतिद्वारादिव्यतेजोरूपैश्वर्यसंपदभिवृद्धिपूर्वकं समस्तपित्रुद्धारविष्णुभवनप्राप्त्यादिफलसिद्ध्यर्थं अद्यारभ्यमासपर्यंतंप्रत्यहमाकाशदीपदानंकरिष्ये ॥ ततोगृहादनतिदूरेगोमयोपलिप्तेसचंदनजलोक्षितेदेशेऽष्टदलालंकृते यथोक्तप्रमाणनिखातस्तंभोपरिघंटाष्टकस्रग्वस्त्रपताकाकलशादिशोभितंपरितोदलस्थिताष्टदीपंमध्येऽभ्रकादिकरंडस्थितंमहाप्रकाशंदीपंप्रज्वाल्यगंधादिनासंपूज्यप्रदक्षिणांते ॥ दामोदरायनभसितुलायांदोलयासह ॥ प्रदीपंतेप्रयच्छामिनमोनंतायवेधसे ॥ इतिसमर्प्यनमस्कुर्यात् ॥ अयंदीपः पूर्वजैःसहस्वोद्धारायप्रत्यब्दंप्रतिसद्मदेयः ॥ ॥ छ ॥

॥ ६० ॥ धात्रीपूजनविधिः ॥ ॥ आचम्यदेशकालोत्कीर्तनांतेममसमस्तपापक्षयपूर्वकपुत्रपौत्रादिसंततियशोबलप्रज्ञामेधासौभाग्यारोग्यविष्णुभक्तिप्राप्त्यर्थंधात्रीपूजांकरिष्ये ॥ संभारप्रोक्षणांते ॐधात्र्यैनमइतिनाममंत्रेणधात्रींहरिद्राकुंकुमादिसौभाग्यद्रव्यसमर्पणपूर्वकंषोडशोपचारैःसंपूज्यनाममंत्रैःपुष्पाणिसमर्पयेत् ॥ ॐधात्र्यै० शांत्यै० कांत्यै० मेधायै० प्रकृत्यै० विष्णुपत्न्यै० महालक्ष्म्यै० रमायै० कमलायै० इंद्राण्यै० लोकमात्रे० कल्याण्यै० कमनीयायै० सावित्र्यै० जगद्धात्र्यै० गायत्र्यै० सुधृत्यै० अव्यक्तायै० विश्वरूपायै० सुरूपायै० अब्धिभवायै० २१ इति॥ ततोधात्रीमूलेसव्येनैवमंत्राभ्यांतर्पणंकार्यं॥ पितापितामहश्चान्येअपुत्रायेचगोत्रिणः ॥ वृक्षयोनिगतायेचयेचकीटत्वमागताः ॥ रौरवेनरकेयेचमहारौरवसंज्ञके ॥ तिर्यग्योनिगतायेचयेचब्रह्मांडमध्यगाः ॥ पिशाचत्वंगतायेचयेचप्रेतत्वमागताः ॥ तेपिबंतुमयादत्तंधात्रीमूलेऽक्षयंपयः ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतुपितरःसर्वेमातृमातामहादयः ॥ ततोधात्रींसूत्रेणवेष्टयेत् ॥ दामोदरनिवासायैधात्र्यैदेव्यैनमोनमः ॥ सूत्रे

णानेनबध्नामिसर्वदेवनिवासिनीं ॥ ततोधात्र्यैनमःइतिचतुर्दिक्ष्वन्नबलीन्दत्वाऽष्टदिक्ष्वष्टौदीपान्प्रज्वाल्यसमर्पयेत् ॥ इमेदीपाम
यादत्ताःप्रदीप्ताघृतपूरिताः ॥ धात्रिदेविनमस्तुभ्यमतःशांतिंप्रयच्छमे ॥ ततोधात्रीमष्टकृत्वःप्रदक्षिणीकृत्यनमेत् ॥ धात्रिदे
विनमस्तुभ्यंसर्वपापक्षयंकरि ॥ पुत्रान्देहिमहाप्राज्ञेयशोदेहिबलंचमे ॥ प्रज्ञांमेधांचसौभाग्यंविष्णुभक्तिंचशाश्वतीं ॥ नीरोगंकु
रुमांनित्यंनिष्पापंकुरुसर्वदा ॥ सर्वस्वंकुरुमांदेविधनवंतंतथाकुरु ॥ संवत्सरकृतंपापंदूरीकुरुममाक्षये ॥ ततोघृतपूर्णंसहेमकां
स्यपात्रंब्राह्मणायदद्यात् ॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंस्मृतं ॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताः ॥ इति ॥ ॥

॥ ६१ ॥ गोवत्सद्वादशीपूजा ॥ ॥ आचम्यदेशकालौनिर्दिश्यममेहजन्मनिजन्मांतरेचअखिलकामनासिद्धिद्वारागोरोम
कोटिवर्षपर्यंतस्वर्वासकामागोवत्सद्वादशीव्रतकल्पोक्तफलावाप्तयेसवत्सगोःपूजांकरिष्ये ॥ कलशाद्यर्चनसंभारप्रोक्षणांते ॥ नमो
गोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच ॥ नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः ॥ ध्यानं ॥ आगच्छदेविकल्याणिशुभांपूजां
गृहाणच ॥ वत्सेनसहितांत्वाहंदेवीमावाहयाम्यहं ॥ आवाहनं ॥ नानारत्नसमायुक्तंकार्तस्वरविभूषितं ॥ आसनंतेमयादत्तं
गृहाणजगदंबिके ॥ श्रीरुद्ररूपिण्यैगवेनमःआसनं ॥ सौरभेयिसर्वहितेपवित्रेपापनाशिनि ॥ गृह्णीष्वैतन्मयादत्तंपाद्यंत्रैलोक्य
वंदिते ॥ पाद्यं ॥ सर्वदेवमयेदेविसर्वतीर्थमयेशुभे ॥ गृहाणार्घ्यंमयादत्तंसौरभेयिनमोस्तुते ॥ अर्घ्यं ॥ देहस्थितासिरुद्राणीशं
करस्यसदाप्रिया ॥ धेनुरूपेणसादेवीममपापंव्यपोहतु ॥ आचमनीयं ॥ यालक्ष्मीःसर्वलोकेषुयाचदेवेष्ववस्थिता ॥ धेनुरूपेण
सादेवीममपापंव्यपोहतु ॥ स्नानं ॥ संभवेपंचामृतादिदत्वामहाभिषेकः ॥ आच्छादनंगवेदद्यासम्यक्शुद्धंसुशोभनं ॥ सुरभिर्व

स्त्रदानेनप्रीयतांपरमेश्वरी ॥ वस्त्रं ॥ सर्वदेवमयेदेविचंदनंचंद्रसन्निभं ॥ कस्तूरीकुंकुमाढ्यंचसुगंधिप्रतिगृह्यताम् ॥ चंदनं ॥ अक्षताश्च० अलंकारान्सौभाग्यद्रव्याणिपरिमलद्रव्याणिच ॥ माल्यादीनिसुगंधीनि० ॥ पुष्पाणि पुष्पमालाच ॥ न्यासः ॥ शृंगमूलयोर्ब्रह्मविष्णून्यसामि शृंगाग्रयोःसर्वतीर्थानि० ललाटेमहादेवं० ललाटाग्रेमहादेवीं० नासावंशेषण्मुखं० कर्णयोरश्विनौ० चक्षुषोःशशिभास्करौ० दंतेषुवायुं० जिह्वायांवरुणं० हुंकारेसरस्वतीं० गंधयोःयमधर्मौ० ओष्ठयोः संध्याद्वयं० ग्रीवायां इंद्रं० कुक्षिदेशेरक्षांसि० उरसिसाध्यान्० चतुष्पादेषुधर्मं० खुरमध्येगंधर्वान्० खुराग्रेपन्नगान्० खुरपार्श्वेष्वप्सरसः० पृष्ठे एकादशरुद्रान्० सर्वसंधिषुवसून्० श्रोणीतटेपितॄन्० लांगूलेसोमं० वालेषुआदित्यरश्मीन्० गोमूत्रेगंगां० क्षीरेसरस्वतीं० दध्निनर्मदां० सर्पिषिहुताशनं० रोमसुत्रयस्त्रिंशत्कोटिदेवान्० उदरेपृथिवीं० पयोधरेषुसागरान्न्यसामि ॥ देवद्रुमरसोद्भूतोगोघृतेनसमन्वितः ॥ प्रयच्छामिमहाभागेधूपोयंप्रतिगृह्यतां ॥ धूपं० ॥ आनंदकृत्सर्वलोकेदेवानांचसदाप्रियः ॥ गौस्त्वमादिजगन्नाथोदीपोयंप्रतिगृह्यतां ॥ दीपं० ॥ सुरभिस्त्वंजगन्मातर्देविविष्णुपदेस्थिता ॥ सर्वदेवमयेग्रासंमयादत्तमिमंग्रस ॥ गोग्रास नैवेद्यं ॥ करोद्वर्तनार्थेचंदनं तांबूलंफलंदक्षिणांचसमर्प्य ॥ नीराज्यकर्पूरदीपंचसमर्प्य ॥ पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ॥ तासांमध्येतुयानंदातस्यैदेव्यैनमोनमः ॥ नमस्कारः ॥ यानिकानिचपापानि० इतिप्रदक्षिणाः ॥ नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच ॥ नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः ॥ पुष्पांजलिः ॥ गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेनित्यंगवांमध्येवसाम्यहं ॥ सुरभिस्त्वंजगन्मातर्नित्यंविष्णुपदेस्थिते ॥ सर्वदेवमयेदेविसर्वदेवैरलंकृते ॥ मातर्ममाभिलषितंसफलं

कुरुनंदिनि ॥ इत्यादिसंप्रार्थयेत् ॥ पुष्पांजल्यंतेताम्रपात्रेगंधपुष्पाक्षतयुतंजलंगृहीत्वा ॐमातारुद्राणांदुहितावसूनां० इद मर्घ्यमितिगोःपादमूलेविप्रोर्घ्यंदद्यात् ॥ स्त्रीशूद्रादिस्तु ॥ क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते ॥ सर्वदेवमयेमातर्गृहाणार्घ्यंनमो स्तुते ॥ इत्यर्घ्यंदद्यात् ॥ अर्घ्यदानांतेतज्जलंसाक्षतंस्वमूर्ध्निनिक्षिप्यमाषादिसिद्धान्वटकान्गोग्रासार्थंदद्यात् ॥ ॥ छ ॥

॥ ६२ ॥ गुरुद्वादशीपूजा ॥ ॥ आचमनादिदेशकालकीर्तनांतेसपरिवारस्यममधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थंश्रीपा दश्रीवल्लभश्रीगुरुदत्तात्रेयरूपीश्रीसद्गुरुप्रीत्यर्थंषोडशोपचारैः पूजांकरिष्ये ॥ यथाधिकारमासनविधिन्यासकलशाद्यर्चनसंभा रप्रोक्षणांते ध्यायेत् ॥ ब्रह्मानंदंपरमसुखदंकेवलंज्ञानमूर्तिंद्वंद्वातीतंगगनसदृशंतत्त्वमस्यादिलक्ष्यं ॥ एकंनित्यंविमलमचलंसर्व धीसाक्षिभूतंभावातीतंत्रिगुणरहितंसद्गुरुंतंनमामि ॥ काषायवस्त्रंकरदंडधारिणंकमंडलुंपद्मकरेणशंखं ॥ चक्रंगदाभूषितभूषणा ढ्यंश्रीपादराजंशरणंप्रपद्ये ॥ इत्यादिध्यात्वापुरुषसूक्तेनषोडशोपचारैर्यथाविभवंपूजयेत् ॥ सांगतासिद्ध्यैब्राह्मणभोजनंसंकल्प्य कृत्वापुराणश्रवणादिनारात्रिंनयेत् ॥ पूजायांविशेषोग्रेदत्तजयंतीप्रसंगेउक्तःसएवात्रापिग्राह्यः ॥ ॥ छ ॥ ॥ छ ॥

॥ ६३ ॥ यमदीपदानं ॥ ॥ त्रयोदश्यांसायंसंध्यावंदनोत्तरंदेशकालौसंकीर्त्य ममापमृत्युविनाशार्थंयमदीपदानंकरिष्येइति संकल्प्य तिलतैलसहितंदीपंगंधाक्षतपुष्पैरलंकृतंगृहाद्बहिर्दक्षिणस्यांदिशिनिधायमंत्रंपठेत् ॥ मृत्युनापाशदंडाभ्यांकालेनश्या मयासह ॥ त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतांमम ॥ अनेनदीपदानेनश्रीयमःप्रीयतां ॥ इतियमदीपः ॥ ॥ छ ॥

॥ ६४ ॥ नरकचतुर्दशी ॥ ॥ लांगलोद्धृतंसमूलमपामार्गवृक्षंकंटकमंजरीपत्रसहितमार्द्रं तथातुंबीवृक्षंचक्रमर्दवृक्षंचानीय

उक्तकाले देशकालौसंकीर्त्यममनरकभयपरिहारार्थं सुगंधितैलाभ्यंगपूर्वकंमंगलस्नानंकरिष्ये ॥ स्नानसमये अपामार्गादिवृक्ष त्रयंशिरःप्रभृत्यंगेषुप्रादक्षिण्येनपरितोभ्रामयेत् ॥ तत्रमंत्रः ॥ सीतालोष्टसमायुक्तसकंटकदलान्वित ॥ हरपापमपामार्गभ्राम्य माणःपुनःपुनः ॥ एवंत्रिवारंततोधिकंवाकार्यं प्रतिभ्रमणंमंत्रावृत्तिः ॥ चक्रमर्दस्तरोटाइतित्र्यंबकक्षेत्रादिषुप्रसिद्धः ॥ क्वचित् टाकळाइतिप्रसिद्धः ॥ उक्तवृक्षाणामलाभेकेवलेनापामार्गवृक्षेणैवभ्रामणंकार्यं ॥ अभ्यंगस्नानोत्तरंयमतर्पणं तच्चयज्ञोपवीति नाप्राचीनावीतिनावाकार्यं ॥ यज्ञोपवीतित्वेदेवतीर्थेनसाक्षताभिरद्भिःप्राङ्मुखेनत्रिस्त्रिःकार्यं जीवत्पितृकेणतुयज्ञोपवीतिनैवदे वतर्पणधर्मेणकार्यं ॥ ममनरकभयनिरासार्थंयमप्रसादसिद्ध्यर्थंचनरकचतुर्दश्यांयमतर्पणंकरिष्ये ॥ यमंतर्पयामि धर्मराजं० मृत्युं० अंतकं० वैवस्वतं० कालं० सर्वभूतक्षयं० औदुंबरं० दध्नं० नीलं० परमेष्ठिनं० वृकोदरं० चित्रं० चित्रगुप्तं० १४ इति॥ ततः ॥ यमोनिहंतापितृधर्मराजोवैवस्वतोदंडधरश्चकालः ॥ भूताधिपोदत्तकृतानुसारीकृतांतमेतद्दशभिर्जपंति ॥ इमंश्लोकं दशवारंजपेत् ॥ अनेनतर्पणेनयमःप्रीयतां ॥ ततोधृतमंगलतिलकवस्त्राभरणःसुहृद्भिःसहकृतोपहारोगीतादिनादिनंनयेत् ॥ ॥

॥ ६५ ॥ लक्ष्मीपूजनम् ॥ ॥ आचमनादिदेशकालोत्कीर्तनांतेऽस्माकमित्यादि ममश्रीमहालक्ष्मीप्रीतिद्वाराअलक्ष्मीपरिहा रपूर्वकंविपुलश्रीप्राप्तिसन्मंगलमहैश्वर्यकुलाभ्युदयसुखसमृद्ध्यादिकल्पोक्तफलसिद्ध्यर्थंलक्ष्मीपूजनंकुबेरपूजनंचकरिष्ये ॥ आस नविधिंन्यासान्कलशाद्यर्चनंनिर्विघ्नतासिद्ध्येगणपतिपूजनंचकरिष्ये ॥ पुरुषसूक्तंन्यस्य ॥ श्रीसूक्तन्यासंविभवेसतिद्वारपूजापी ठपूजादिपूर्वोक्तकोजागरपूजोक्तवत्कृत्वा सक्तुसिवतितेतिमंत्रेणश्रीसूक्तमंत्रैर्वालक्ष्मीं कुबेरायनमःइतिकुबेरंचावाह्यध्यायेत् ॥

(केचिदत्रलेखनीमषीपात्राद्युपकरणसहितेआयव्ययलेखपुस्तकेसरस्वतीमपितंत्रेणपूजयंतितदासरस्वत्याअप्यावाहनं) ॥ ध्या
यामितांमहालक्ष्मींकर्पूरक्षोदपांडुरां ॥ शुभ्रवस्त्रपरीधानांमुक्ताभरणभूषितां ॥ पंकजासनसंस्थानांस्मेराननसरोरुहां ॥ शारदें
दुकलाकांतिंस्निग्धनेत्रांचतुर्भुजां ॥ पद्मयुग्माभयवरव्यग्रचारुकरांबुजां ॥ अभितोगजयुग्मेनसिच्यमानांकरांबुना ॥ ध्यानं ॥
ॐहिरण्यवर्णां० ॐसहस्र०॥महालक्ष्मिसमागच्छपद्मनाभपदादिह॥पूजामिमागृहाणत्वंत्वदर्थेदेविसंभृतां॥ आवाहनं॥ॐतांम आ०
ॐपुरुष०॥ आलयस्तेहिकथितःकमलंकमलालये॥ कमलेकमलेह्यस्मिन्स्थितिंमत्कृपयाकुरु॥ आसनं ॥ ॐअश्वपूर्वां० ॐएतावा०॥
गंगादिसलिलाधारंतीर्थमंत्राभिमंत्रितं॥ दूरयात्राश्रमहरंपाद्यंमेप्रतिगृह्यतां॥ पाद्यं॥ ॐकांसोस्मितां० ॐत्रिपादूर्ध्व०॥ तीर्थोदकै
र्महापुण्यैःकल्पितंपापहारकैः ॥ गृहाणार्घ्यंमहालक्ष्मिभक्तानामुपकारिणि ॥ अर्घ्यं ॥ ॐचंद्रांप्र० ॐतस्माद्वि०॥ कर्पूरागुरुसंमि
श्रंशीतलंजलमुत्तमं॥ लोकमातर्गृहाणेदंदत्तमाचमनंमया॥ आचमनं०॥ ॐआदित्यवर्णे० ॐयत्पुरुषेण०॥ स्नानायतेमहालक्ष्मि
कर्पूरागुरुवासितं॥ आहृतंसर्वतीर्थेभ्यःसलिलंप्रतिगृह्यतां॥ स्नानं॥ ॐआप्यायस्वेत्यादिभिःपंचामृतं॥ पयोदधिघृतंदेविमधु
शर्करयायुतं॥ पंचामृतंमयादत्तंस्नानार्थंप्रतिगृ०॥ ॐकनिक्रद० अभ्यंगस्नानं॥ ॐगंधद्वारां० गंधोदकं॥ ॐ आपोहिष्ठेति
शुद्धोदकं॥ गंधादिपूर्वपूजांतेमहाभिषेकः॥ ॐउपैतुमां० ॐ तंयज्ञं०॥ तंतुसंतानसंयुक्तंकलाकौशलकल्पितं॥ सर्वांगाभरणंश्रेष्ठंवसनं
परिधीयतां॥ वस्त्रं॥ ॐक्षुत्पिपासा० ॐतस्माद्यज्ञा०॥कंचुकं उपवस्त्रंच॥ ॐगंधद्वारां० ॐतस्माद्यज्ञा०॥मलयाचलसंपन्नंनानापन्नग
 रक्षितं॥ शीतलंबहुलामोदंचंदनंप्रतिगृह्यतां॥ चंदनं॥ अक्षतान्॥ ॐअद्रिरिव० ॥ तालपत्रंमयानीतंहरिद्राकुंकुमांजनं॥ सिंदूरा

लक्तकंदास्येसौभाग्यद्रव्यमीश्वरि ॥ सौभाग्यद्रव्यं ॥ रत्नकंकणकेयूरकांचीकुंडलनूपुरं ॥ मुक्ताहारंकिरीटंचगृहाणाभरणानिमे ॥
अलंकारान् ॥ ॐमनसःकाममा० ॐतस्मादश्वा० ॥ मिलत्परिमलामोदमत्तालिकुलसंकुलं ॥ गृहाणनंदनोत्पन्नंपद्मेकुसुमसंचयं ॥
पुष्पाणि ॥ अथांगपूजा ॥ श्रियै० पादौपू० लक्ष्म्यै० जानुनी० पद्मायै० ऊरू० धात्र्यै० कटिं० रमायै० उदरं० वरदायै० स्तनौ०
लोकमात्रे० कंठं० चतुर्भुजायै० बाहू० ऋद्ध्यै० मुखं० सिद्ध्यै० नासिकां० पुष्ट्यै० नेत्रे० तुष्ट्यै० ललाटं० इंदिरायै० शिरः०
सर्वेश्वर्यै० सर्वांगं० ॥ अथपत्रपूजा ॥ श्रियै० पद्मपत्रं० लक्ष्म्यै० दूर्वा० पद्मायै० तुलसी० धात्र्यै० बिल्व० रमायै० चंपक०
वरदायै० बकुल० लोकमात्रे० मालती० चतुर्भुजायै० जाती० ऋद्ध्यै० आम्र० सिद्ध्यै० मल्लिका० पुष्ट्यै० अपामार्ग० तुष्ट्यै०
अशोक० इंदिरायै० करवीर० हरिप्रियायै० बदरी० भूत्यै० दाडिमी० ईश्वर्यै० अगस्ति० ॥ ॐकर्दमेन० ॐयत्पुरुषं० ॥ गंधसंभारसं
नद्धंनानाद्रुमरसोद्भवं ॥ सुरासुरनरानंदंधूपंदेविगृहाणमे ॥ धूपं ॥ ॐआपःस्रजंतु० ॐब्राह्मणोस्य० ॥ मार्तंडमंडलाखंडचंद्रबिंबाग्नि
तेजसां ॥ निदानंदेविदीपोऽयंकल्पितस्तवभक्तितः ॥ दीपं ॥ ॐआर्द्रांपु० ॐचंद्रमा० ॥ एलालवंगशर्करादिमिश्रगोक्षीरलड्डुकादि
नैवेद्यः ॥ देवतालयपातालभूतलाधारधान्यजं ॥ षोडशाकारसंभारंनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ इदंफलं० फलं ॥ पातालतल
संभूतंवदनांभोजभूषणं ॥ नानागुणसमायुक्तंतांबूलंदेविगृ० ॥ तांबूलं ॥ हिरण्यगर्भ० दक्षिणां ॥ ॐश्रियेजात० चंद्रादित्यौ० महानी ॥ ७९ ॥
राजनं ॥ ॐआर्द्रांयःक० ॐनाभ्याआसी० ॥ नमोदेव्यै० नमस्कारः ॐतांमआवह० ॐसप्तास्या० यानिकानि० प्रदक्षिणाः ॥
ॐयःशुचिः० ॐयज्ञेन० सर्वस्याद्यामहा० पुष्पांजलिं ॥ गीतंवाद्यंनृत्यमित्यादि० ॥ प्रार्थना ॥ कमलाचपलालक्ष्मीश्चलाभूति

हरिप्रिया ॥ पद्मापद्मालयासंपदुच्चैःश्रीःपद्मधारिणी ॥ नमस्तेसर्वदेवानांवरदासिहरिप्रिये ॥ यागातस्त्वत्प्रपन्नानासामेभूया
त्त्वदर्चनात् ॥ यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ॥ धनदायनमस्तुभ्यंनिधिपद्मा
धिपायच ॥ भवंतुत्वत्प्रसादान्मेधनधान्यादिसंपदः ॥ अत्रपूजायांगुडमिश्रधान्याकबीजंशर्कराखंडांल्लाजांश्चार्पयंतिशिष्टाः ॥
आवाहनंनजानामीत्यादिपूजांसमापयेत् ॥ ततोब्राह्मणानुपाहारादिनासंतोष्यभूयसींदक्षिणांदत्वापुराणगीतादिनारात्रिंनयेत् ॥

॥ ६६ ॥ गोवर्द्धनादिपूजाविधिः (अन्नकूटोत्सवः) ॥ मुख्यगोवर्धनसंनिधौतस्यैवपूजनं ॥ तदसंनिधौगोमयादिना
तद्रूपंकृत्वातत्सहितश्रीगोपालमूर्तिंपूजनंकार्यं ॥ तत्रप्रतिपदिप्रातरभ्यंगस्नानंकृत्वाधृतमंगलतिलकःस्त्रीभिःकृतनीराजनो
नित्यकर्मांतेआचम्यदेशकालौनिर्दिश्य ममश्रीकृष्णप्रीतिद्वारासकलपापक्षयपूर्वकंकोटिशोधेनुप्राप्तिपुष्ट्यायुःक्षेमादिसिद्ध्यर्थंगोव
र्धनसहितश्रीगोपालपूजनंगोवृंदपूजनंचकरिष्ये इतिसंकल्प्य गणेशपूजादिसंभारप्रोक्षणांते ॥ बलिराज्ञोद्वारपालोभवानद्यभवप्र
भो ॥ निजवाक्यार्थनार्थायसगोवर्धनगोपते ॥ इतिगोवर्धनयुतंगोपालमावाह्य भक्ष्यभोज्यादिनिवेदनपूर्वकंषोडशोपचारैःसंपू
ज्यप्रार्थयेत् ॥ गोपालमूर्तेविश्वेशशक्रोत्सवविभेदक ॥ गोवर्धनकृतच्छत्रपूजांमेहरगोपते ॥ गोवर्धनधराधारगोकुलत्राणकार
क ॥ विष्णुबाहुकृतच्छायगवांकोटिप्रदोभव ॥ ततःपंचोपचारैर्गोवत्सादीन्संपूज्यप्रार्थयेत् ॥ लक्ष्मीर्यालोकपालानांधेनुरूपेण
संस्थिता ॥ घृतंवहतियज्ञार्थेममपापंव्यपोहतु ॥ गावोममाग्रतःसंतु० ॥ प्रत्यक्षगवामसंनिधौमृदादिप्रतिमासुपूजाकार्या ॥
ततोवृतर्त्विग्द्वारागृहसिद्धान्नेन ॐ आगावोअग्मन्० ॐ प्रैतेवदंतु० इतिमंत्राभ्यांहोमःकार्यः ॥ स्त्रीशूद्रादीनांतूक्तपौराणमंत्राभ्यां

(लक्ष्मीर्यालोक० गोवर्धन०) होमांते विप्रान्सुहृदश्चविशेषान्नैःसंभोज्यविप्रेभ्योधेनुंदीनेभ्यश्चान्नंदत्वागोभ्योयवसमन्नग्रासं गिरयेबलिंचदद्यात् ॥ ततोगाःशरत्पुष्पादिभिरलंकृत्यस्वयंभुक्तवद्भिःस्वलंकृतैःस्वनुलिप्तैःसुवेषैर्गोब्राह्मणहोमाग्निगिरीन्प्र- दक्षिणीकुर्वद्भिस्तथागोभिःसहप्रदक्षिणाकार्या ॥ यथागोभिरपिब्राह्मणादीनांप्रदक्षिणाकृताभवति ॥ तद्दिनेगवांदोहनंभार वाहनंचवर्ज्यं ॥ इतिगोवर्धनपूजान्नकूटोत्सवविधिःसमाप्तः ॥ ततोऽपराह्णेमार्गपालीबंधनादिविधिःसिंध्वादौज्ञेयः ॥ ॥

॥ ६७ ॥ बलिराजपूजा ॥ ॥ अस्मिन्दिनेप्रतिसद्मप्रातः तथा रात्रौराजागृहमध्येप्रांगणेवाभूमौपंचरंगैःकृतेमंडलेतैरेवबलि मालिख्यपूजयेत् ॥ नृत्यगीतप्रेक्षणकैश्चतांरात्रिंनयेत् ॥ लोकैस्तु शय्यायांशुक्लतंडुलैस्तमालिख्यपूजयेत् ॥ ममश्रीविष्णुसांनि ध्यसिद्ध्यर्थंबलिपूजांकरिष्ये ॥ मंत्रः ॥ बलिराजनमस्तुभ्यंविरोचनसुतप्रभो ॥ भविष्येंद्रसुराराते पूजेयंप्रतिगृह्यतां ॥ प्रार्थना ॥ बलिराजनमस्तुभ्यंदैत्यदानववंदित ॥ इंद्रशत्रोऽमराराते विष्णुसांनिध्यदोभव ॥ ततोबलिप्रीत्यर्थंवस्त्रादिदत्वाऽग्निर्ज्योतिरिति दीपान्दद्यात् ॥ अत्रमंगलस्नानातिरिक्तंसर्वंयथाचारंकार्यं नित्यत्वाभावात् ॥ राज्ञःकर्तव्यविशेषःकृत्यरत्नावल्यांद्रष्टव्यः ॥

॥ ६८ ॥ यमद्वितीयापूजा ॥ ॥ देशकालकथनांते ममश्रीयमप्रीत्यर्थंयमादिदेवतानांपूजनंकरिष्ये ॥ ततोयमंचित्रगुप्तंयमदूतां श्चावाह्यसंपूज्य ॥ एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश ॥ भ्रातृद्वितीयाकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्ते ॥ इत्य र्घ्यंदत्वा ॥ धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रज ॥ त्राहिमांकिंकरैःसार्धंसूर्यपुत्रनमोस्तुते ॥ यमस्वसर्नमस्तेस्तुयमुनेलोकपूजिते ॥ वरदाभवमेनित्यंसूर्यपुत्रिनमोस्तुते ॥ इतियमंयमुनांचप्रणम्यकर्मसमाप्तिः ॥ अत्र भगिनीत्ववश्यंभ्रातरंसंभोज्यतांबूलादिनापूज

येत् तदित्थं ॥ ममश्रीयमप्रीतिद्वाराअवैधव्यप्राप्त्यर्थंभ्रातुरायुरभिवृद्ध्यर्थंचयमपूजनंभ्रातृभोजनंवस्त्रादिभिस्तत्पूजनंचक रिष्ये ॥ यमपूजांतेभ्रातरंगंधादिनासंपूज्यभोजयेत् ॥ भ्रातस्तवानुजाताहंभुंक्ष्वभोज्यमिदंशुभं ॥ प्रीतयेयमराजस्ययमुना याविशेषतः ॥ ज्येष्ठातुभ्रातस्तवाग्रजाताहमितिवदेत् ॥ भोजनांतेचतांबूलादिदत्वा ॥ मार्कंडेयमहाभागसप्तकल्पांतजीवन ॥ चिरंजीवीयथैवत्वंतथामेभ्रातरंकुरु ॥ इतिप्रार्थ्यकर्मसमापयेत् ॥ भ्रातापि भगिनींवस्त्रालंकारादिभिःपूजयेत् ॥ सोदर्या-दिभगिन्यभावेभगिनीत्वेनव्यवहृतयासहायंपूजादिविधिःकार्यइतिकृत्यरत्नावल्यादौस्पष्टं ॥ इतियमद्वितीया ॥ ॥

॥ ६९ ॥ कूष्मांडनवमी ॥ ॥ देशकालौनिर्दिश्यममब्रह्महत्यादिसमस्तपापक्षयपूर्वकंपुत्रपौत्रसौभाग्यादिसकलमनोरथावा प्तिकूष्मांडबीजसमसहस्रसंख्याब्दब्रह्मलोकनिवासकामःश्रीपरमेश्वरप्रीत्यर्थंब्राह्मणाययथाशक्त्युपस्करयुतंकूष्मांडदानंकरिष्येतदं गंतत्पूजनंब्राह्मणपूजनंचकरिष्ये ॥ कूष्मांडदेवताभ्योनमइतितंसंपूज्य ब्राह्मणंचसंपूज्य स्वस्त्यस्तु० ॥ ब्रह्महत्यादिपापघ्नं ब्रह्मणानिर्मितंपुरा ॥ कूष्मांडंबहुबीजाढ्यंपुत्रपौत्रादिवृद्धिदं ॥ मुक्ताप्रवालहेमादियुक्तंदत्तंतवद्विज ॥ अनंतपुण्यफलदमतः शांतिंप्रयच्छमे ॥ इमंत्रीहिराशिस्थंकूष्मांडमिक्षुदंडचुक्रामलकदीपाद्युपस्करयुतंब्राह्मणायसंप्रददे ॥ ॥ छ ॥

॥ ७० ॥ एकादशीपूजा ॥ ॥ आचमनादिदेशकालकीर्तनांतेसपरिवारस्यममश्रीमहाविष्णुप्रीतिद्वारासकलपापक्षयपूर्वकं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं षोडशोपचारैर्महाविष्णुपूजांकरिष्ये ॥ यथाधिकारंन्यासादिकृत्वा कलशार्चनादिसं भारप्रोक्षणांते ॥ ॐ येभ्योंमा॒ता० ॐ ए॒वापि॒त्रे० इतिपठित्वा शांताकारमितिविष्णुंध्यायेत् ॥ चतुर्भुजंमहाकायंजांबूनदसमप्रभं ॥

शंखचक्रगदापद्मरमागरुडशोभितं ॥ सेवितंमुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः ॥ एवंविधंहरिंध्यात्वाततोयजनमारभेत् ॥ श्रीमहा
विष्णुंध्यायामि ॥ ॐसहस्रशीर्षा० ॥ आवाहयामिदेवेशंभक्तानामभयप्रदं ॥ स्निग्धकोमलकेशंचमनसावाहयेहरिं ॥ आवाहनं ॥
ॐपुरुषएवेदं० ॥ सुवर्णमणिभिर्दिव्यैरचितेदेवनिर्मिते ॥ दिव्यसिंहासनेकृष्णउपविश्यप्रसीदमे ॥ आसनं ॥ ॐ एतावानस्य० ॥ पादो
दकंसुरश्रेष्ठसुवर्णकलशेस्थितं ॥ गंधपुष्पाक्षतैर्युक्तंपाद्यंमेप्रतिगृह्यतां ॥ पाद्यं ॥ ॐत्रिपादूर्ध्व० ॥ अष्टद्रव्यसमायुक्तंस्वर्णपा
त्रोदकंशुभं ॥ अभयंकरभक्तानांगृहाणार्घ्यंजगत्पते ॥ अर्घ्यं ॥ ॐतस्माद्विराळ० ॥ कर्पूरेणसमायुक्तमुशीरेणसुवासितं ॥ दत्तमाच
मनीयार्थंनीरंस्वीक्रियतांविभो ॥ आचमनीयं ॥ ॐयत्पुरुषेण० ॥ गंगागोदावरीचैवयमुनाचसरस्वती ॥ नर्मदासिंधुकावेरीताभ्यः
स्नानार्थमाहृतं ॥ स्नानं ॥ पृथक्पंचामृतस्नानादिमहाभिषेकांतंकुर्यात् ॥ आचमनं ॥ ॐतंयज्ञं० ॥ वस्त्रयुग्मंसमानीतंपट्टसूत्रेण
निर्मितं ॥ सुवर्णखचितंदिव्यंगृहाणत्वंसुरेश्वर ॥ वस्त्रं ॥ ॐतस्माद्यज्ञा० ॥ कार्पासतंतुभिर्युक्तंब्रह्मणानिर्मितंपुरा ॥ अनेकरत्न
खचितमुपवीतंगृहाणभो ॥ उपवीतं ॥ ॐतस्माद्यज्ञा० ॥ चंदनंमलयोद्भूतंकस्तूरीचारुचंदनं ॥ कर्पूरेणचसंयुक्तंस्वीकुरुष्वानुलेपनं ॥
चंदनं ॥ हरिद्रादिसौभाग्यद्रव्यं भूषणानिच ॥ ॐअहिरिवभोगैः० परिमलद्रव्याणि ॥ ॐतस्मादश्वा० ॥ शतपत्रैश्चकह्लारैश्चंप
कैर्मल्लिकादिभिः ॥ तुलसीयुक्तपुष्पाणिगृहाणपुरुषोत्तम ॥ पुष्पाणि ॥ तुलसीकुंदमंदारपारिजातांबुजैस्तुया ॥ पंचभिर्ग्रथितामा
लावनमालेतिकथ्यते ॥ वनमालां ॥ अत्रसहस्रतुलस्यर्पणं ॥ ॐयत्पुरुषं० ॥ दशांगंगुग्गुलोद्भूतंसुगंधंचमनोहरं ॥ कृष्णागुरुस
मायुक्तंधूपंदेवगृहाणमे ॥ धूपं ॥ ॐब्राह्मणोस्य० ॥ साज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह ॥

दीपं ॥ ॐ चंद्रमामनसो० ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ नानाविधोपहारादिनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं० ॥ मध्येपानीयं० ॥ उत्तरापोशनं० हस्तप्रक्षालनं० मुखप्रक्षालनं० करोद्वर्तनं० पूगीफलमितितांबूलं ॥ इदंफलमितिफलं ॥ हिरण्यगर्भेतिदक्षिणां ॥ चंद्रादित्यौचधरणीवि० आर्तिक्यदीपं०॥ ॐ नाभ्याआसी० नमोस्त्वनंताय० नमस्कारं॥ ॐ सप्तास्यासन्० यानिकानिच०॥ प्रदक्षिणां ॥ ॐ यज्ञेनयज्ञ० ॥ देवदेवजगन्नाथगोपालप्रतिपालक ॥ गोपदैःकृतसंत्राणगृहाणकुसुमांजलिं ॥ मंत्रपुष्पांजलिं० ॥ मंत्रहीनंक्रियाहीनं० इतिप्रार्थनां ॥ (क्वचिदर्घ्याण्यपिददत्येभिर्मंत्रैः ॥ अनंतंवामनंशौरिंवैकुंठमपराजितं ॥ गृहाणार्घ्यंमयादत्तंमातुरुत्संगसंस्थितं ॥ इदमर्घ्यं ॥ देवकीगर्भसंभूतंयशोदानंदनंहरिं ॥ गरुडध्वजंश्रीधरंचसृष्टिस्थित्यंतकारणं ॥ इदमर्घ्यं ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते ॥ इदमर्घ्यं) अनेनकृतपूजनेनश्रीमहाविष्णुःप्रीयतां ॥

॥ ७१ ॥ प्रबोधोत्सवतुलसीविवाहौ ॥ ॥ देशकालौसंकीर्त्यश्रीदामोदरप्रीत्यर्थंप्रबोधोत्सवंसंक्षेपतस्तुलसीविवाहविधिंचतंत्रेणकरिष्ये ॥ तदंगतयापुरुषसूक्तेनविधिनाषोडशोपचारैस्तंत्रेणश्रीमहाविष्णुपूजांतुलसीपूजांचकरिष्ये ॥ गणपतिंसंपूज्यन्यासादिविधाय कलशार्चनादिसंभारप्रोक्षणांते शांताकारमितिविष्णुंध्यात्वा ॥ ध्यायामितुलसींदेवींश्यामांकमललोचनां ॥ प्रसन्नांपद्मकह्लारवराभयचतुर्भुजां ॥ किरीटहारकेयूरकुंडलादिविभूषितां ॥ धवलांशुकसंवीतांपद्मासननिषेदुषीं ॥ इतितुलसींचध्यात्वासहस्रशीर्षेतिश्रीमहाविष्णुंतुलसींचावाह्य ॥ पुरुषएवेदमित्यादिभिः ॥ त्रैलोक्यजननीदेविसर्वलोकैकपावनि ॥ संपूजयामिदेवेशितुलसित्वांहरिप्रिये ॥ इतिपौराणेनच श्रीमहाविष्णवेदामोदरायश्रीदेव्यैतुलस्यैचनमआसनमित्यादिस्नानांतेमंगलवाद्यैःसुगं

धितैलहरिद्राभ्यांनागवल्लीदलगृहीताभ्यांउष्णोदकेनच कनिक्रददितिमंगलस्नानं विष्णवेतुलस्यैचसुवासिनीभिः कारयित्वा स्वयंवादत्वा पंचामृतस्नानंसमर्प्यशुद्धोदकेनाभिषिच्य वस्त्रयज्ञोपवीतचंदनंदत्वा तुलस्यैहरिद्राकुंकुमकंठसूत्रमंगलालंकारान्द त्वामंत्रपुष्पांतपूजांसमाप्यघंटादिवाद्यघोषेणदेवंप्रबोधयेत् ॥ तत्रमंत्राः ॐइदंविष्णु० ॥ ॐयोजागार० इतितुआचारप्राप्तः ॥ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय ॥ बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेणसुखेनदेव ॥ इयंचद्वादशीदेवप्र बोधार्थंतुनिर्मिता ॥ त्वयैवसर्वलोकानांहितार्थंशेषशायिना ॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते ॥ त्वयिसुप्तेजगत्सुप्त मुत्थितेचोत्थितंजगत् ॥ एवमुत्थाप्य चरणंपवित्रं० ॥ गतामेघावियच्चैवनिर्मलंनिर्मलादिशः ॥ शारदानिचपुष्पाणिगृहाणममके शव ॥ इत्यादिमंत्राभ्यां पुष्पांजलिंदद्यात् ॥ अथाचारात्तुलसीसंमुखांश्रीकृष्णप्रतिमांकृत्वामध्येंतःपटंधृत्वामंगलाष्टकपद्यानिपठि त्वाअंतःपटंविसृज्याक्षताप्रक्षेपंकृत्वादामोदरहस्तेतुलसीदानंकुर्यात् ॥ देवींकनकसंपन्नांकनकाभरणैर्युतां ॥ दास्यामिविष्णवेतु भ्यंब्रह्मलोकजिगीषया ॥ मयासंवर्धितांयथाशक्त्यलंकृतामिमांतुलसींदेवीं दामोदरायश्रीधरायवरायतुभ्यमहंसंप्रददे ॥ इतिदेवपुरतःसाक्षतजलंक्षिपेत् ॥ श्रीमहाविष्णुःप्रीयतामित्युक्त्वाइमांदेवींप्रतिगृह्णातुभवान् इतिवदेत् ॥ ततोदेवह स्तस्पर्शंतुलस्याःकृत्वा ॥ कइदंकस्माअदात्कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामंसमुद्रमाविश कामेनत्वाप्रतिगृ ह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्रतिगृह्णातु ॥ इतिमंत्रमन्येनवाचयेत् ॥ यजमानः ॥ त्वंदेविमेग्रतोभूयास्तुलसीदे विपार्श्वतः ॥ देवित्वंपृष्ठतोभूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ दानस्यप्रतिष्ठासिद्ध्यर्थमिमांदक्षिणांसंप्रददे इतिदेवपुरतोदक्षिणाम

र्पयेत् ॥ ततःस्वस्तिनोमिमीता० शंनइंद्राग्नीइत्यादिस्वस्वशाखोक्तानिशांतिसूक्तानिविष्णुसूक्तानिचपठेयुः ॥ तुलसीयुतायविष्ण वेमहानीराजनंकृत्वामंत्रपुष्पंदत्वा सपत्नीकःसगोत्रजःसामात्योयजमानश्चतस्त्रःप्रदक्षिणाःकुर्वीत ॥ ब्राह्मणेभ्योदक्षिणांदत्वा यथाशक्तिब्राह्मणभोजनंसंकल्प्यकर्मेश्वरार्पणंकुर्यात् ॥ इतिधर्मसिंधुव्रतराजसंश्लिष्टःप्रबोधोत्सवतुलसीविवाहप्रयोगःसंपूर्णः ॥

॥ ७२ ॥ वैकुंठचतुर्दशी ॥ ॥ देशकालावुच्चार्यअस्माकमित्यादिममवैकुंठचतुर्दशीव्रतकल्पोक्तफलावाप्तयेत्यादिसंकल्प्य निशीथेविष्णुंतुलसीपत्रकमलादिभिःसंपूज्य ॥ ततःप्रातःस्नानोत्तरंबिल्वपत्रद्रोणपुष्पकमलादिभिःशिवंसंपूजयेत् ॥ विष्णुपूजा पूर्वमेकादश्युक्तवच्छिवपूजाचपूर्वनिर्दिष्टसोमवारपूजावदेवेतिविस्तरभियानात्रमुहुर्न्यस्तासानिर्दिष्टस्थलादवगंतव्या ॥ ॥

॥ ७३ ॥ त्रिपुरोत्सवः ॥ ॥ आचमनादिदेशकालोत्कीर्तनांतेऽस्माकमित्यादिममश्रीशिवप्रीतिद्वारासकलपापक्षयपूर्वकंवि मलज्ञानशिवसायुज्यादिशुभफलप्राप्तयेत्रिपुराख्यदीपप्रज्वालनंतदंगत्वेनश्रीशिवपूजांचकरिष्ये इतिसंकल्प्य यथाविभवंयथा धिकारंचशिवंषोडशोपचारैःसंपूज्यगंधादिनालंकृत्य ॥ कीटाःपतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः ॥ दृष्ट्वाप्रदीपंनच जन्मभाजोभवंतिनित्यंश्वपचाहिविप्राः ॥ इतित्रिपुरदीपंप्रज्वाल्यसमर्पयेत् ॥ अनेनत्रिपुरदीपप्रज्वालनेनश्रीमत्रिपुरहरःप्री० ॥

॥ ७४ ॥ चंपाषष्ठीपूजा ॥ ॥ मार्गशीर्षशुक्लप्रतिपदमारभ्यषष्ठीपर्यंतंप्रत्यहंमल्लारिपूजनंतत्सन्निधौअखंडदीपदानंचकार्यं ॥ आचम्यदेशकालौसंकीर्त्य मल्लारिमार्तंडप्रीत्यर्थंयथामिलितोपचारैःपूजनंकरिष्ये ॥ तदंगत्वेनगणपतिपूजनंकलशाद्यर्चनंचक रिष्ये इतिसंकल्प्यकृत्वादेवंध्यायेत् ॥ ध्यायेन्मल्लारिदेवंकनकगिरिनिभंह्मालसाभूषितांगंश्वेताश्वंखड्गहस्तंविबुधमुनिगणैःसेव्य

मानंकृतार्थैः ॥ युक्तांघ्रिंदैत्यमूर्ध्नांडमरुविलसितंनैशचूर्णाभिरामंनित्यंभक्तेषुतुष्टंश्वगणपरिवृतंनित्यमोंकारगम्यं ॥ इतिध्यात्वा
मल्लारिमार्तंडायनमःइतिनाममंत्रेणपूजयेत् ॥ ततः तलिकापूजनं तत्प्रकारः ॥ वैश्वदेवंकृत्वानैवेद्यंदत्वादेवाग्रेगोमयेनोपलिप्ते
रंगवल्ल्याद्यलंकृतेदेशेपात्रंनिधायतन्मध्ये कलशंनिधायजलेनापूर्यतस्मिन्कमलाकाराणिनागवल्लीदलानिसंस्थापयित्वातदुपरिना
रिकेलफलंनिधायतत्समीपेतांबूलदक्षिणाभंडाराभिधहरिद्राचूर्णंचसंस्थाप्य आचम्यदेशकालौसंकीर्त्य मल्लारिमार्तंडप्रीत्यर्थम
स्मत्कुलाचारप्राप्तंगंधादिनातलिकापूजनंकरिष्ये ॥ तलिकायैनमःइतिमंत्रेणोपचारान्समर्प्यहरिद्राचूर्णंदेवेदत्वाचतुर्भिर्ब्राह्मणैः
सह यजमानः एळकोट एळकोट इतिशब्दमुच्चारयन्तलिकोत्थापनंवारत्रयंकार्यं ॥ पश्चान्नारिकेलस्फोटनंकारयित्वातदुदकेन
देवंप्रोक्ष्यतांबूलंदक्षिणांनारिकेलबीजांशंचदेवेदत्वा पूर्ववत्त्रिवारंतलिकोत्थापनंविधेयं ॥ ततश्चतुर्भ्योब्राह्मणेभ्यः हरिद्राला
पनंकृत्वानारिकेलबीजांशंदक्षिणांचदत्वास्वयंहरिद्रांधृत्वानारिकेलबीजांशंभक्षयेत् ॥ इत्याचारः ॥ ॥ छ ॥ ॥छ॥

॥ ७५ ॥ दत्तजयंतीपूजा ॥ ॥ आचमनादिदेशकालकीर्तनांतेसपरिवारस्यममधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धये
श्रीपादश्रीवल्लभश्रीगुरुदत्तात्रेयरूपीश्रीसद्गुरुप्रीत्यर्थंषोडशोपचारैःपूजांकरिष्ये ॥ यथाधिकारमासनविधिन्यासकलशाद्यर्चनसं
भारप्रोक्षणांते ॥ ध्यायेत् ॥ ब्रह्मानंदंपरमसुखदंकेवलंज्ञानमूर्तिंद्वंद्वातीतंगगनसदृशंतत्त्वमस्यादिलक्ष्यं ॥ एकंनित्यंविमलमचलं
सर्वधीसाक्षिभूतंभावातीतंत्रिगुणरहितंसद्गुरुंतंनमामि ॥ काषायवस्त्रंकरदंडधारिणंकमंडलुंपद्मकरेणशंखं ॥ चक्रंगदाभूषितभू
षणाढ्यंश्रीपादराजंशरणंप्रपद्ये ॥ ध्यायामि ॥ ॐ दीर्घतमामामतेयोजुंजुर्वान्दशमेयुगे ॥ अपामर्थंयतीनांब्रह्माभवतिसारथिः ॥

ॐसहस्रशीर्षा० कोटिसूर्यप्रतीकाशंनिजानंदैकविग्रहं ॥ राजद्वैराग्यसाम्राज्यंगुरुमावाहयाम्यहं ॥ आवाहनं ॥ (सिद्धमूर्तावा वाहनाभावात्पुष्पांजलिः) ॥ ॐपुरुषएवेदं० ॥ यमाद्यष्टांगयोगोक्तसिद्धासनविराजते ॥ मूर्तसद्गुरवेतुभ्यमासनंपरिकल्पये ॥ आसनं ॥ ॐएतावानस्य० ॥ येनत्रैलोक्यमखिलंव्याप्तंपादत्रयेणहि ॥ तस्मैसद्गुरवेपाद्यंपादयोःप्रददाम्यहं ॥ पाद्यं ॥ ॐत्रिपादूर्ध्व० ॥ चंदनाक्षत पुष्पादिफलरत्नसमन्वितं ॥ श्रद्धोपकल्पितंचार्घ्यंसद्गुरोप्रतिगृह्यतां ॥ अर्घ्यं ॥ ॐतस्माद्विराळ० ॥ एलालवंगकर्पूरकस्तूरीगंधवा सितं ॥ जलमाचमनीयार्थंदास्येभक्त्याजगद्गुरो ॥ आचमनीयं ॥ ॐयत्पुरुषेण० ॥ तीर्थानांलोकपापौघक्षालनोत्थांहसांभिदे ॥ लीलो पात्तावतारायस्नानंसद्गुरवेददे ॥ स्नानं ॥ ॐआप्यायस्वेत्यादिपंचमंत्रैःपृथक्पंचामृतस्नानं ॥ ॐगंधद्वारामितिचंदनोदकस्नानं ॥ ॐआपोहिष्ठेत्यादिभिःशुद्धोदकस्नानं ॥ पंचोपचारैःपूर्वपूजांसमाप्यपुरुषसूक्तविष्णुसूक्तादिभिर्महाभिषेकंकुर्यात् ॥ स्नानांतेआ चमनं ॥ ॐतंयज्ञं ॥ आशावासायदीक्षांगकाषायवसनायच ॥ काषायमंशुकंदास्येपरिधानायभिक्षवे ॥ वस्त्रं ॥ आचमनं ॥ ॐतस्मा द्यज्ञात्सर्वहुतःसंभृतं० ॥ पट्टकूलोर्णरोमोत्थवस्त्रमार्गाजिनान्यदः ॥ प्रावारार्थंप्रदास्यामिपरिव्राडुपयोगिने ॥ प्रावरणमुपवीतंवा ॥ ॐतस्माद्यज्ञात्सर्वहुतऋचः० ॥ कस्तूरीकेशरामोदयुक्तंपाटीरजंरजः ॥ भस्मोद्धूलितदेहायचंदनंयतयेर्पये ॥ चंदनं ॥ सर्वालंकाररू पायकृत्तिदंडकमंडलून् ॥ दंडिभूषाप्रदान्दास्येदत्तमस्करिणेमुदा ॥ अलंकारान् ॥ ॐअहिरिव० ॥ वेदांतकल्पवृक्षोत्थमहावाक्य प्रसूनजं ॥ गंधमाघ्रायतृप्तायदद्यांपरिमलंमुहुः ॥ परिमलद्रव्याणि ॥ ॐ तस्मादश्वा० ॥ पुष्पवद्ग्रहनक्षत्रमालिनेज्ञानशालिने ॥ मालत्यादीनिपुष्पाणिगुरवेप्रतिपादये ॥ पुष्पाणि ॥ तुलसीकुंदमंदारपारिजातांबुजैःकृतां ॥ वैजयंतीमिमांमालांगुरुकंठेर्पया

म्यहं ॥ पुष्पमालां॥ अत्रयथाविभवंसहस्राष्टोत्तरशततुलस्यर्पणं ॥ ॐयत्पुरुषं० ॥ जगत्यामोदजातंयद्यस्मादाघ्रेयतांगतं ॥ आघ्रा
णार्थंददेतस्मैधूपंश्रीपादरूपिणे ॥ धूपं ॥ ॐब्राह्मणोस्य० ॥ यद्भासाभासतेवह्निःसूर्याचंद्रमसौतडित् ॥ घृतदीपंप्रदास्यामितस्मैस
द्गुरवेपुनः ॥ दीपं ॥ ॐचंद्रमाम० ॥ ऊरीकृतजगत्पूज्यचतुर्थाश्रमयोगतः ॥ भिक्षार्थमटमानायभैक्षंदास्यामिभिक्षवे ॥ विश्वंभरोऽनि
शंयावदाब्रह्मादिपिपीलिकं ॥ भृणात्यन्नजलाभ्यांयस्तस्मैनैवेद्यमर्पये ॥ नैवेद्यं० ॥ मध्येपानीयंउत्तरापोशनंहस्तप्रक्षालनंमुखप्र
क्षालनंकरोद्वर्तनार्थेचंदनं ॥ इदंफलमितिफलानि ॥ पूगीफलमितितांबूलं ॥ हिरण्यगर्भगर्भेतिदक्षिणां ॥ ॐश्रियेजात० ॥ नीरा
जितंसुरगणैर्ऋषिभिर्दीपराजिभिः ॥ तमारार्तिक्यदीपेनगुरुंनीराजयाम्यहं ॥ आरार्तिक्यं॥कर्पूरदीपं॥ ॐनाभ्याआसी० ॥ यत्पाद
पद्मममरानिजमूर्धक्लृप्तसद्रत्नवन्मुकुटकोटिभिरानमंति ॥ तंस्वांघ्रिलग्नजनतार्तिहरंदयालुंश्रीसद्गुरुंभयहरंशिरसानमामि ॥ न
मोगुरुभ्योगुरुपादुकाभ्योनमःपरेभ्यःपरपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्योनमोस्तुलक्ष्मीपतिपादुकाभ्यः ॥ नमस्का
रान् ॥ ॐसप्तास्यासन्० ॥ स्वर्भूःपाताललोकेषुयदटाव्यादिवानिशं ॥ प्रदक्षिणंकरोमीहसद्गुरुंपादचारतः ॥ प्रदक्षिणाः ॥ ॐयज्ञेन
यज्ञ० ॥ मंत्रविद्भिर्मंत्रशतैर्मंत्रवत्संस्तुतायच ॥ श्रीमत्सद्गुरवेदास्येमंत्रपुष्पांजलिंमुदा ॥ मंत्रपुष्पांजलिं ॥ गीतवाद्यनृत्यच्छत्रचाम
राद्युपचारान्० ॥ प्रार्थना ॥ अनेकजन्मार्जितपापसंघैःसंसारकूपेपतितंगभीरे ॥ पुनःपुनर्जन्ममृतीभजंतंश्रीपादमांतारयपाद
लग्नं ॥ बद्धांजलिस्त्वांमुहुरर्थयेहंभवत्पदांभोजरतिर्दृढास्तु ॥ स्वरूपविज्ञानमपिप्रसादान्मुच्येयमोहादपिगर्भवासात् ॥ वाणीगु
णानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नः ॥ स्मृत्यांशिरस्तवनिवासजगत्प्रणामेदृष्टिःसतांदर्शनेऽस्तुभवत्तनूनां ॥

अपराधसहस्राणिक्रियंतेहर्निशंमया ॥ दासोयमितिमांमत्वाक्षमस्वपरमेश्वर ॥ इत्यादिक्षमापयेत् ॥ इतिश्रीदत्तपूजासंपूर्णा ॥

॥ ७६ ॥ मकरसंक्रांतिः ॥ ॥ तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी ॥ तिलभुक्तिलदाताचषट्तिलाःपापनाशनाः ॥ देशकालौनिर्दिश्यममकायिकवाचिकमानसिकत्रिविधपापनिबर्हणपूर्वकंश्रीसूर्यप्रसादसिद्ध्येतिलकल्कोद्वर्तनपूर्वंस्नानंकरिष्ये ॥ इति संकल्प्ययथाविधिस्नात्वायथाविभवंश्रीसूर्यनारायणंसंपूज्ययथाशक्तिदानादिकृत्वाअयनश्राद्धंचकुर्यात् ॥ ॥ ७ ॥

॥ ७७ ॥ तिलपात्रदानं ॥ ॥ ताम्रपात्रेतिलान्कृत्वापलषोडशनिर्मिते ॥ सहिरण्यंस्वशक्त्यावाविप्रायप्रतिपादयेत् ॥ ममवाङ्मनःकायजत्रिविधपापनाशपूर्वकंब्रह्मलोकप्राप्तिकामस्तिलपात्रदानंकरिष्ये ॥ उक्तपरिमाणेताम्रपात्रेप्रस्थतिलान्कर्षसुवर्णयुतान् यथाशक्तिसुवर्णयुतान्वाकृत्वाविप्रंसंपूज्य ॥ देवदेवजगन्नाथवांछितार्थफलप्रद ॥ तिलपात्रंप्रदास्यामितवांगेसंस्थितोह्यहं ॥ इतिमंत्रेणदद्यात् ॥ तिलाःपुण्याःपवित्राश्चसर्वपापहराःस्मृताः ॥ शुक्लाश्चैवतथाकृष्णाविष्णुगात्रसमुद्भवाः ॥ यानिकानिचपापानि ब्रह्महत्यासमानिच ॥ तिलपात्रप्रदानेनतानिनश्यंतुमेसदा ॥ इदंतिलपात्रंयथाशक्तिदक्षिणासहितंसूर्यदैवत्यंब्रह्मलोकप्राप्तिकामस्तुभ्यमहंसंप्रददे ॥ इतिदद्यात् ॥ अग्रेतुपुंस्त्रीकर्तृकानिविविधदानानिव्रतराजस्थानि संग्रहीष्यंते ॥ ॥ ॥ ७ ॥

॥ ७८ ॥ दधिमंथदानं ॥ ॥ प्रातस्तिलकल्कोद्वर्तनेनस्नात्वा शुचिवस्त्रंपरिधाय देशकालौसंकीर्त्य ममश्रीसवितृप्रीतिद्वारा दुःखदारिद्र्यनिरासपूर्वकंचिरजीविपुत्रपौत्रयुतधनधान्यसमृद्धिविविधभोगसुखसंपदादिमनोरथसिद्धये दधिमंथदानंकरिष्ये ॥ तदंगपूजनंच० ॥ उपलिप्तभूमौस्वस्तिकंविरच्य तत्रद्रोणमितगोधूमादिधान्यपुंजोपरि दधिपूर्णभांडंकुंकुमाद्यलंकृतंरक्तसूत्रवस्त्रवेष्टित

मंथदंडंनिधायोपरिप्रतिमाया यशोदांकृष्णं दंडेदेवींसूर्यंचसंपूज्य परितोष्टदीपान्प्रज्वाल्य लाजेक्षुखंडपृथुकलड्डुकादिनिवेद्य ॥ पूजितासिमयादेविदधिमंथनभाजने ॥ यशोदेसुमहाभागेपुत्रंदेहिमनोरमं ॥ श्रीकृष्णपरमानंदसंसारार्णवतारक ॥ पुत्रंदेहिमनोज्ञंमे ऋणत्रयविमोक्षणं ॥ इतिप्रार्थ्यविप्रंसंपूज्य ॥ गृहाणत्वंद्विजश्रेष्ठदधिमंथनभाजनं ॥ नवनीतेनसहितंयशोदासहितंहरिं ॥ प्रसादः क्रियतांमह्यंसूर्यरूपनमोस्तुते ॥ इतितत्पात्रंप्रतिमादियुतंदद्यात् ॥ इतिदधिमंथदानं ॥ ॥ ॥ छ ॥

॥ ७९ ॥ संक्रांतिदानानि ॥ ॥ अथेदानींमकरसंक्रमेप्रचलितानांस्त्रीकर्तृकविविधदानानांसंग्रहः ॥ तत्रादौसुघटदानं ॥

देशकालौसंकीर्त्य ममश्रीसवितृप्रीतिद्वारासकलपापक्षयपूर्वकं इहजन्मनिजन्मांतरेच स्थिरसौभाग्यकुलाभिवृद्धिधनधान्यसमृद्धिदीर्घायुःपुष्टिमहैश्वर्यमंगलाभ्युदयसुखसंपदादिकल्पोक्तफलसिद्ध्यै अस्मिन्मकरसंक्रमपुण्यपर्वकाले ब्राह्मणायधान्यपूर्णसुघटदानंक० ॥ देयद्रव्यंविप्रंचसंपूज्य ॥ मकरेर्केतुसंप्राप्तेसुघटंधान्यपूरितं ॥ रवेःप्रीतिकरंदास्येसौभाग्यादिफलाप्तये ॥ इदंसुघटदानंसंकल्पहेतवेसंप्रददे ॥ दानसांगतायैदक्षिणांदद्यात् ॥ एवमग्रेपिसंकल्पादिज्ञेयं ॥ विशेषस्तत्रवक्ष्यते ॥छ॥ अथकरक [चिलीपिली] दानं ॥ अपत्याद्यभिवृद्ध्येकरकदानंकरिष्ये ॥ करकैरन्वितंस्थूलंकलशंबहुभिःफलैः ॥ सोपस्करंप्रयच्छामिवस्त्रसंवेष्टिताननं ॥ छ ॥ अथदधिमंथपात्र [घुसळण] दानं ॥ गोमहिषीवृंदरूपसंपदभिवृद्ध्येदधिमंथदानं० ॥ दध्नाप्रपूरितंपात्रंवस्त्रकां ॥ ८५ ॥
चनसंयुतं ॥ सेक्षुदंडंप्रदास्यामिगवांवृद्धिकरंपरं ॥ छ ॥ अथधाणकदानं ॥ मद्गृहेक्षय्यधान्यराशिसमृद्ध्येकंडितधान्यदानंक० ॥ उलूखलस्थितंधान्यंमुसलाहतिनिस्तुषं ॥ ददामिप्रीतिदंभानोर्धान्यराशिविवर्धनं ॥ छ ॥ अथवस्त्रपूर्तिं [धडवती] दानं ॥ मम

अविच्छिन्नशुभसंततिवृद्धयेसुवासिन्यैवस्त्रपूर्तिदानं० ॥ नानाकृतीनिरम्याणिविचित्राणिशुभानिच ॥ वासांसिसंप्रयच्छामिशु भसंततिवृद्धये ॥छ॥ अथचीरचोलकदानं ॥ ममावैधव्यादिप्राप्तयेचीरचोलक० ॥ सकंचुकमिदंवस्त्रमनर्घतुष्टिदंरवेः ॥ पुरं ध्र्यैतेप्रदास्यामिसौभाग्यंवर्धतांमम ॥ छ ॥ आवापक[आवा]दानं ॥ ममसर्वगुणोपेतभृत्यसुहृद्भर्तृपुत्रादिपरिवृतायाउत्तम गृहसुखशांतिसमृध्द्यादिसिद्धयेआवापकदानंकरिष्ये ॥ धान्यराशौस्थूलसूक्ष्मविविधाकाराणिताम्रमृदादिभांडानिराशीकृत्यपू जांते ॥ नानाविधानिभांडानिस्थूलसूक्ष्माण्यनेकशः ॥ राशीकृतानिदास्यामिसर्वकामसमृद्धये ॥ नानाभांडरचितंइममावापकं सूर्यदैवत्यंसोपस्करंसंकल्पोक्तफलसिद्धयेनानानामगोत्रेभ्योविप्रेभ्यःसुवासिनीभ्यश्चदातु० ॥ छ ॥ हरिद्रादिदानं ॥ सुखसौभा ग्यमंगलाभिवृद्धयेसुवासिनीभ्योहरिद्रादिदानंक० ॥ गौर्याविनिर्मितंपूर्वंसर्वमंगलकारणं ॥ स्त्रीणांसौभाग्यसुखदंहरिद्रादिस मर्पये ॥ छ ॥ नेत्रदानं ॥ सकलार्थदर्शननिर्मलकीर्तिरूपादिमंगलावाप्तयेनेत्रसंज्ञकदर्पणयुग्मदानंक० ॥ सर्वार्थदर्शनंपुण्यंरू पकीर्तिविवर्धनं ॥ क्षेमप्रदंप्रयच्छामिनिर्मलंदर्पणद्वयं ॥ छ ॥ हीरदीपदानं ॥ ममविमलज्ञानपुष्टितुष्टिकांत्यादिसिद्धयेहीर काख्यदीपयुग्मदानं० ॥ स्वच्छंगोधूमराशिस्थंदीपयुग्मघृतान्वितं ॥ हीरवत्कांतिविज्ञानपुष्टितुष्टिकरंददे ॥ छ ॥ अथानाख्या त[अवचितफल]दानं ॥ सुपुत्रादिफलप्राप्तयेऽनाख्यातफलदानंक० ॥ जलेफलंप्रक्षिप्य ॥ अनाख्यातंजलेक्षिप्तंफलमेतदनुत्त मं ॥ ससुवर्णंप्रदास्यामिसुपुत्रादिफलप्रदं ॥ छ ॥ अथफलपिंडिका[पेंड]दानं ॥ अखंडवंशवृध्द्यादिफलप्राप्त्यैफलपिंडिका० ॥ अखंडोत्तारितंभद्रंवंशवृद्धिकरंसदा ॥ ददामितेनारिकेलक्रमुकादिफलोच्चयं ॥ छ ॥ अथफलयुग्म [जोडसंक्रांति] दानं ॥

सकलाभीष्टसिद्धयेविप्रेभ्योद्वादशफलयुग्मदानंक० ॥ फलद्वादशयुग्मानिनारिकेलोद्भवानिच ॥ विप्रेभ्यःसंप्रदास्यामिसर्वकामफलाप्तये ॥ छ ॥ अथवर्धितफलदानं ॥ सतिलंगुडसंयुक्तंफलंप्रीतिकरंनृणां ॥ वर्धितंप्रगृहाणेदमतःशांतिंप्रयच्छमे ॥ छ ॥ अथतप्तजलेतंडुलनिर्वाप[आधणभरणें]दानं ॥ अक्षय्यान्नपरिपोषतुष्ट्यादिप्राप्त्यैसुतप्तजलेतंडुलावापं० ॥ विप्रगृहंगत्वामहानसेस्थालीस्थतप्तजलेतंडुलान्निर्वपेत् ॥ स्थाल्यांतप्तांबुयुक्तायामक्षय्यान्नप्रतुष्टये ॥ कुटुंबाशनपर्याप्तांस्तंडुलान्निर्वपाम्यहं ॥ छ ॥ अथघरट्टदानं ॥ सर्वधान्यसमृद्ध्येघरट्ट० ॥ शालिगोधूमसंयुक्तंघरट्टंधान्यपेषणं ॥ ददामिसर्वसस्यानांसमृद्धिकरमुत्तमं ॥ छ ॥ अथपाकभांडदानं ॥ नित्यतृप्तिपुष्टिसुखक्षेमाभिवृद्ध्येदंपतीभोजनपर्याप्तामान्नसहितंपाकोपकरणस्थालीदर्व्यादिभांडदानंकरिष्ये ॥ ताम्रायसारकूटानिभाण्डानिविविधानिच ॥ नित्यतृप्तिसुखार्थायपाकोपकरणंददे ॥ छ ॥ अथरसरंगदानं ॥ भर्तृपुत्राद्यवियोगसुखप्राप्तयेरसरंगदानंक० ॥ पात्रद्वयमिदंपूर्णंकुंकुमेनगुडेनच ॥ अवियोगसुखार्थायददामिहितमंगलं ॥छ॥ अथनिर्झर [वाहतीधार] दानं ॥ अविच्छिन्नशुभसंततिविविधान्नसमृद्ध्येनिर्झरदानं०॥ प्रवहन्निर्झरक्लिन्नतंडुलप्रस्थपूरितं ॥ वस्त्रच्छन्नंददेपात्रंवंशवृद्ध्यन्नपूर्तिदं ॥ छ ॥ अथसिद्धस्थालीदानं ॥ इष्टफलप्राप्त्यै० ॥ सिद्धस्थालीमिमांविप्रसकलाभीष्टसिद्धिदां ॥ सोपस्करांप्रयच्छामिप्रीयतांमेदिवाकरः ॥ छ ॥ अथपृष्ठोदरदानं ॥ भ्रातृपुत्रादिविवृद्ध्येपृष्ठोदरदानं० ॥ शरावयुगलंविप्रधान्यपूर्णंमनोहरं ॥ गृहाणविधिनादत्तंसोदरौरसवर्धनं ॥ छ ॥ अथकुलद्वयदानं ॥ पितृभर्तृकुलाभ्युदयसुखसमृद्ध्ये कुलद्वय० ॥ द्वारोभयप्रदेशस्थंधान्यराशिद्वयंमहत् ॥ प्रकरोतुमयादत्तंपितृभर्तृकुलोदयं ॥ ॥ अथात्रुटितवल्लिदानं ॥ अच्छिन्नवल्लीप्रता

नवत्संततिविस्तरादिसिद्धये अत्रुदित० ॥ तिलचूर्णकृतंद्रव्यंसगुडंमुष्टिपंचकं ॥ ददामितेनमेभूयाद्वंशवृद्धिःप्रतानवत् ॥ छ ॥
अथमहानसदानं ॥ इहामुत्रक्षुत्तृड्बाधोपशमनार्थंमहानसदानं० ॥ महानसंगुडमयमिक्षुदंडकृतेंधनं ॥ क्षुत्तृषोःशमनंनित्यंगृहाणे
दंद्विजोत्तम ॥ छ ॥ अथेक्षुस्तंबादिहारणं ॥ ऐहिकामुष्मिकसुखभोगप्राप्तयेविप्रैर्विप्रस्त्रीभिर्वेक्षुस्तंबादिहारयिष्ये ॥ संघातमिक्षु
दंडानांपीयूषरसवर्षणं ॥ नानाभोगसुखायेमंहारयाम्यर्कतुष्टये ॥ नारिकेलफलान्यद्यसर्वदेवप्रियाणिच ॥ रुचिराणिसुवृत्ता
निहारयाम्यर्कतुष्टये ॥ स्वादूनिगुडखंडानिरसानांप्रवराणिच ॥ सर्वप्रियाण्यनर्घाणिहारयिष्येर्कतुष्टये ॥ इमान्यष्टशतेक्षुस्तंबा
दीनि० ॥ छ ॥ गौरीहरदानं ॥ दांपत्यसुखाभिवृद्धयेगौरीहरदानंक० ॥ गुडगौरीसमाश्लिष्टंनवनीतमयंहरं ॥ ददामिवस्त्रसंयु
क्तंदंपत्योःसुखवर्धनं ॥ छ ॥ तिलपात्रदानं ॥ तिलाःकश्यपसंभूतास्तिलाःपापहराःशुभाः ॥ तिलपात्रप्रदानेनअतःशांतिंप्रय० ॥
गृहाणतैजसंपात्रंपरमान्नेनपूरितं ॥ दानेनानेनमेनित्यंप्रसीदतुदिवाकरः ॥ छ ॥ वरहस्तदानं ॥ सर्वेष्टदायकंश्रेष्ठंतिलपिष्टंगुडा
न्वितं ॥ वरहस्तप्रदानेनवरदोस्तुरविर्मम ॥ छ ॥ सूर्यबिंबदानं ॥ विमलकांतिकीर्त्यायुरैश्वर्यादिफलावाप्तये सूर्यबिंबदानंक० ॥
कांस्यपात्रेस्थितंसाज्येस्वर्णबिंबंरवेःशुभं ॥ ददामिकांतिकीर्त्यायुरैश्वर्यसुखपुष्टिदं ॥ इतिसंक्रांतिदानानि ॥ ॥ छ ॥
॥ ८० ॥ व्यतीपातदानादि ॥ ॥ संकल्पपूर्वकंजनार्दनंव्यतीपातंचसंपूज्य ॥ देशकालौसंकीर्त्यममाशेषपापक्षयपूर्वकंश्री
महाविष्णु (सूर्य)प्रीतयेव्यतीपातपर्वनिमित्तंस्वर्णदानंत्रयोदशामुकफलदानंवाकरिष्ये ॥ इतिसंकल्प्य ॥ शंकुकर्णप्रलंबोष्ठलं
बभ्रूर्दीर्घनासिक ॥ अष्टनेत्रचतुर्वक्रशतयोजनविस्तर ॥ व्यतीपातनमस्तेस्तुसोमसूर्यसुतप्रभो ॥ यद्दानादिकृतंकिंचित्तदनंतमि

हास्तुमे ॥ कुरुक्षेत्रमयंदेशोविप्रोनारायणःस्वयं ॥ अनेनस्वर्णदानेनप्रीयतांमेजनार्दनः ॥ इतिव्यतीपातदानं ॥ ॥ ॥

॥ ८१ ॥ माघस्नानं ॥ ॥ आचमनादिदेशकालकीर्तनांतेममकायिकवाचिकमानसिकसांसर्गिकसमस्तपापक्षयद्वाराश्रीमाधवप्रीत्यर्थंमाघस्नानंकरिष्ये ॥ इतिसंकल्प्य ॥ माघमासमिमंपूर्णंस्नास्येहंदेवमाधव ॥ तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसि ॥ इत्येकंतीर्थमुपेत्य ॥ दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच ॥ प्रातःस्नानंकरोम्यद्यमाघेपापविनाशनं ॥ मकरस्थेरवौमाघेगोविंदाच्युतमाधव ॥ स्नानेनानेनमेदेवयथोक्तफलदोभव ॥ इमौमंत्रौसमुच्चार्यस्नायान्मौनसमन्वितः ॥ प्रत्यहंसूर्यार्घ्यदानमंत्रः ॥ सवित्रेप्रसवित्रेचपरंधामजलेमम ॥ त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा ॥ इतिसूर्यायार्घ्यंदत्वामाधवंपूजयेत् ॥ ॥

॥ ८२ ॥ रथसप्तमीपूजा ॥ ॥ अत्रव्रतेषष्ठ्यामेकभक्तंकृत्वासप्तम्यामरुणोदयेस्नानंकार्यं ॥ तत्रमंत्रः ॥ यदाजन्मकृतंपापंमयाजन्मसुजन्मसु ॥ तन्मेरोगंचशोकंचमाकरीहंतुसप्तमी ॥ एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितं ॥ मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः ॥ इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके ॥ सप्तव्याधिसमायुक्तंहरमाकरिसप्तमि ॥ इतिसंप्रार्थ्यस्नात्वाआचमनादिदेशकालकीर्तनांतेममश्रीसूर्यप्रीतिद्वाराइहजन्मनिजन्मांतरेचाखंडसौभाग्यपुत्रपौत्रधनधान्यादिमनसेप्सितकामनासिद्ध्ये श्रीसूर्यपूजांक० ॥ गणपतिपूजनकलशार्चनसंभारप्रोक्षणांतेरक्तचंदनेनरथारूढंसूर्यंविलिख्यतस्मिन्सूर्ययंत्रेवा ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ इतिसूर्यंध्यात्वा ॥ पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंस्थश्चद्विभुजःस्यात्सदारविः ॥ इत्यावाहनादिषोडशोपचारान

॥ ८७॥

र्पयेत् ॥ नैवेद्यार्थतत्रैवपायसंनिर्मायार्पयंतीत्याचारः ॥ पूजांते ॥ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयायत्रिगुणात्मधारिणेविरिंचिनारायणशंकरात्मने ॥ इतिनत्वा ॥ रक्ताक्षतमाल्योपेतान्यर्घ्याणिदद्यात् ॥ सप्तसप्तिवहप्रीतसप्तलोकप्रदीपन ॥ सप्तमीसहितोदेवगृहाणार्घ्यंदिवाकर ॥ इतिमंत्रेणाथवा मित्रायनमःइदमर्घ्यं समर्पयामि ॥ एवं रवये० सूर्याय० भानवे० खगाय० पूष्णे० हिरण्यगर्भाय० मरीचये० आदित्याय० सवित्रे० अर्काय० भास्कराय० इति ॥ एकचक्रोरथोयस्यदिव्यःकनकभूषणः ॥ समेभवतुसुप्रीतःपद्महस्तोदिवाकरः ॥ आवाहनंन० यस्यस्मृत्या० इत्यादिप्रार्थ्यपूजांसमापयेत् ॥

॥ ८३ ॥ शिवरात्रिपूजा ॥ ॥ त्रयोदश्यांकृतैकभक्तश्चतुर्दश्यांकृतनित्यक्रियःप्रातर्मंत्रेणसंकल्पंकुर्यात् ॥ देशकालौस्मृत्वा ॥ शिवरात्रिव्रतंह्येतत्करिष्येहंमहाफलं ॥ निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते ॥ चतुर्दश्यांनिराहारोभूत्वाशंभोपरेहनि ॥ भोक्ष्येहंभुक्तिमुक्त्यर्थंशरणंमेभवेश्वर ॥ इति ॥ द्विजस्तुरात्रींप्रपद्येजननीमित्यृचावपिपठित्वाजलमुत्सृजेत् ॥ ततःसायाह्नेकृष्णतिलैःस्वगायत्र्याजलाशयेगृहेवास्नात्वा धृतभस्मत्रिपुंड्रुद्राक्षोनिशामुखेशिवायतनंगत्वाक्षालितपादःस्वाचांतउदङ्मुखोदेशकालौसंकीर्त्य शिवरात्रौशिवप्रीत्यर्थंप्रथमयामपूजांकरिष्येइतियामचतुष्टयेभिन्नपूजाचतुष्टयचिकीर्षायांसंकल्पः ॥ सकृत्पूजाचिकीर्षायांश्रीशिवप्रीत्यर्थंशिवरात्रौश्रीशिवपूजांकरिष्यइतिसंकल्पः ॥ तत्रादौसामान्यतःपूजाविधिरुच्यते ॥ यामभेदेनविशेषस्तुअग्रेवक्ष्यते ॥ तत्रसंकल्पांतेगणेशंसंपूज्यपृथ्वीत्याद्यासनविधिंपौरुषसूक्तन्यासादिविधाय ॥ अस्यश्रीशिवपंचाक्षरमंत्रस्य वामदेवऋषिः अनुष्टुप्छंदः श्रीसदाशिवोदेवता श्रीसदाशिवप्रीत्यर्थे न्यासेपूजनेजपेचविनियोगः ॥ ॐ वामदेवऋषयेनमः शिर

सि ॥ ॐ अनुष्टुप्छंदसेनमो मुखे ॥ ॐ श्रीसदाशिवदेवतायैनमो हृदि ॥ ॐ नंतत्पुरुषायनमः हृदये ॥ ॐ मं अघोरायनमः पादयोः॥
ॐ शिंसद्योजातायनमः गुह्ये ॥ ॐ वांवामदेवायनमः मूर्ध्नि ॥ ॐ यंईशानायनमः मुखे ॥ ॐ ॐ हृदयायनमः ॐ नंशिरसेस्वा
हा ॐ मंशिखायैवषट् ॐ शिंकवचायहुं ॐ वांनेत्रत्रयायवौषट् ॐ यं अस्त्रायफट् ॥ कलशपूजादिसंभारप्रोक्षणांते ॥ ॐ त्र्यंबकं
यजामहे० ॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं ॥ पद्मासीनंसमं
तात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं ॥ इतिदेवंध्यात्वा ॥ प्राणप्रतिष्ठांकृत्वास्था
प्यलिंगंस्पृशन् ॐ सहस्रशीर्षा० ॐ भूःपुरुषंसांबसदाशिवमावाहयामि ॐ भुवःपुरुषंसांब० ॐ स्वः पुरुषंसांब० ॐ भूर्भुवःस्वःपु
रुषंसांब० इत्यावाहयेत् ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं ॥ तावत्त्वंप्रीतिभावेनलिंगेस्मिन्सन्निधोभव ॥ इतिपुष्पांज
लिंदद्यात् ॥ (आवाहनाद्युपचारेषुवैदिकपौराणमंत्रसमुच्चयोपीच्छयाकार्यः ॥ स्थावरलिंगेपूर्वसंस्कृतचरलिंगेचप्राणप्रतिष्ठाद्या
वाहनांतंनकार्यं)॥ ॐपुरुषएवेदं० ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥ ॐ नमःशिवायश्रीसांबसदाशिवायनमःआस
नं ॥ एवमग्रेपिपंचाक्षरादिपाठः ॥ (स्त्रीशूद्रश्चेत् ॐ नमःशिवायेतिपंचाक्षरीस्थाने श्रीशिवायनमइतिनमोंतमंत्रेणपूजयेत्) ॥
ॐ एतावानस्य० ॐ भवेभवेनातिभवेभवस्वमां ॐ नमःशिवायश्रीसांबसदाशिवायनमःपाद्यं॥ॐ त्रिपादूर्ध्व० ॐ भवोद्भवायनमः ॥ ८८ ॥
ॐ नमःशिवायश्रीसांबस० अर्घ्यं० ॥ ॐतस्माद्विराळ० ॐ वामदेवायनमः ॐ नमःशिवायश्रीसांब० आचमनं०॥ॐ यत्पुरुषेण०
ॐ ज्येष्ठायनमः ॐ नमःशिवाय० स्नानं ॥ ततोमूलमंत्रेणआप्यायस्वेत्यादिभिश्चपंचामृतैःसंस्नाप्य ॥ मूलेनाभ्यंगोष्णोदकं

धोदकस्नानेचकृत्वा ॥ आपोहिष्ठेतितिसृभिःशुद्धोदकेनप्रक्षाल्यततःपूर्वपूजांतेएकादशावृत्त्यैकावृत्त्यावारुद्रेणपुरुषसूक्तेनचचं
दनकुंकुमकर्पूरवासितजलेनाभिषेकंकृत्वा ॐ नमःशिवायेतिस्नानांतेआचमनंदत्वासाक्षतजलेनतर्पणंकार्यं ॥ ॐ भवंदेवंतर्पया
मि १ शर्वंदेवंतर्पयामि २ ईशानंदेवंतर्पयामि ३ पशुपतिंदेवंतर्पयामि ४ उग्रंदेवंत० ५ रुद्रंदेवंत० ६ भीमंदेवंत० ७ महांतंदेवंत०
८॥ भवस्यदेवस्यपत्नींतर्पयामि शर्वस्यदेवस्यप० ईशानस्यदेवस्यप० पशुपतेर्देवस्यप० उग्रस्यदेवस्यप० रुद्रस्यदेवस्यप० भीमस्य
देवस्यप० महतोदेवस्यप० ८॥ ॐतंयज्ञंबर्हिषि० ॐ ज्येष्ठायनमः ॐ नमःशिवायश्रीसांब० वस्त्रं० ॥ मूलेनाचमनं ॥ ॐतस्मा
द्यज्ञा० ॐ रुद्रायनमः ॐ नमःशिवाय० यज्ञोपवीतं० मूलेनाचमनं ॥ ॐतस्माद्यज्ञात्सर्वहुतऋचः० ॐ कालायनमः ॐ नमः
शिवाय० चंदनं०॥ ॐ कलविकरणायनमः ॐनमःशिवायश्री० अक्षतान्० ॥ ॐ तस्मादश्वा० ॐ बलविकरणायनमः ॐनमः
शिवायश्रीसांब० पुष्पाणि० ॥ सहस्रमष्टोत्तरशतंवासहस्राष्टोत्तरनामभिर्मूलमंत्रेणवाबिल्वपत्राण्यर्पयेत् ॥ ॐ यत्पुरुषं० ॐबला
यनमः ॐ नमःशिवायश्रीसांब० धूपं॥ ॐ ब्राह्मणोस्य० ॐ बलप्रमथनायनमः ॐ नमःशिवायश्रीसांब० दीपं० ॥ ॐ चंद्रमा
मनसो० ॐ सर्वभूतदमनायनमः ॐ नमःशिवाय० नैवेद्यं० ॥ मूलेनाचमनंफलंच॥ ॐ मनोन्मनायनमः ॐ नमःशिवाय०
तांबूलं० मूलेनदक्षिणां०॥ मूलेनवैदिकैर्मंत्रैश्चनीराजनं०॥ ॐ नाभ्याआसी० ॐ नमःशिवाय प्रदक्षिणाः॥ ॐ सप्तास्यासन्० भवा
यदेवायनमः शर्वायदेवायेत्याद्यष्टौ भवस्यदेवस्यपत्न्यै इत्यष्टौच नमस्कारान्कृत्वांतेरेवपुष्पांजलिः ॥ अथवा ॐयज्ञेनयज्ञ०
ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवो ॐ नमःशिवाय० मंत्रपुष्पं० ॥

शिवाय० रुद्राय० पशुपतये० नीलकंठाय० महेश्वराय० हरिकेशाय० विरूपाक्षाय० पिनाकिने० त्रिपुरांतकाय० शंभवे०
शूलिने० महादेवायनमइतिद्वादशनामभिर्द्वादशपुष्पांजलीन्दत्वा मूलेनप्रदक्षिणानमस्कारान्कृत्वा ॥ शिवरात्रिव्रतंदेवपूजाजप
परायणः ॥ करोमिविधिवद्दत्तंगृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यंदत्वा ॥ नित्यंनैमित्तिकंकाम्यंयत्कृतंतुमयाशिव ॥ तत्सर्वंपरमे
शानमयातुभ्यंसमर्पितं ॥ इतिपूजांसमर्प्यस्तोत्रेणप्रणम्य मूलमंत्रमष्टोत्तरशतंजप्त्वा ॥ गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं ॥
सिद्धिर्भवतुमेदेवत्वत्प्रसादान्महेश्वर ॥ इतिजपंनिवेद्य ॥ यत्किंचित्कुर्महेदेवसदासुकृतदुष्कृतं ॥ तन्मेशिवपदस्थस्यभुंक्ष्वक्षप
यशंकर ॥ शिवोदाताशिवोभोक्ताशिवःसर्वमिदंजगत् ॥ शिवोजयतिसर्वत्रयःशिवःसोहमेवहि ॥ इतिप्रार्थ्य देवहृदयस्थंपादस्थं
चपुष्पमादायप्रणम्य देवेनदत्तमितिध्यात्वा ॥ प्रपन्नंपाहिमामीशभीतंमृत्युमहार्णवात् ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारच
र्चिताः ॥ उच्छिष्टभोजिनोदासास्तवमायांजयेमहि ॥ इतिमूर्ध्निधृत्वा मंत्रहीनंक्रियाहीनमित्यादिभिःक्षमापयित्वा ॥ अनेन
पूजनेनसांबसदाशिवःप्रीयतामितिनिवेदयेत् ॥ इतिकेवलशिवरात्रिव्रतपूजाविधिःसमाप्तः ॥ ॥ छ ॥ ॥ छ ॥

॥ ८४ ॥ यामेषुपूजाचतुष्टयेविशेषः ॥ ॥ तत्रप्रथमयामेमूलमंत्रांतेश्रीशिवायासनंसमर्पयामीतिशिवनाम्नासर्वोपचारसम
र्पणम् ॥ द्वितीययामेशिवरात्रौद्वितीययामपूजांकरिष्यइतिसंकल्प्यश्रीशंकरायासनमितिशंकरनाम्ना ॥ ततोमहानिशिनिशीथ
पूजांकरिष्यइतिसंकल्प्यश्रीसांबसदाशिवायासनमितिपूर्ववत्पूजनं ॥ ततस्तृतीययामपूजांकरिष्यइत्युक्त्वाश्रीमहेश्वरायासनमि
त्यादि ॥ एवमेवचतुर्थयामेश्रीरुद्रायेतिरुद्रनाम्नापूजनं ॥ प्रतियामंतैलाभ्यंगपंचामृतोष्णोदकशुद्धोदकगंधोदकाभिषेकाःकार्याः

यज्ञोपवीतांतेगोरोचनकस्तूरीकुंकुमकर्पूरागुरुचंदनमिश्रितानुलेपेनलिंगंलेपयेत् ॥ पंचविंशतिपलमितःसर्वोनुलेपइतिअनुलेप
परिमाणं यथाशक्तिवा ॥ धत्तूरकरवीराम्रकुसुमैर्बिल्वपत्रैश्चपूजनमतिप्रशस्तं ॥ पुष्पाभावेशालितंडुलगोधूमयवैःपूजा ॥ नैवे
द्योत्तरंतांबूलमुखवासौउक्तौ ॥ नागवल्लीपत्रक्रमुकफलशुक्त्यादिचूर्णैतित्रयंतांबूलसंज्ञं ॥ एतदेवनारिकेलकर्पूरैलाकंकोलैःसहि
तंमुखवाससंज्ञं ॥ शालिपिष्टनिर्मितैःषड्विंशतिघृतदीपैर्नीराजनं ॥ लिंगमूर्ध्निदध्यक्षतपुष्पदूर्वागोरोचनसर्षपयुतस्वर्णपद्मनिवे
दनं ॥ एतेषामन्यतमद्रव्यालाभेतत्तद्द्रव्यंस्मरेद्बुधः ॥ सर्वपूजांतेप्रार्थना ॥ नित्यंनैमित्तिकंकाम्यंयत्कृतंतुमयाशिव ॥ तत्सर्वं
परमेशानमयातुभ्यंसमर्पितमिति ॥ एवंयामचतुष्टयेर्घ्यभेदःकौस्तुभे ॥ सचेत्थं ॥ चंदनाक्षतदूर्वांकुशफलयुतमर्घ्यंप्रतियामं
दद्यात् ॥ तत्रप्रथमयामेमंत्रः ॥ नमःशिवायशांतायसर्वपापहरायच ॥ शिवरात्रौमयादत्तंगृहाणार्घ्यममप्रभो ॥ द्वितीये—म
याकृतान्यनेकानिपापानिहरशंकर ॥ गृहाणार्घ्यमुमाकांतशिवरात्रौप्रसीदमे ॥ महानिशि (निशीथे)—शिवरात्रिव्रतंदेवपूजाज
पपरायणः ॥ करोमिविधिवद्दत्तंगृहाणार्घ्यंनमोस्तुते ॥ तृतीये—दुःखदारिद्र्यभारैश्चदग्धोहंपार्वतीपते ॥ त्रायस्वमांमहादेवगृ
हाणार्घ्यंनमोस्तुते ॥ चतुर्थे—किंनजानासिदेवेशत्वयिभक्तिंप्रयच्छमे ॥ स्वपादाग्रतलेदेवदास्यंदेहिजगत्पते ॥ ततःपूजानिवे
दनं ॥ मंत्रस्तु ॥ नमोयज्ञजगन्नाथनमस्त्रिभुवनेश्वर ॥ पूजांगृहाणमेदत्तांमहेशप्रथमेपदे ॥ इतिप्रथमयामे ॥ पूर्वेनंदिमहाकालौ
गणभृंगीचदक्षिणे ॥ वृषस्कंदौपश्चिमेतेदेशकालौतथोत्तरे ॥ गंगाचयमुनापार्श्वेपूजांगृह्णनमोस्तुते ॥ इतिद्वितीये ॥ नमोव्यक्ता
यसूक्ष्मायनमस्तेत्रिपुरांतक ॥ पूजांगृहाणदेवेशयथाशक्त्युपपादितां ॥ इतितृतीये ॥ बद्धोहंविविधैःपाशैःसंसारभयबंधनैः ॥

पतितंमोहजालेमांत्वंसमुद्धरशंकर ॥ इतिचतुर्थे ॥ अन्यत्समानं ॥ यामचतुष्टयेपिनृत्यगीतकथाश्रवणादिनाजागरणंकार्यं ॥ ततःप्रभातेस्नात्वा पुनःशिवंसंपूज्य पूर्वोक्तद्वादशनामभिर्द्वादशब्राह्मणानशक्तावेकंवासंपूज्यतिलपक्वान्नपूर्णान्द्वादशकुंभानेकं वादत्वाव्रतमर्पयेत् ॥ यन्मयाद्यकृतंपुण्यंतद्रुद्रस्यनिवेदितं ॥ त्वत्प्रसादान्मयादेवव्रतमद्यसमापितं ॥ प्रसन्नोभवमेश्रीमन्सद्ग तिःप्रतिपाद्यतां ॥ त्वदालोकनमात्रेणपवित्रोस्मिनसंशयः ॥ इति ॥ ततोब्राह्मणान्भोजयित्वापूर्वनिर्णीतेकालेस्वजनैःसहपारणं कुर्यात् ॥ तत्रमंत्रः ॥ संसारक्लेशदग्धस्यव्रतेनानेनशंकर ॥ प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभव ॥ इति ॥ दक्षिणांदत्वाशिषो गृहीत्वाकर्मसमाप्तिः ॥ इतिशिवरात्रिव्रतयामचतुष्टयभेदभिन्नःपूजाविधिःसंपूर्णः ॥ ॥ छ ॥ ॥ छ ॥

॥८५॥ पार्थिवलिंगपूजा ॥ ॥ अथकृत्यरत्नावल्यनुसारेणपार्थिवलिंगेशिवपूजाप्रयोगः ॥ कर्तास्नानादिविधाय भस्मनात्रिपुं ड्रंधृत्वोदङ्मुखउपविश्याचम्यपवित्रपाणिःप्राणानायम्यअघोरेभ्योहिरण्यगर्भोरुद्रोनुष्टुप् ॥ मालाधारणे० ॥ मंत्रांतेसप्तविंशति रुद्राक्षमालांकंठेधृत्वा देशकालौस्मृत्वाममोपात्त० पार्थिवलिंगेश्रीशिवपूजनंक० ॥ घंटानादंकृत्वा गंगेचयमुने० इतिकलशे तीर्थान्यावाह्यतंसंपूज्यलिंगंकुर्यात् ॥ हरायनमइति (सर्वाधारधरांदेवत्वद्रूपांमृत्तिकामिमां ॥ लिंगार्थंतुप्रगृह्णामिप्रसन्नोभव मेप्रभो ॥ इतिवा) मृदमाहृत्य शोधितायांतस्यांशुचिजलंप्रक्षिप्य महेश्वरायनमइतिसंघट्टनंकृत्वातेनपिंडेनाशीतिगुंजापरिमि ताद्क्षादधिकपरिमाणमंगुष्ठादधिकोन्नतंलिंगंकृत्वा शूलपाणयेनमःशिवेहसुप्रतिष्ठितोभवेतिप्रतिष्ठाप्य ध्यायेन्नित्यंमहेशमि तिध्यात्वा त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् ॥ पूजनेवि० ॥ ॐ त्र्यंबकं० ॥ पिनाकधृषेनमःशिवेहागच्छेत्यावाह्य ॐत्र्यंबकं० ॐनमःशिवाय

आसनंपरिकल्पयामि ॥ पाद्यंस० ॥ अर्घ्यंस० ॥ आचमनंस० ॥ त्र्यं० पशुपतये० स्नानंस० ॥ आच० ॥ त्र्यं० ॐ नमः०
वस्त्रंपरि० आच० ॥ उपवीतं ॥ आच० ॥ गंधादिप्रणामांते ॐ योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै ॥ तꣳहदेवमा
त्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये ॥ इतिनमस्कृत्य प्राच्यादिष्वष्टमूर्तीर्गंधपुष्पाक्षतैःपूजयेत् ॥ प्राच्यां शर्वायक्षितिमूर्तये
नमः ॥ ऐशान्यां भवाय जलमू० ॥ उदीच्यां रुद्रायाग्निमू० ॥ वायव्यां उग्राय वायुमू० ॥ प्रतीच्यां भीमायाकाशमू० ॥
नैर्ऋत्यांपशुपतयेयजमानमू० ॥ अवाच्यां महादेवायसोममू० ॥ आग्नेय्यां ईशानायसूर्यमू० ॥ ततोयथासंभवंरुद्रस्तोत्रादि
नास्तुत्वा ॥ देशकालानुसारेणयथाशक्तिकृतंमया ॥ कर्मेदंपूर्णतांयातुत्वत्प्रसादाज्जगत्प्रभो ॥ त्र्यं० ॥ महादेवायनमइतिविस
र्जनं ॥ ॐ भूर्भुवःस्वरितिजपित्वाचम्यपठेत् ॥ ज्ञात्वाज्ञात्वाकृतेनाथविधिनाविधिनापिवा ॥ प्रीणातुभगवानीशः कर्मणानेन
शाश्वतः ॥ स्त्रीणांतुशिवायनमइतिमंत्रः ॥ अस्याःपूजायाःशिवरात्रिपूजयासहानुष्ठाने यथासंभवंपंचामृताभिषेकाद्यपिकार्यं ॥

॥ ८६ ॥ होलिकापूजा ॥ ॥ तत्रपूर्णिमायामुक्तकालेउपलिप्तेस्वस्तिकादिचित्रितेगृहांगणादौराशीकृतशुष्कगोमयपिंडदारु
खंडरूपामेरंडदंडादिभूषितांवर्तुलांपुरुषप्रमाणांहोलिकाचितिंविरच्यगृहीतसंभारःकर्तादेशकालौसंकीर्त्य ममसकुटुंबसपरिवारस्य
श्रीढुंढाराक्षसीप्रीतिद्वारातत्कर्तृकविविधबालजनोपसर्गाग्निबाधोत्पातभयप्रशमपूर्वकंक्षेमायुःपुष्टिमयैश्वर्यसुखसंपत्कुलाभिवृद्ध्या
द्यभीष्टफलसिद्धिकामःश्रीहोलिकापूजनंकरिष्ये ॥ संभारप्रोक्षणांते ॥ दीपयाम्यद्यतेघोरांचितिंराक्षससत्तमे ॥ हितायसर्वजगतां
प्रीतयेपार्वतीपतेः ॥ इतिमंत्रेणतामग्निनाप्रदीप्य (प्रतिमापूजनपक्षेऽग्रेप्रदीपनं) सप्तहस्तांचतुःशृंगींसप्तजिह्वांद्विशीर्षकां ॥

त्रिपदांहृष्टवदनांसुखासीनांशुचिस्मितां ॥ मेषारूढामग्निरूपांजिह्वाललनभीषणां ॥ तप्तकांचनसंकाशांहोलिकांहृदिचिंतये ॥ इतिध्यात्वा ॥ अस्माभिर्भयसंत्रस्तैःकृतात्वंहोलिकेयतः ॥ अतस्त्वांपूजयिष्यामिभूतेभूतिप्रदाभव ॥ इतिषोडशोपचारैःपूजयेत् ॥ तत्रनैवेद्यंनिवेद्यतस्यांप्रक्षिप्यनीराजनांते साज्येनपयसाचितिमभ्युक्ष्यत्रिःपरिक्रम्य देशभाषयाभगलिंगादिशब्दोच्चारणपूर्वंसर्वैःसहकरपृष्ठोष्ठसंयोगेनोच्चैर्घोषंकृत्वा ॥ नमस्तेसर्वकल्याणिनमस्तेकरुणालये ॥ नमस्तेहोलिकेदेविरुद्रस्यप्रियवादिनि ॥ इतिप्रणम्यपुष्पांजलिंदत्वा ॥ गुडोद्भवान्वृश्चिकांस्तुगृहाणपरमेश्वरि ॥ वृश्चिकोत्थानमेबाधाभवतुत्वत्प्रसादतः ॥ इतिगुडमयान्वृश्चिकादिकीटान्समर्प्य ॥ होलिकेहोलतनयेपूजांस्वीकृत्यमत्कृतां ॥ स्वस्थानंगच्छभद्रेत्वंरक्षमामग्निजाद्भयात् ॥ इतिप्रार्थ्यविसृज्य तत्प्रीत्यर्थंविप्रान्सुवासिनीश्चसंपूज्यसंभोज्यभूयसींदत्वा तांरात्रिंपौरैःसहगीताद्युत्सवेननीत्वाप्रातःश्वपचंस्पृष्ट्वास्नात्वानित्यकर्मांते क्षीरजलैर्धूलिमासिच्य ॥ वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच ॥ अतस्त्वंपाहिनोदेविविभूतेभूतिदाभव ॥ इतिविभूतिमभिवंद्य ॥ होलिकादेहसंभूतसर्वभीतिविनाशन ॥ मदीयदेहजान्रोगान्भस्मनाशयनाशय ॥ इतिसर्वांगेषुविलिप्यमध्याह्नेपुनःस्नात्वाभोजनादिकुर्यात् ॥ अत्रदैशिकक्रीडादियथाचारंकार्यं ॥ ॥ ॥ ॥ ॥

॥ ८७ ॥ सत्यनारायणपूजा ॥ ॥ व्रतीसंक्रांतौपौर्णमास्यांचैकादश्यांयस्मिन्कस्मिन्दिनेवा सायंकालेस्नात्वापूजास्थानमागत्यआसनेउपविश्य आचम्यपवित्रंधृत्वासंकल्पंकुर्यात् ॥ अद्येत्यादिपूर्वोच्चारितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौअमुकगोत्रोऽमुकशर्माऽहंसकलदुरितोपशमसर्वापच्छांतिपूर्वकसकलमनोरथसिद्ध्यर्थं यथासंपादितसामग्र्या गणेशगौरीवरुणदेव

तागणपत्यादिचतुष्टयाष्टलोकपालदेवतासूर्यादिनवग्रहदेवताऽऽवाहनपूजनपूर्वकंश्रीसत्यनारायणपूजनंतत्कथाश्रवणंचकरिष्ये ॥
तथा कलशादिपूजांशरीरशुद्ध्यर्थं पुरुषसूक्तन्यासंचकरिष्ये ॥ आसनविध्यादिघंटादीपपूजनांते अपवित्रःपवित्रइतिपूजाद्र
व्याणिसंप्रोक्ष्य निर्विघ्नतासिद्ध्येगणपतिंचसंपूज्यकलशंस्थापयेत् ॥ महीद्यौरितिभूमिंस्पृष्ट्वा ॥ ओषधयइतितंदुलपुंजंकृत्वा ॥
आकलशेष्वितिकलशंसंस्थाप्य ॥ इमंमेगंगेइतिजलं ॥ कांडात्कांडादितिदूर्वाः॥ अश्वत्थेवइतिपंचपल्लवान् ॥ याःफलिनीरितिफलं॥
सहिरत्नानीतिपंचरत्नानि ॥ हिरण्यरूपइतिहिरण्यंचप्रक्षिप्य ॥ युवासुवासाइत्यनेनवस्त्रंसमर्प्यतदभावेअक्षतान्क्षिपेत् ॥ ततः
पूर्णादर्वीतिपूर्णपात्रंनिधाय तत्त्वायामि० कलशेवरुणगंधादिपंचोपचारैःपूजयेत् ॥ (अथवापुराणोक्तपद्धत्युक्तप्रकारेणकलशस्था
पनंयथा ॥ चतुर्भुजेशुक्लवर्णेदिव्याभरणभूषिते ॥ चतुर्दिङ्नागपृष्ठस्थेभूमेत्वांसंस्पृशाम्यहं ॥ इतिभूमिंस्पृष्ट्वा ॥ सर्वदेवमयंधा
न्यंसर्वोत्पत्तिकरंमहत् ॥ प्राणिनांजीवनोपायंस्थापयामीष्टसिद्धये ॥ इतिधान्यराशिंकृत्वा ॥ तत्र देवासुरैर्मथ्यमानादुत्पन्नोऽ
सिमहोदधेः ॥ कुंभत्वयिसुराःसर्वेतीर्थानिजलदानदाः ॥ तिष्ठंतिकामफलदारुद्रादित्यादयोऽपिच ॥ अतोऽत्रधान्यराशौत्वांपू
जार्थस्थापयाम्यहं ॥ इतिकलशंसंस्थाप्य ॥ गंगेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधुकावेरिकुंभेऽस्मिन्संनिधिंकुरु ॥ इ
तिशुद्धजलेनापूर्य ॥ कस्तूरीकुंकुमोपेतंकर्पूरेणचसंयुतम् ॥ चंदनंसर्वगंधाढ्यंकुंभेऽस्मिन्प्रक्षिपाम्यहं ॥ इतिगंधंप्र० ॥ कुष्ठमां
सीहरिद्राद्याःसर्वौषध्योऽमृतप्रभाः ॥ सर्वामयहराश्चातःकुंभेऽस्मिन्प्रक्षिपाम्यहम् ॥ इत्यौषधीः ॥ धान्यराजांश्चमांगल्येद्विज
प्रीतिकरान्यवान् ॥ यज्ञार्थंनिर्मितानस्मिन्कलशेप्रक्षिपाम्यहं ॥ इतियवान् ॥ त्वंदूर्वेऽमृतजन्मासिवंदितासिसुरासुरैः ॥ सौ

भाग्यंसततंदेहिसर्वकार्यकरीभव ॥ इतिदूर्वाः ॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवान् ॥ अस्मिन्कुंभेप्रक्षिपामिसर्वकर्मसुशोभनान् ॥ इतिपंचपल्लवांस्तत्त्वचश्चनिक्षिप्य ॥ गजाश्वरथ्यावल्मीकसंगमह्रदगोकुलात् ॥ मृदमानीयकुंभेऽस्मिन्प्रक्षिपामिचचत्वरात् ॥ इत्यष्टमृदः ॥ फलंमनोहरंस्वादुमुनिदेवप्रियंसदा ॥ अस्मिन्कुंभेप्रक्षिपामिसवदामंगलप्रदं ॥ इतिफलं ॥ सुवर्णरजतंमुक्ताराजावर्तप्रवालकं ॥ इमानिपंचरत्नानिकलशेप्रक्षिपाम्यहं ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशान्तिंप्रयच्छमे ॥ इतिहिरण्यं० ॥ ईषद्धौतेनशुभ्रेणसदशेनाहतेनच ॥ संवेष्टयामिकलशंनूतनेनसुवाससा ॥ इतिवाससासंवेष्ट्य ॥ पूर्णपात्रंताम्रमयंशालितंडुलपूरितं ॥ प्रधानदेवपूजार्थन्यसामिकलशोपरि ॥ इतिपूर्णपात्रंनिधाय) देवताआवाहयेत् ॥ ततःगणेशादीनांसूर्यादिनवग्रहाणांचतत्तन्मंत्रैरावाहनंकृत्वापूजनंकुर्यात् ॥ तदित्थं ॥ ॐ गणानांत्वा० गणेशायनमः गणेशंआवाहयामि ॥ ॐगौरीर्मिमाय० गौरीमा० ॐ तत्त्वायामि० वरुणमावा० ॥ गणपतिं दुर्गां क्षेत्रपालं वास्तोष्पतिं च आवाह्य ॥ इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं सोमं ईशानं च तत्तन्मंत्रैर्नाममंत्रैर्वाक्षतपुंजेष्वावाह्यसूर्यादीनावहयेत् ॥ तत्र मंत्राः ॥ॐ आकृष्णेन० सूर्यआवाहयामि ॥ॐ आप्यायस्व० चंद्रंआवाह०॥ ॐ अग्निर्मूर्धा० भौमंआवाह०॥ॐ उद्बुध्यध्वं० बुधंआवाह०॥ॐ बृहस्पतेअति०बृहस्पतिंआवा०॥ॐ शुक्रःशुशुक्वाँ०शुक्रंआ०॥ॐ शमग्निरग्निभिः०शनैश्चरंआ०॥ॐ कयानश्चित्र०राहुंआवा० ॥ ॐ केतुंकृण्वन्न० केतुंआवाहयामि ॥ तदस्तुमित्रावरुणेत्यनेनगणेशाद्यावाहितदेवताःसुप्रतिष्ठिताःसंतुइतिप्रतिष्ठाप्य ॐ भूर्भुवःस्वःगणेशाद्यावाहितदेवताभ्योनमःध्यायामि इत्यादिषोडशोपचारपूजांकुर्यात् ॥ अथध्यानं ॥ पुष्पंगृहीत्वाध्यानंकुर्या

त् ॥ शांताकारंभु० ॥ ध्यायेत्सत्यंगुणातीतंगुणत्रयसमन्वितं ॥ लोकनाथंत्रिलोकेशंकौस्तुभाभरणंहरिम् ॥ नीलवर्णपीतवासः
श्रीवत्सपदभूषितम् ॥ गोविंदंगोकुलानंदंब्रह्माद्यैरपिपूजितम् ॥ इतिध्यानं ॥ ॐसहस्रशीर्षा० ॥ आगच्छभगवन्देवस्थानेचा
त्रस्थिरोभव ॥ यावत्पूजांकरिष्येहंतावत्त्वंसंनिधोभव ॥ इत्यावाहनं ॥ ॐ पुरुषएवेदं० ॥ नानारत्नसमायुक्तंकार्तस्वरविभूषितम् ॥
आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां ॥ इत्यासनं ॥ ॐ एतावा० ॥ नारायणनमस्तेऽस्तुनरकार्णवतारक ॥ पाद्यंगृहाणदेवेशम
मसौख्यंविवर्धय ॥ इतिपाद्यं ॥ ॐत्रिपादूर्ध्व० ॥ व्यक्ताव्यक्तस्वरूपायहृषीकपतयेनमः ॥ मयानिवेदितोभक्त्याअर्घोयंप्रतिगृह्य
ताम् ॥ इत्यर्घ्यं ॥ ॐतस्माद्विराळ० ॥ मंदाकिन्यास्तुयद्वारिसर्वपापहरंशुभं ॥ तदिदंकल्पितंदेवसम्यगाचम्यतांत्वया ॥ इत्या
चमनं ॥ ॐयत्पुरुषेण० ॥ गंगाचयमुनाचैवगोदावरिसरस्वती ॥ तापीपयोष्णीरेवाचताभ्यःस्नानंकुरुप्रभो ॥ स्नानं० ॥ पंचामृ
तस्नानं ॥ ॐआप्यायस्व० ॥ सुरभेस्तुसमुत्पन्नंदेवर्षिपितृतृप्तिदं ॥ मयादत्तंपयोदेवस्नानार्थंप्रतिगृह्यतां ॥ इतिपयःस्नानं ॥ ॐद
धिक्राव्णो० ॥ दध्नाचैवमहादेवस्नापनंक्रियतेमया ॥ गृहाणत्वंसुराधीशप्रसन्नोमांभवाव्यय ॥ इतिदधिस्नानं ॥ ॐघृतंमिमिक्षे०॥
सर्पिषाचजगन्नाथस्नापनंक्रियतेऽधुना ॥ गृहाणश्रद्धयानंततवप्रीत्यैमनोहरम् ॥ इतिघृतस्नानं ॥ ॐ मधुवाता० ॥ इदंमधुमया
दत्तंतवतुष्ट्यर्थमेवच ॥ स्नातुंगृहाणदेवेशततःशांतिंप्रयच्छमे ॥ इतिमधुस्नानं ॥ ॐ स्वादुःपवस्व० ॥ सितयाचसुरश्रेष्ठस्नापनं
क्रियतेत्वयि ॥ तस्माद्भक्तपराधीनप्रसन्नोभवसर्वदा ॥ इतिशर्करास्नानं० ॥ इतिपंचामृतस्नानं० ॥ ॐगंधद्वारां० गंधोदकेनदे
वेशकुशपुष्पफलोदकैः ॥ रत्नांबुनाचशुद्धेनस्नापयामिपृथक्पृथक् ॥ इतिचंदनोदकस्नानं ॥ पुनर्मधुवाताइति मधुपर्कस्नानं ॥

अनंतसर्वकामानामधीशसर्वसौख्यद ॥ मधुपर्कंगृहाणेमंमयादत्तमधोक्षज ॥ ॐकनिक्रदत्० ॥ तैलंपुष्पसुगंधाढ्यंभ्रमद्भ्रमर
नादितं ॥ विलेपयामिसर्वांगेसुवर्णचषकस्थितं ॥ तैलाभ्यंगं ॥ उन्मर्दनंतवांगेऽस्मिंलेपयामिसुभक्तितः ॥ काश्मीरागरुकर्पूरमृ
गनाभिविनिर्मितं ॥ उन्मर्दनं ॥ स्नानार्थजलमानीतंशीतमुष्णंयथारुचि ॥ सुगंधितंसर्वनदीतीर्थेभ्यःप्रतिगृह्यतां ॥ इतिमांग
लिकस्नानं ॥ गंधादिदक्षिणांतोपचारैःसंपूज्य ॥ पुरुषसूक्तादिभिरन्यैरुद्रादिभिश्चाभिषेकः ॥ ॐतंयुज्ञं० ॥ वेदसूक्तसमायुक्तेय
ज्ञसामसमन्विते ॥ सर्ववर्णप्रदेदेववाससीप्रतिगृह्यताम् ॥ इतिवस्त्रं ॥ ॐतस्माद्यज्ञात्सर्वहुतः० ॥ ब्रह्मविष्णुमहेशैश्चनिर्मितंब्रह्म
सूत्रकं ॥ यज्ञोपवीतदानेनप्रीयतांकमलापतिः ॥ इतियज्ञोपवीतं ॥ ॐतस्माद्यज्ञात्सर्वहुतऋचः० ॥ श्रीखंडंचंदनंदिव्यंगंधाढ्यंसु
मनोहरं ॥ विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां ॥ इतिचंदनं ॥ ॐ अहिंरिवभोगैः ॥ कस्तूर्याद्याश्चयेगंधाभोगार्थंतेमयाहृताः ॥ अ
नेकगंधसंयुक्ताःप्रीत्यर्थंप्रतिगृह्यतां ॥ इतिपरिमलद्रव्याणिसौभाग्यद्रव्याणिचस० ॥ अलंकारार्थानक्षतांश्चस० ॥ ॐ तस्मादश्वा० ॥
मल्लिकादिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥ इतिपुष्पाणि ॥ अत्रसंभवेसहस्रतुलसीस
मर्पणं ॥ वनमालांसुगंधाढ्यांनानापुष्पैःसमन्वितां ॥ पूजार्थसाधितांदेवप्रीत्यर्थप्रतिगृह्यतां ॥ मालां ॥ ॐयत्पुरुषंव्यदधुः० ॥
वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोऽयंप्रतिगृह्यताम् ॥ धूपं ॥ ॐ ब्राह्मणोस्य० साज्यंचवर्तिसंयुक्तं
वह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह ॥ दीपं ॥ ॐचंद्रमामनसो० घृतपक्वंहविष्यान्नंपायसंचसशर्करं ॥
नानाविधंचनैवेद्यंविष्णोमेप्रतिगृह्यताम् ॥ नैवेद्यं ॥ सर्वपापहरंदिव्यंगांगेयंनिर्मलंजलं ॥ मयाह्याचमनंदत्तंगृह्यतांपुरुषोत्तम ॥

इत्याचमनं ॥ नारिकेरंमातुलिंगंकपित्थंकदलीफलं ॥ कूष्मांडंकर्कटीयुक्तंगृह्यतामखिलार्थद ॥ इदंफलंमयादेवस्थापितंपुरत
स्तव ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ इतिफलं ॥ लवंगकर्पूरयुतंतांबूलंसुरपूजितम् ॥ प्रीत्यागृहाणदेवेशममसौख्यं
विवर्धय ॥ इतितांबूलं ॥ ॐश्रियेजातः० ॥ चतुर्वर्तिसमायुक्तंघृतेनचसुपूरितम् ॥ नीराजनेनसंतुष्टोभवत्येवजगत्पतिः ॥ इति
नीराजनं ॥ कर्पूरदीपंसुमनोहरंप्रभोददामितेदेववरप्रसीदभो ॥ पापान्धकारंत्वरितंनिवारयप्रज्ञानदीपंमनसिप्रदीपय ॥ इति
कर्पूरार्तिक्यं ॥ ॐनाभ्याआसी० ॥ नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्र
कोटीयुगधारिणेनमः ॥ इतिनमस्कारं ॥ ॐसप्तास्यासन्० ॥ यानिकानिचपापानिजन्मांतरकृतानिच ॥ तानितानिविनश्यंति
प्रदक्षिणपदेपदे ॥ इतिप्रदक्षिणाः ॥ ॐयज्ञेनयज्ञ० ॥ कल्हारनीलकमलोत्पलपारिजातपुन्नागकैःकदलिचंपकपाटलैश्च ॥ बिल्व
प्रवालतुलसीशतपत्रजातीपुष्पैश्चक्लृप्तममुमंजलिमर्पयामि ॥ इतिअन्यैर्मंत्रैश्चपुष्पांजलिंसमर्पयेत् ॥ ततोगीतवाद्यनृत्यछत्रचाम
रादिराजोपचारार्थेऽक्षतान्समर्प्य देवंसंप्रार्थ्यस्तुवीत ॥ यन्मयाभक्तियुक्तेनपत्रंपुष्पंफलंजलं ॥ निवेदितंचनैवेद्यंतद्गृहाणानुकंप
या ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन ॥ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ॥ अमोघंपुंडरीकाक्षंनृसिंहंदैत्यसूदनम् ॥ हृषी
केशंजगन्नाथंवागीशंवरदायकं ॥ गुणत्रयंगुणातीतंगोविंदंगरुडध्वजं ॥ जनार्दनंजनातीतंजानकीवल्लभंहरिं ॥ प्रणमामिसदा
भक्त्यानारायणमतःपरम् ॥ दुर्गमेविषमेघोरेशत्रुभिःपरिपीडिते ॥ निस्तारयस्वसर्वेषुतथानिष्टभयेषुच ॥ नामान्येतानिसंकी
र्त्यईप्सितंफलमाप्नुयात् ॥ सत्यनारायणंदेवंवंदेहंकामदंप्रभुं ॥ लीलयाविततंविश्वंयेनतस्मैनमोनमः ॥ इतिप्रार्थना ॥ इति ॥

॥ ८८ ॥ गंगापूजनं ॥ ॥ तीर्थादागतःशुभदिनेसद्यएववापत्न्यासहोपविश्याचमनादिदेशकालकीर्तनांतेमयात्मनासहसमस्तपूर्वजोद्धारार्थंकृतभागीरथीस्नानादेःकल्पोक्तफलावाप्तयेआनीततीर्थोदकेगंगापूजनंकरिष्ये ॥ विभवेसतिगणपतिपूजनस्वस्तिवाचनेकृत्वाआसनादिसंभारप्रोक्षणांतेगंगांध्यायेत् ॥ सितमकरनिषण्णांशुभ्रवर्णांत्रिनेत्रांकरधृतकलशोद्यत्सोत्पलामत्यभीष्टां॥ विधिहरिहररूपांसेंदुकोटीरजुष्टांकलितसितदुकूलांजाह्नवींतांनमामि॥ इतिध्यानं॥ ॐसहस्रशीर्षा० अघक्षयकरेदेविचंद्रचूडप्रियेऽनघे ॥ निजरूपंसमासाद्यह्यागच्छममसंनिधौ ॥ आवाहनं॥ ॐपुरुषएवेदं० अनंतादिधराभागंममयच्छमहाफलं ॥ ब्रह्माद्रिशिखरेगंगेआसनंप्रतिगृह्यतां ॥ आसनं०॥ ॐएतावानस्य० नमोदेविमहापुण्येपुण्यतोयैःशुभैर्युते ॥ पाद्यंगृहाणमेदेविप्रसीदपरमेश्वरि॥पाद्यं०॥ ॐत्रिपादूर्ध्व० विष्णुपादाब्जसंभूतेबिभर्तित्वांशिवःस्वयं॥ अर्घ्यंगृहाणभोगंगेपापभंगेभयापहे॥ अर्घ्यं०॥ ॐतस्माद्विराळ०॥ त्वदुद्भवंमहापुण्यमानीयममृतोपमं॥ गृहाणाचमनंगंगेकृपयाभक्तवत्सले॥ आचमनीयं०॥ ॐयत्पुरुषेण०॥ क्षीरोदधिसमुद्भूतंस्नानार्थंतोयमुत्तमं॥ स्वीकुरुष्वमहाभागेगंगेसर्वाघनाशिनि ॥ स्नानं० ॥ ततःपंचामृतस्नानाद्यभिषेकांतंकुर्यात् ॥ ब्रह्मविष्णुशिवश्लाघ्येजगतःपापनाशिनि ॥ ततआचमनीयंवैगृहाणत्वंमयार्पितं ॥ अभिषेकस्नानानंतरंआचमनीयं० ॥ ॐतंयज्ञंब०॥ लसत्क्षौमयुगंदेविगुणाढ्यमनुकंपया॥ यथाशक्त्यामयानीतंगृहाणजगदीश्वरि॥ वस्त्रोपवस्त्रेस०॥ ॐतस्माद्यज्ञात्०॥सत्सूत्रगुंफितंदिव्यंपवित्रंपरमंशुभं ॥ गृहाणकंठभूषार्थंगंगेब्रह्मांडनिर्मिते ॥ कंठसूत्रं० ॥ ॐतस्माद्यज्ञा० ऋचः० ॥ कर्पूरागरुकस्तूरीकुंकुमादिमनोहरं ॥ गृहाणाक्षतगंधानिगंगेसर्वार्थदायिनि ॥ चंदनं० ॥ कुंकुमादिसौभाग्यद्रव्याणिगंधाक्षतांश्चस० ॥ ॐतस्मा

दर्वा० पारिजातकपुष्पाणिदिव्यगंधानिवैतथा ॥ यथर्तुभूतान्यन्यानिमयानीतानिसर्वतः ॥ यथासंभवपुष्पाणि विल्वतुलसीपत्रा
णिच० ॥ ॐयत्पुरुषं० ॥ सुगंधतरुसंपन्नंगंधद्रव्यविवर्धनं ॥ गृहाणधूपकंगंगेसंसारार्णवतारिणि ॥ धूपं० ॥ ॐब्राह्मणो० ॥ अनंतज्व
लितंदीपमज्ञानांधविनाशनं ॥ आर्तिक्यंचमयादत्तंगृहाणपरमेश्वरि ॥ दीपं० ॥ ॐचंद्रमाम० ॥ नानाभक्ष्यैःसमाकीर्णपक्वान्नैर्वि
विधैरपि ॥ नैवेद्यंतेमयादत्तंगृहाणसुरपूजिते ॥ नैवेद्यं० मध्येपानीयं उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं ॥ महाफलं
समानीतंगृहाणसरितांवरे ॥ मनोरमंफलंदेहिदेवदेवस्यवल्लभे ॥ फलं० ॥ कर्पूरैलालवंगादितांबूलीदलखादिरैः ॥ जातिपूग
फलैर्युक्तंत्रयोदशगुणान्वितं ॥ तांबूलं० ॥ न्यूनातिरिक्तपूजायाःसंपूर्णफलहेतवे ॥ दक्षिणांकांचनींदेविस्थापयामितवाग्रतः ॥
सुवर्णपुष्पदक्षिणांस० ॥ श्रियेजातइतिमहानीराजनं ॥ कर्पूरदीपं ॥ ॐनाभ्याआसी० ॥ नमःश्रेयस्करीदेविनमःपापप्रणाशिनि ॥
नमःशांतिकरीगंगेनमोदारिद्र्यनाशिनि ॥ नमस्कारं० ॥ ॐ सप्तास्यासन्० यानिकानिचेति प्रदक्षिणां० ॥ ॐ यज्ञेनयज्ञम० नमो
देव्याइति मंत्रपुष्पं० ॥ प्रार्थना ॥ मंदाकिनिनमस्तुभ्यंनमस्तेसुरपूजिते ॥ भोगावतिनमस्तुभ्यंनागैस्त्वंतत्रवंदिते ॥ भागीर
थिनमस्तुभ्यंसागराणांचपावनि ॥ प्रयोगेचत्रिरूपात्वंनैमिषेचसरस्वती ॥ विंध्येत्वंनर्मदादेविकुशतुल्यातुगौतमी ॥ तस्मात्त्वं
सर्वदासेव्याश्रद्धयाचकलौयुगे ॥ हरिद्वारेनमस्तुभ्यंसरिदीशेनमोनमः ॥ जयगंगेनमोगंगेगोदावरिनमोऽस्तुते ॥ भूतंभव्यंच
यत्पापंभविष्यतिचगौतमि ॥ विनाशंयातुतत्सर्वंप्रसादात्तवदुःखहे ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि ॥ यत्कृतंतुमयादे
विपरिपूर्णंतदस्तुमे ॥ प्रार्थनांस० ॥ अन्यथाशरणंनास्तित्वमेवशरणंमम ॥ तस्मात्कारुण्यभावेनरक्षमांपरमेश्वरि ॥ ततःदंपती

ब्राह्मणांश्चभोजयित्वादक्षिणांदत्वासुहृद्युतोभुंजीत ॥ इतितीर्थयात्रायाआगतस्यगंगाराधनप्रयोगः ॥ ॥ छ ॥

॥ ८९ ॥ रामनामग्रहणव्रतं ॥ ॥ आचमनादिदेशकालकथनांतेममश्रीरामप्रीतिद्वाराएतज्जन्मजन्मान्तरार्जितसकलदुरितोपशमपूर्वकमक्षय्यविष्णुलोकनिवाससुखसिद्ध्यर्थंप्रत्यहमशनपानादौश्रीरामनामोच्चारणरूपंव्रतंकरिष्ये ॥ कामनासत्त्वेतत्तदूहः ॥ स्त्रीभिस्तुस्थिरसौभाग्यपुत्रपौत्राभिवृद्धीत्याद्यूहःकार्यः ॥ इदंनूतनव्रते ॥ तदुत्तरंप्रतिवार्षिकंव्रतेतु गृहीतव्रतस्यसंपूर्तियथावत्फलसिद्ध्यर्थंविप्रमुखान्नूतनरामनामग्रहणंगृहीतनामविसर्जनंचकरिष्ये ॥ तदंगत्वेनश्रीरामपूजनंचकरिष्ये ॥ गणेशार्चनादि कृत्वापीठादौप्रतिमायां ध्यायेदाजानुबाहुमितिरामंध्यात्वानाममंत्रेणसंपूज्य रामायरामभद्रायेतिनत्वाप्रार्थयेत् ॥ रामनामव्रतं देवत्वत्प्रसादात्कृतंमया ॥ त्रिलोकेशव्रतस्यास्यदेहिमेऽविकलंफलं ॥ ततोविप्रंप्रार्थयेत् ॥ भोविप्र नूतनरामनामदानेनमामनुगृहाण ॥ सच—त्वंअमुकरामनामग्रहणेनकृतार्थोभवेति तत्तद्वर्षोक्तंनामोपदिश्याचाराल्लड्डुकफलादिद्वयादेकमादायतस्मैदद्यात् ॥ ततोव्रतसंपूर्तयेब्राह्मणंसंपूज्य ॥ श्रीरामप्रतिमांतुभ्यंरामभक्तायधीमते ॥ सोपस्करांददेविप्ररामोमेप्रीयतामिति ॥ पूर्वावशिष्टफलादिसहितांसदक्षिणांरामप्रतिमांतस्मैदत्वाकर्मसमाप्तिः ॥ एवं द्वादशवर्षंकृत्वोद्यापनंकुर्यात् ॥ रामनामानि वसिष्ठरामायणोक्तानियथा ॥ रामःश्रीरामःतुलसीत्रिभुवनः अहल्योद्धरणः पतितपावनः जानकीजीवनः ताटकामर्दनः कौसल्यानंदनः सीतापतिः मारुतिदर्शनः दाशरथिः सीताशोधनः १२ एष्वन्यतमंक्रमेणद्वादशवर्षेषुमासेषुवाग्राह्यं ॥ ॥ छ ॥ ॥ ९५ ॥

॥ ९० ॥ सामान्यतःस्नानविधिः ॥ ॥ नद्यादौगत्वाऽपामार्गकाष्ठमन्यद्वाऽनिषिद्धं (आम्रादि) काष्ठमादाय ॥ आयुर्ब

लंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इतिवनस्पतिंप्रार्थ्य ॥ मुखदुर्गंधनाशायदंतानांचवि शुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं ॥ इतिदंतधावनंकृत्वा तिलामलककल्केनकेशान्संशोध्य मृत्स्नानपूर्वंस्नात्वा (पुरुषकर्तृकोवैदिकःस्नानविधिर्ब्रह्मकर्मसमुच्चयस्थोत्सर्जनप्रयोगेद्रष्टव्यः) ॥ अत्रव्यावहारिकःपौराणउच्यते ॥ आचमना दिदेशकालकीर्तनांते ममात्मनःकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसमस्तपापक्षयद्वारा शरीरशुद्ध्यर्थंअमुकव्रतांगत्वेनापामार्गकाष्ठैर्दंतधावनपूर्वकमष्टोत्तरशतमष्टौवास्नानानिकरिष्येइतिसंकल्प्य ॥ गंगागंगेतियो ब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ स्नात्वाआचम्य ॥ (सुवासिन्या ॥ हरिद्रेपीतवर्णेत्वं हारिणीजनरंजनी ॥ अतस्त्वांलेपयिष्यामिसौभाग्यंदेहिमेऽनघे ॥ इतिहरिद्रांविलिप्यस्नात्वाआचम्य ॥ कुंकुमंकांतिदंदिव्यंका मिनीकामसंभवं ॥ स्नास्येहंकुंकुमेनातःप्रसन्नोभवमेहरे ॥ स्नात्वाआचम्य) ॥ शरीरशुद्ध्यर्थंभस्मगोमयमृत्तिकास्नानानिक रिष्ये ॥ भस्म ॥ सर्वरक्षाकरंभस्मकामाद्यरिविनाशनं ॥ तस्यलेपनमात्रेणसर्वपापैःप्रमुच्यते ॥ स्नात्वाआचम्य ॥ गोमयं ॥ अग्रमग्रचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ स्नात्वा आचम्य ॥ मृत्तिका ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं ॥ त्वयाहतेनपापेनगच्छामिपरमांगतिं ॥ स्नात्वाआचम्य ॥ गंगे चयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु ॥ इतितुलसीदलेनजलमालोड्य (संभवेमहासंकल्पः कार्यः) गंगांप्रार्थयेत् ॥ नंदिनीनलिनीसीतामालतीचमलापहा ॥ विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी ॥ भागीरथीभोग

वतीजाह्नवीत्रिदशेश्वरी ॥ द्वादशैतानिनामानियत्रयत्रजलाशये ॥ स्नानयुक्तःस्मरेन्नित्यंतत्रतत्रवसेद्धिसा ॥ शरीरेजर्जरीभूते व्याधिग्रस्तेकलेवरे ॥ औषधंजाह्नवीतोयंवैद्योनारायणोहरिः ॥ पापोहंपापकर्माहंपापात्मापापसंभवः ॥ त्राहिमांकृपयागंगेसर्वपापहराभव ॥ इतिप्रार्थ्यअर्घ्यादिदद्यात् ॥ एहिसूर्यसहस्रांशोतेजोराशेजगत्पते ॥ अनुकंपयमांभक्त्यागृहाणार्घ्यंनमोस्तुते ॥ सूर्यनारायणायेदमर्घ्यं० ॥ भागीरथिनमस्तुभ्यंसर्वपापप्रणाशिनि ॥ भक्त्यातुभ्यंमयादत्तंगृहाणार्घ्यंनमोस्तुते ॥ गंगायैइदमर्घ्यं० ॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेऽस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते ॥ विष्णवेइदमर्घ्यं० ॥ इत्यर्घ्याणिदत्वा ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ वस्त्रंनिष्पीड्य गंधपुष्पाक्षतहरिद्राकुंकुमादिभिर्गंगांतुलसींसूर्यंचनाम्नापूजयेत् ॥ इतिस्नानविधिः ॥ ॥ छ ॥ ॥ छ ॥

॥ ९१ ॥ हेमाद्रिकृतःस्नान (महा) सङ्कल्पः ॥ ॥ आचम्यप्राणानायम्य ॥ श्रीमन्महागणाधिपतयेनमः श्रीगुरुभ्यो
नमः ॥ श्रीसर० ॥ वेदाय०॥ वेदपुरुषाय०॥ इष्टदेवताभ्यो०॥ कुलदे०॥ स्थानदेवताभ्यो० ॥ ग्रामदेवताभ्यो० ॥ वास्तुदेवता
भ्यो० ॥एतत्कर्मप्रधानदेवताभ्यो०॥ सर्वेभ्योदेवेभ्योनमोनमः॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः॥ अविघ्नमस्तु ॥ सुमुखश्चैकदं० ॥
वक्रतुण्डमहाकायसूर्यकोटिसमप्रभ ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे ॥ यंनत्वा ॥ ९६ ॥
कृतकृत्याःस्युस्तंनमामिगजाननम् ॥ गणनाथंनमस्कृत्यनमस्कृत्यपितामहम् ॥ विष्णुंरुद्रंश्रियंदेवींवंदेभक्त्यासरस्वतीम् ॥
स्थानंक्षेत्रंनमस्कृत्यदिननाथंनिशाकरम् ॥ धरणीगर्भसंभूतंशशिपुत्रंबृहस्पतिम् ॥ दैत्याचार्यंनमस्कृत्यसूर्यपुत्रंशनैश्चरम् ॥

राहुंकेतुंनमस्कृत्ययज्ञारम्भेविशेषतः ॥ शक्रादिदेवताःसर्वान्‌ऋषींश्चैवतपोधनान् ॥ गर्गंमुनिंनमस्कृत्यनारदंपर्वतंतथा ॥ वसिष्ठं मुनिशार्दूलंविश्वामित्रंचगोभिलम् ॥ अगस्त्यंचपुलस्त्यंचदक्षमत्रिंपराशरम् ॥ भरद्वाजंचमांडव्यंयाज्ञवल्क्यंचगालवम् ॥ अन्येविप्रास्तपोयुक्तावेदशास्त्रविचक्षणाः ॥ तान्सर्वान्प्रणिपत्याहंशुभकर्मसमारभे ॥ लाभस्ते० अग्रतःश्रीनृसिंहश्चपृष्ठतोदेवकीसुतः ॥ रक्षतांपार्श्वयोर्देवौभ्रातरौरामलक्ष्मणौ ॥ ॐ स्वस्तिश्रीमुकुंदसच्चिदानंदस्यब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृंभितावियायोगात्‌कालकर्मस्वभावाविर्भूतमहत्तत्त्वोदिताहंकारोद्भूतवियदादिपंचमहाभूतेंद्रियदेवतानिर्मितेऽडकटाहे, चतुर्दशलोकात्मके, लीलयातन्मध्यवर्तिभगवतःश्रीनारायणस्यनाभिकमलोद्भूतसकललोकपितामहस्यब्रह्मणःसृष्टिंकुर्वतस्तदुद्धरणायप्रजापतिप्रार्थितस्यसमस्तजगदुत्पत्तिस्थितिलयकारणस्यजगद्रक्षाशिक्षाविचक्षणस्यप्रणतपारिजातस्यअच्युतानंतवीर्यस्यश्रीमद्भगवतोमहापुरुषस्यअचिंत्यापरिमितशक्त्याध्येयमानस्यमहाजलौघमध्येपरिभ्रममाणानामनेककोटिब्रह्मांडानामेकतमेऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते, अस्मिन्महतिब्रह्मांडखंडे, आधारशक्तिश्रीमदादिवाराहदंष्ट्राग्रविराजिते, कूर्मानंतवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशंखाद्यष्टमहानागैर्ध्रियमाणेऐरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठितानामतलवितलसुतलतलातलरसातलमहातलपाताललोकानामुपरिभागे, भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागेचक्रवालशैलमहावलयनागमध्यवर्तिनोमहाकालमहाफणिराजशेषस्यसहस्रफणानांमणिमंडलमंडिते, दिग्दंतिशुंडोत्तंभिते, अमरावत्यशोकवतीभोगवतीसिद्धवतीगांधर्ववतीकांच्यवंत्यलकावतीयशोवतीतिपुण्यपुरीप्र

तिष्ठितेइंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानेष्टदिक्पालप्रतिष्ठिते, वरध्रुवाध्वरसोमपाप्रभंजनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्वि
राजितेहरत्र्यंबकरुद्रमृगव्याधापराजितकपालीभैरवशंभुकपर्दिवृषाकपिबहुरूपाख्यैकादशरुद्रैःसंशोभिते, रुद्रोपेंद्रसवितृधातृत्वष्ट्
र्यमेंद्रेशानभगमित्रपूषाख्यद्वादशादित्यप्रकाशिते, यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टांगनिरतवसिष्ठवाल ॥ ९१ ॥
खिल्यविश्वामित्रदक्षकात्यायनकौंडिण्यगौतमांगिरसपाराशर्यव्यासवाल्मीकशुकशौनकभरद्वाजसनकसनंदनसनातनसनत्कुमार
नारदादिमुख्यमुनिभिःपवित्रिते, लोकालोकाचलवलयिते, लवणेक्षुरससुरासर्पिर्दधिक्षीरोदकयुक्तसप्तार्णवपरिवृते, जंबूप्लक्षशा
ल्मलिकुशक्रौंचशाकपुष्कराख्यसप्तद्वीपयुते, इंद्रकांस्यताम्रगभस्तिनागसौम्यगंधर्वचारणभारतेतिनवखंडमंडिते, सुवर्णगिरिक
र्णिकोपेतमहासरोरुहाकारपंचाशत्कोटियोजनविस्तीर्णभूमंडले, अयोध्यामथुरामायाकाशीकांच्यवंतिकाद्वारावतीतिसप्तपुरीप्रति
ष्ठिते, महामुक्तिप्रदस्थले, शालग्रामशंभलनंदिग्रामेतिग्रामत्रयविराजिते, चंपकारण्यवदरिकारण्यदंडकारण्यार्बुदारण्यधर्मारण्य
पद्मारण्यगुह्यारण्यजंबुकारण्यविंध्यारण्यद्राक्षारण्यनहुषारण्यकाम्यकारण्यद्वैतारण्यनैमिषारण्यादीनांमध्येसुमेरुनिषधकूटशुभ्रकू
टश्रीकूटहेमकूटरजतकूटचित्रकूटत्रिकूटकिष्किंधश्वेताद्रिकूटहिमविंध्याचलानांहरिवर्षकिंपुरुषवर्षयोश्चदक्षिणे, नवसहस्रयोजन
विस्तीर्णे, भरतखंडेमलयाचलसह्याचलविंध्याचलानामुत्तरेणस्वर्णप्रस्थचंडप्रस्थसूक्तिकआवंतकरमणकमहारमणकपांचजन्यसिंह ॥ ९७ ॥
ललंकाऽशोकवत्यलकावतीसिद्धवतीगांधर्ववत्यादिपुण्यपुरीविराजिते नवखंडोपद्वीपमंडिते, दक्षिणावस्थितरेणुकाद्वयसूकरकाशी
कांचीकालिकालवटेश्वरकालंजरमहाकालेतिनवोषरयुते, द्वादशज्योतिर्लिंगगंगा (भागीरथी) गोदा (गौतमी) क्षिप्रायमुनासरस्व

तीनर्मदातापीपयोष्णीचंद्रभागाकावेरीमंदाकिनीप्रवराकृष्णावेण्याभीमरथीतुंगभद्रामलापहाकृतमालाताम्रपर्णीविशालाक्षीवंजुला
चर्मण्वतीवेत्रवतीभोगावतीविशोकाकौशिकीगंडकीवासिष्ठीप्रमदाविश्वामित्रीफल्गुनीचित्रकाश्यपीसरयूसर्वपापहारिणीकरतोया
प्रणीतावज्रावक्रगामिनीसुवर्णरेखाशोणाभवनाशिनीशीघ्रगाकुशावर्तिनीब्रह्मानंदामहितनयेत्यनेकपुण्यनदीभिर्विलसिते, ब्रह्मपु
त्रसिंधुनदादिपरमपवित्रजलविराजिते; हिमवन्मेरुगोवर्धनक्रौंचचित्रकूटहेमकूटमहेंद्रमलयसह्येंद्रकीलपारियात्राद्यनेकपर्वतसमन्वि
ते, मतंगमाल्यकिष्किंधऋष्यशृंगेतिमहानगसमन्विते, अंगवंगकलिंगकाश्मीरकांबोजसौवीरसौराष्ट्रमहाराष्ट्रमगधनेपालकेरलचो
रलपांचालगौडमालवमलयसिंहलद्रविडकर्नाटकललाटकरहाटवरहाटपानाटपांड्यनिषधमागधांध्रदशार्णभोजकुरुगांधारविदर्भवि
देहवाह्लीकबर्बरकैकेयकोसलविराटशूरसेनकोंकणकैकटमत्स्यमद्रपारसिकखर्जूरयावनम्लेच्छजालंधरेतिसिद्धवत्यन्यदेशविशेषभा
षाभूमिपालविचित्रिते, इलावृतकुरुभद्राश्वकेतुमालकिंपुरुषरमणकहिरण्मयादिनववर्षाणांमध्ये, भरतखंडे, बकुलचंपकपाटलाब्जपु
न्नागजातिकरवीररसालकह्लारकेतक्यादिनानाविधकुसुमस्तबकविराजिते, कोकंतहिरण्यशृंगकुब्जार्बुदमणिकर्णीवटशालग्रामसूकर
मथुरागयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्यविलसिते, जंबुद्वीपेकुरुक्षेत्रादिसमभूमध्यरेखायाःपश्चिमदिग्भा
गे, कुलमेरोर्दक्षिणदिग्भागेविंध्यस्यदक्षिणेदेशेश्रीशैलस्यवायव्यदेशे, कृष्णावेण्योर्मध्यदेशे, मत्स्यकूर्मवराहनृसिंहवामनपरशुराम
रामकृष्णबुद्धकल्किरितिदशावताराणांमध्येबौद्धावतारे गंगादिसरिद्भिःपाविते, एवंनवसहस्रयोजनविस्तीर्णभारतवर्षे, निखिलज
नपावनपरमभागवतोत्तमशौनकादिनिवासितेनैमिषारण्ये, आर्यावर्तांतर्गतब्रह्मावर्तैकदेशेसूर्यान्वयभूभृत्प्रतिष्ठिते, श्रीमन्नारायण

नाभिकमलोद्भूतसकलजगत्स्रष्टुःपरार्धद्वयजीविनोब्रह्मणोद्वितीयेपरार्धेएकपंचाशत्तमेवर्षे, प्रथममासेप्रथमपक्षे, प्रथमदिवसेअह्नो द्वितीयेयामे, तृतीयेमुहूर्ते, रथंतरादिद्वात्रिंशत्कल्पानांमध्येअष्टमेश्वेतवाराहकल्पे, स्वायंभुवादिमन्वंतराणांमध्येसप्तमेवैवस्वतमन्वंतरेकृतत्रेताद्वापारकलिसंज्ञकानांचतुर्णांयुगानांमध्येवर्तमानेअष्टाविंशतितमेकलियुगे, तत्प्रथमेविभागे, (पादे) श्रीमन्नृपविक्रमार्कात्श्रीमन्नृपशालीवाहनाद्वायथासंख्यागमेनचांद्रसावनसौरनाक्षत्रादिप्रकारेणागतानांप्रभवादिषष्टिसंवत्सराणांमध्येअमुकनाम्नि संवत्सरे, उत्तरगोलावलंबिनिश्रीमार्तंडमंडले, अमुकर्तौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे, अमुककरणे, अमुकराशिस्थेचंद्रे, अमुकस्थेसूर्ये, अमुकस्थितेदेवगुरौ, शेषेषुग्रहेषुयथायथास्थानस्थितेषुसत्सु, एवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौ, अमुकशर्मणः (भार्ययासहाधिकृतस्य) ममइहजन्मनिजन्मांतरेवाबाल्ययौवनवार्धक्यावस्थासुवाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिचरितज्ञाताज्ञातकामाकाममहापातकोपपातकादिसंचितानांपापानां, ब्रह्महननसुरापानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानांबुद्धिपूर्वकाणांमनोवाक्कायकृतानांबहुकालाभ्यस्तानांउपपातकानांच, स्पृष्टास्पृष्टसंकलीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणविहिताकरणकर्मलोपजनितानां, रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयअजादिपशुविक्रयस्वगृहविक्रयनीलीविक्रयअक्रेयविक्रयपण्यविक्रयजलचरादिजंतुविक्रयस्थलचरादिविक्रयखेचरादिविक्रयसंभूतानां, निरर्थकवृक्षच्छेदनऋणानपाकरणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणपरद्रव्यापहरणतैलादिद्रव्यापहरणफलाहरणलोहादिहरणनानावस्तुहरणरूपाणां, ब्राह्मणनिंदागुरुनिंदावेदनिंदाशास्त्रनिंदा

परनिंदाभक्ष्यभक्षणाभोज्यभोजनाचोष्यचोषणालेह्यलेहनापेयापेयास्पृश्यस्पर्शनाश्राव्यश्रवणाहिंस्याहिंसनावंद्यवंदनाचिंत्यचिंतना याज्ययाजनापूज्यपूजनरूपाणां, मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनविधवागमनवेश्यागमनदासीगमनचांडालादि हीनजातिगमनगुदगमनरजस्वलागमनपश्वादिगमनरूपाणां, कूटसाक्षित्वपैशून्यवादमिथ्यापवादम्लेच्छसंभाषणब्रह्मद्वेषकरणब्रह्म वृत्तिहरणवृत्तिच्छेदनपरवृत्तिहरणरूपाणां, मित्रवंचनगुरुवंचनस्वामिवंचनासत्यभाषणगर्भपातनपथितांबूलचर्वणहीनजातिसेव नपरान्नभोजनगणान्नभोजनलशुनपलांडुगृंजनभक्षणतालवृक्षफलभक्षणोच्छिष्टभक्षणमार्जारोच्छिष्टभक्षणपर्युषितान्नभक्षणरूपाणां पंक्तिभेदकरणभ्रूणहिंसापशुहिंसाबालहिंसाद्यनेकहिंसोद्भूतानां, शौचत्यागस्नानत्यागसंध्यात्यागोपासनाग्नित्यागवैश्वदेवत्यागरूपा णा, निषिद्धाचरणकुग्रामवासब्रह्मद्रोहगुरुद्रोहपितृमातृद्रोहपरद्रोहपरनिंदात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां, गोयानवृषभया नमहिषीयानगर्दभयानोष्ट्रयानाजयानभृत्याभरणस्वग्रामत्यागगोत्रत्यागकुलत्यागदूरस्थमंत्रणविप्राशाभेदनावंदिताशीर्वादग्रहणप तितसंभाषणरूपाणां, पतितजनपंक्तिभोजनाहःसंगमवृथामनोरथादिपापानांतथा—"महापापोपपापाभ्यांनानायोनिषुयत्कृतम् ॥ बालभावेनयत्पापंक्षुत्तृडर्थेचयत्कृतम् ॥ आत्मार्थेचैवयत्पापंपरार्थेचैवयत्कृतम् ॥ तीर्थेषुचैवयत्पापंगुर्वज्ञाकृतंचयत् ॥ रागद्वेषादि जनितंकामक्रोधेनयत्कृतम् ॥ हिंसानिद्रादिजंपापंभेदद्दष्ट्याचयन्मया ॥ देहाभिमानजंपापंसर्वदायन्मयाकृतम् ॥ भूतंभव्यंचय त्पापंभविष्यंचैवगौतमि ॥ शुष्कमार्द्रंचयत्पापंजानताजानताकृतम् ॥ महल्लघुचयत्पापंतन्मेनाशयजाह्नवि ॥ ब्रह्महामद्यपःस्तेयी तथैवगुरुतल्पगः ॥ महापापानिचत्वारितत्संसर्गीतुपंचमः ॥ अतिपातकमन्यच्चतन्न्यूनमुपपातकम् ॥ गोवधोव्रात्यतास्तेयंऋणानां

चानपक्रियाः ॥ अनाहिताग्नितापण्यविक्रयःपरिवेदनम् ॥ इंधनार्थेद्रुमच्छेदःस्त्रीहिंसौषधिजीवनम् ॥ हिंसायात्राविधानंचभृतकाध्यापनंतथा ॥ प्रथमाश्रममारभ्ययत्किंचित्किल्बिषंकृतम् ॥ कृमिकीटादिहननंयत्किंचित्प्राणिहिंसनम् ॥ मातापित्रोरशुश्रूषातद्वाक्याकरणंतथा ॥ अपूज्यपूजनंचैवपूज्यानांचव्यतिक्रमः ॥ अनाश्रमस्थताग्न्यादिदेवाशुश्रूषणंतथा ॥ परकार्यापहरणंपरद्रव्योपजीवनम् ॥ ततोऽज्ञानकृतंवापिकायिकंवाचिकंतथा ॥ मानसंत्रिविधंपापंप्रायश्चित्तैरनाशितम् ॥ तस्मादशेषपापेभ्यस्त्राहित्रैलोक्यपावनि ॥ निष्पापोऽस्म्यधुनादेविप्रसादात्तवनान्यथा ॥ स्त्रीणांविशेषः—पाणिग्रहणमारभ्यस्वकर्मापरिपालनम् ॥ इंद्रियाभिरतिःपुंसुनानायोनिषुयाभवेत् ॥ कृमिकीटादिहननंपंक्तिभेदादिकंतथा ॥ स्पृष्टास्पृष्टमनाचारंमनसादोषकल्पनम् ॥ तत्सर्वंनाशयक्षिप्रंगंगेत्वंयात्रयानया ॥" इत्यादिप्रकीर्णपातकानांएतत्कालपर्यंतंसंचितानांलघुस्थूलसूक्ष्माणांचनिःशेषपरिहारार्थंदशावरान् दशापरान् आत्मनासहितान्एकविंशतिपुरुषानुद्धर्तुंब्रह्मलोकावधिपंचाशत्कोटियोजनविस्तीर्णेऽस्मिन्भूमंडलेसप्तर्षिमंडलपर्यंतंवालुकाभिःकृतराशेःवर्षसहस्रावसानेएकैकवालुकापकर्षक्रमेणसर्वराश्यपकर्षसंमितकालपर्यंतंब्रह्मलोकेब्रह्मसायुज्यताप्राप्त्यर्थंतथाममसमस्तपितॄणांआत्मनश्चविष्ण्वादिलोकप्राप्तये, अधीतानामध्येष्यमाणानांचाध्यायानांस्थापनविच्छेदक्रोशघोषणदंतविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां, पूर्वसवर्णानांगलोपलंबितविवृतोच्चारितवर्णानाम्, श्लिष्टास्पष्टवर्णविघट्टनादिभिःपठितानांश्रुतीनांयद्यातयामत्वंतत्परिहारार्थं, अष्टत्रिंशदनध्यायाध्ययने, रथ्यासंचरतःशूद्रस्यश्रृण्वतोऽध्ययने, म्लेच्छांत्यजादेःश्रृण्वतोऽध्ययने, अशुचिदेशेऽध्ययने, आत्मनोशुचित्वेऽध्ययने, अक्षरस्वरानुस्वारपदच्छेदकंडिकाव्यंजनह्रस्वदीर्घप्लुतकंठतालुमूर्धन्योष्ठ्यदंत्यनासिका

नुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितादीनांव्यत्ययेनोच्चारे, माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं, सर्वस्यवेदस्यसवीर्यत्वसंपादनद्वारायथावत्फलप्राप्त्यर्थं, श्रीपरमेश्वरप्रीत्यर्थंदेवब्राह्मणसवितृसूर्यनारायणसंनिधौगंगाभागीरथ्याममुकतीर्थेवाप्रवाहाभिमुखंस्नानमहंकरिष्ये ॥ इतिहेमाद्रिगतोमहासंकल्पः ॥

॥ ९२ ॥ शीतलाष्टकं ॥ ॥ आचमनादिदेशकालनिर्देशांतेऽमुकगोत्रस्यामुकशर्मणःशरीरेउत्पन्नोत्पत्स्यमानविस्फोटकजनितदाहादिसर्वोपद्रवस्यजीवच्छरीराविरोधेनपरिहारार्थंशीतलाष्टकस्यनवावृत्तिजपंकं० ॥ आसनादि० ॥ अस्यश्रीशीतलाष्टकस्तोत्रमंत्रस्यश्रीरुद्रऋषिःश्रीशीतलादेवताअनुष्टुप्छंदःलक्ष्मीर्बीजंभवानीशक्तिःविस्फोटकपीडापरिहारार्थेजपेविनियोगः ॥ रुद्रर्षयेनमःशिरसि अनुष्टुप्छंदसेनमोमुखे शीतलांबादेवतायैहृदये ॐ ह्रींनमःशीतलेदेविस्फोटकान्नाशयनाशयतंतूञ्छेदय २ दाहंशमय २ ॐ ऐंह्रींश्रींशीतलादेव्यैस्वाहा ह्रींनमःशीतलेअंगुष्ठाभ्यांनमःएवंतर्जन्यादिषडंगंविधायध्यात्वामूलमंत्रमष्टवारंजप्त्वाध्यायेत् ॥ भूतेशंभूतसैन्यैःपरिवृतमनिशंकृष्णवेतालपीठेहाहाहीहीतिवादैरशनिभरसहैरट्टहासैरुपेतं ॥ हस्तैःसाहस्रसंख्यैरनलगणसखैःसाध्यदेहाधिरूढान्स्फोटान्दंदह्यमानंमुहुरहमनिशंघंटकर्णंनमामि ॥ १ ॥ घंटकर्णमहाप्राज्ञसर्वोपद्रवनाशन ॥ मसूरिकाभयंप्राप्यरक्षरक्षमहाबल ॥ २ ॥ अथशीतलाध्यानं ॥ सजलांबुदवच्छ्यामांरक्तमाल्यानुलेपनां ॥ तुंगस्तनांविशालाक्षींनानालंकारभूषितां ॥ लसन्नितंबबिंबाढ्यांखरारूढांसुशोभनां ॥ हस्ताभ्यांमार्जनींशूर्पंदधानांनग्निकांस्मरेत् ॥ मार्जन्यामार्जयन्स्फोटान्रोगानन्यांश्चदारुणान् ॥ शूर्पेकृत्वांभसिक्षारेप्रक्षिपंतींमुहुर्मुहुः ॥ इति ॥ स्कंदउवाच ॥ नमस्तेदेवदेवेशशीतलायाःस्तवंशुभं ॥ वक्तुमर्हस्यशेषेणविस्फोट

कभयापहं ॥ १ ॥ ईश्वरउवाच ॥ नमामिशीतलांदेवींरासभस्थांदिगंबरां ॥ मार्जनीकलशोपेतांशूर्पालंकृतमस्तकां ॥ २ ॥ वंदे हंशीतलांदेवींसर्वरोगभयापहां ॥ यामासाद्यनिवर्तेतविस्फोटकभयंमहत् ॥ ३ ॥ शीतलेशीतलेचेतियोब्रूयाद्दाहपीडितः ॥ विस्फो टकभवोदाहःक्षिप्रंतस्यविनश्यति ॥ ४ ॥ यस्त्वामुदकमध्येतुध्यात्वासंपूजयेन्नरः ॥ विस्फोटकभयंघोरंगृहेतस्यनजायते ॥ ५ ॥ शीतलेज्वरदग्धस्यपूतिगंधहतस्यच ॥ प्रनष्टचक्षुषांपुंसांत्वामाहुर्जीवनौषधं ॥ ६ ॥ शीतलेतनुजान्रोगान्नृणांहरसिदुस्त्यजान् ॥ विस्फोटकविशीर्णानांत्वमेकामृतवर्षिणी ॥ ७ ॥ गलगंडग्रहारोगायेचान्येदारुणानृणां ॥ तेतवस्मरणादेवशीतलेयांतिसंक्षयं ॥ ८ ॥ नमंत्रोनौषधंकिंचित्पापरोगस्यविद्यते ॥ त्वमेकाशीतलेत्रात्रीनान्यांपश्यामिदेवतां ॥ ९ ॥ मृणालतंतुसदृशींनाभिहृन्म ध्यसंस्थितां ॥ यस्त्वांविचिंतयेद्देवींतस्यमृत्युर्नजायते ॥ १० ॥ इतिशीतलाष्टकं ॥ अष्टकंशीतलादेव्यायःपठेन्मानवःसदा ॥ विस्फोटकभयंघोरंकुलेतस्यनजायते ॥ श्रोतव्यंपठितव्यंचश्रद्धाभक्तिसमन्वितैः ॥ उपसर्गविनाशायपरंस्वस्त्ययनंमहत् ॥ शीत लाष्टकमेवेदंनदेयंयस्यकस्यचित् ॥ दातव्यंचसदातस्मैश्रद्धाभक्तियुतस्यच ॥ रासभोगर्दभश्चैवखरोवैशाखनंदनः ॥ शीतलावाह नश्चैवदूर्वाकंदनकंदनः ॥ एतानिखरनामानिशीतलाग्रेतुयःपठेत् ॥ तस्यदेहेचगेहेचशीतलानैवबाधते ॥ शीतलाष्टकमेवेदंनदेयं यस्यकस्यचित् ॥ दातव्यंचसदातस्मैश्रद्धाभक्तियुतायवै ॥ इतिश्रीस्कंदपुराणेशीतलाष्टकंसंपूर्णम् ॥ इतिपूजासमुच्चयःसंपूर्णः ॥

॥ गणेशाद्यष्टोत्तरशत-सहस्रनामावलिसमुच्चयः ॥

॥ ९३ ॥ गणेशाष्टोत्तरशतनामावलिः ॥ ॥ ॐकारःसर्वत्रादौनाम्नामंतेचनमःशब्दःप्रयोज्यः ॥ ॐ विघ्नेशायनमः

विश्ववरदाय० विश्वचक्षुषे० जगत्प्रभवे० हिरण्यरूपाय० सर्वात्मने० ज्ञानरूपाय० जगन्मयाय० ऊर्ध्वरेतसे० महाबाहवे० अमेयाय० अमितविक्रमाय० वेदवेद्याय० महाकालाय० विद्यानिधये० अनामयाय० सर्वज्ञाय० सर्वगाय० शांताय० गजास्याय० चित्तेश्वराय० विगतज्वराय० विश्वमूर्तये० अमेयात्मने० विश्वाधाराय० २५ सनातनाय० सामगाय० प्रियाय० मंत्रिणे० सत्वाधाराय० सुराधीशाय० समस्तसाक्षिणे० निर्द्वंद्वाय० निर्लोकाय० अमोघविक्रमाय० निर्मलाय० पुण्याय० कामदाय० कांतिदाय० कामरूपिणे० कामपोषिणे० कमलाक्षाय० गजाननाय० सुमुखाय० शर्मदाय० मूषकाधिपवाहनाय० शुद्धाय० दीर्घतुंडाय० श्रीपतये० अनंताय० ५० मोहवर्जिताय० वक्रतुंडाय० शूर्पकर्णाय० परमाय० योगीशाय० योगधाम्ने० उमासुताय० आपद्धंत्रे० एकदंताय० महाग्रीवाय० शरण्याय० सिद्धसेनाय० सिद्धवेदाय० करुणाय० सिद्धाय० भगवते० अव्यग्राय० विकटाय० कपिलाय० ढुंढिराजाय० उग्राय० भीमोदराय० शुभाय० गणाध्यक्षाय० गणेशाय० ७५ गणाराध्याय० गणनायकाय० ज्योतिःस्वरूपाय० भूतात्मने० धूम्रकेतवे० अनुकूलाय० कुमारगुरवे० आनंदाय० हेरंबाय० वेदस्तुताय० नागयज्ञोपवीतिने० दुर्धर्षाय० बालदूर्वांकुरप्रियाय० भालचंद्राय० विश्वधात्रे० शिवपुत्राय० विनायकाय० लीलासेविताय० पूर्णाय० परमसुंदराय० विघ्नांधकाराय० सिंदूरवदनाय० नित्याय० विभवे० प्रथमपूजिताय० १०० दिव्यपादाब्जाय० भक्तमंदराय० शूरमहाय० रत्नसिंहासनाय० मणिकुंडलमंडिताय० भक्तकल्याणाय० अमेयाय० कल्याणगुरवे० सहस्रशीर्ष्णे० महागणपतयेनमः ॥ ११० ॥ इतिगणेशाष्टोत्तरशतनामावलिः ॥ ॥ ७ ॥

॥ ९४ ॥ गणेशसहस्रनामावलिः ॥ ॥ ॐकारःसर्वत्रादावंतेचनमःशब्दःप्रयोज्यः ॥ ॐ गणेश्वरायनमः गणाध्यक्षाय० गणाराध्याय० गणप्रियाय० गणनाथाय० गणस्वामिने० गणेशाय० गणनायकाय० गणमूर्तये० गणपतये० गणत्रात्रे० गणंजयाय० गणपाय० गणक्रीडाय० गणदेवाय० गणाधिपाय० गणज्येष्ठाय० गणश्रेष्ठाय० गणप्रेष्ठाय० गणाधिराजाय० गणराजे० गणगोप्त्रे० गणांगाय० गणदैवताय० गणबंधवे० २५ गणसुहृदे० गणाधीशाय० गणप्रथाय० गणप्रियसखाय० गणप्रियसुहृदे० गणप्रियरतोनित्याय० गणप्रीतिविवर्धनाय० गणमंडलमध्यस्थाय० गणकेंलिपरायणाय० गणाग्रण्ये० गणेशाय० गणगीताय० गणोच्छ्रयाय० गण्याय० गणहिताय० गर्जद्गणसेनाय० गणोद्यताय० गणप्रीतिप्रमथनाय० गणभीत्यपहारकाय० गणनार्हाय० गणप्रौढाय० गणभर्त्रे० गणप्रभवे० गणसेनाय० गणचराय० ५० गणप्राज्ञाय० गणैकराजे० गणाग्र्याय० गण्यनाम्ने० गणपालनतत्पराय० गणजिते० गणगर्भस्थाय० गणप्रवणमानसाय० गणगर्वपरिहर्त्रे० गणाय० गणनमस्कृताय० गणार्चितांघ्रियुगुलाय० गणरक्षणकृते० गणध्याताय० गणगुरवे० गणप्रणयतत्पराय० गणागणपरित्रात्रे० गणादिहरणोद्धुराय० गणसेतवे० गणनताय० गणकेतवे० गणाग्रगाय० गणहेतवे० गणग्राहिणे० गणानुग्रहकारकाय० ७५ गणागणानुग्रहभुवे० गणागणवरप्रदाय० गणस्तुताय० गणप्राणाय० गणसर्वस्वदायकाय० गणवल्लभमूर्तये० गणभूतये० गणेष्टदाय० गणसौख्यप्रदाय० गणदुःखप्रणाशनाय० गणप्रथितनाम्ने० गणाभीष्टकराय० गणमान्याय० गणख्याताय० गणवीताय० गणोत्कटाय० गणपालाय० गणवराय० गणगौरवदायकाय० गणगर्जितसंतुष्टाय० गणस्वच्छंदगाय० गणराजाय० गणश्री

दाय० गणभीतिहराय० गणमूर्धाभिषिक्ताय० १०० गणसैन्यपुरःसराय० गुणातीताय० गुणमयाय० गुणत्रयविभागकृते० गुणिने० गुणाकृतिधराय० गुणशालिने० गुणप्रियाय० गुणपूर्णाय० गुणांभोधये० गुणभाजे० गुणदूरगाय० गुणागुणवपुषे० गुणशरीराय० गुणमंडिताय० गुणस्रष्ट्रे० गुणेशाय० गुणेशानाय० गुणेश्वराय० गुणसृष्टजगत्संघाय० गुणसंघाय० गुणैकराजे० गुणप्रविष्टाय० गुणभुवे० गुणीकृतचराचराय० १२५ गुणप्रवणसंतुष्टाय० गुणहीनपराङ्मुखाय० गुणैकभुवे० गुणश्रेष्ठाय० गुणज्येष्ठाय० गुणप्रभवे० गुणज्ञाय० गुणसंपूज्याय० गुणिप्रणतपादाब्जाय० गुणिगीताय० गुणोज्ज्वलाय० गुणवते० गुणसंपन्नाय० गुणानंदितमानसाय० गुणसंचारचतुराय० गुणसंचयसुंदराय० गुणगौराय० गुणाधाराय० गुणसंवृतचेतनाय० गुणकृते० गुणभृते० गुण्याय० गुणाग्र्याय० गुणपारदृशे० गुणप्रचारिणे० १५० गुणयुजे० गुणागुणविवेककृते० गुणाकराय० गुणकराय० गुणप्रवणवर्धनाय० गुणगूढचराय० गौणसर्वसंसारचेष्टिताय० गुणदक्षिणसौहार्दाय० गुणदक्षिणतत्त्वविदे० गुणहारिणे० गुणकलाय० गुणसंघसखाय० गुणसंस्कृतसंसाराय० गुणतत्त्वविवेकाय० गुणगर्भधराय० गौणसुखदुःखोदयाय० गुणाय० गुणाधीशाय० गुणालयाय० गुणवीक्षणलालसाय० गुणगौरवदात्रे० गुणदात्रे० गुणप्रभवे० गुणकृते० गुणसंबोधाय० १७५ गुणभुजे० गुणबंधनाय० गुणहृद्याय० गुणस्थायिने० गुणदायिने० गुणोत्कटाय० गुणचक्रचराय० गौणावताराय० गुणबांधवाय० गुणबंधवे० गुणप्रज्ञाय० गुणप्राज्ञाय० गुणालयाय० गुणधात्रे० गुणप्राणाय० गुणगोपाय० गुणाश्रयाय० गुणयायिने० गुणधायिने० गुणपाय० गुणपालकाय० गुणाहृततनवे० गौणाय० गीर्वाणाय० गुण

गौरवाय० २०० गुणवत्पूजितपदाय० गुणवत्प्रीतिदाय० गुणवते० गीतकीर्तये० गुणवद्बद्धसौहृदाय० गुणवद्वरदाय० गुणवत्प्रतिपालकाय० गुणवद्गुणसंतुष्टाय० गुणवद्रचितद्रवाय० गुणवद्रक्षणपराय० गुणवत्प्रणयप्रियाय० गुणवच्चक्रसंचाराय० गुणवत्कीर्तिवर्धनाय० गुणवद्गुणचित्तस्थाय० गुणवद्गुणरक्षणाय० गुणवत्पोषणकराय० गुणवच्छत्रुसूदनाय० गुणवत्सिद्धिदात्रे० गुणवद्गौरवप्रदाय० गुणवत्प्रवणस्वांताय० गुणवद्गुणभूषणाय० गुणवत्कुलविद्वेषिविनाशकरणक्षमाय० गुणस्तुतगुणाय० गर्जत्प्रलयांबुदनिस्वनाय० गजाय० २२५ गजाननाय० गजपतये० गर्जन्नागयुद्धविशारदाय० गजकर्णाय० गजराजाय० गजाननाय० गजरूपधराय० गर्जते० गजयूथोद्धुरध्वनये० गजाधीशाय० गजाधाराय० गजासुरजयोद्धुराय० गजदंताय० गजवराय० गजकुंभाय० गजध्वनये० गजमायाय० गजमयाय० गजश्रिये० गजगर्जिताय० गजामयहराय० गजपुष्टिप्रदायकाय० गजोत्पत्तये० गजत्रात्रे० गजहेतवे० गजाधिपाय० गजमुख्याय० गजकुलप्रवराय० गजदैत्यघ्ने० गजकेतवे० गजाध्यक्षाय० गजसेतवे० गजाकृतये० गजवंद्याय० गजप्राणाय० गजसेव्याय० २५० गजप्रभवे० गजमताय० गजेशानाय० गजेशाय० गजपुंगवाय० गजदंतधराय० गर्जन्मधुपाय० गजवेषभृते० गजच्छद्मने० गजाग्रस्थाय० गजयायिने० गजाजयाय० गजराजे० गजयूथस्थाय० २७५ गजगंजकभंजकाय० गर्जितोज्झितदैत्यासवे० गर्जितत्रातविष्टपाय० गानज्ञाय० गानकुशलाय० गानतत्त्वविवेकवते० गानश्लाघिने० गानरसाय० गानज्ञानपरायणाय० गानागमज्ञाय० गानांगाय० गानप्रवणचेतनाय० गानध्येयाय० गानगम्याय० गानध्यानपरायणाय० गानभुवे० गानकृते० गानचतुराय० गानविद्याविशा

रदाय० गानशीलाय० गानशालिने० गतश्रमाय० गानविज्ञानसंपन्नाय० गानश्रवणलालसाय० गानायत्ताय० ३०० गानमयाय० गानप्रणयवते० गानध्यात्रे० गानबुद्धये० गानोत्सुकमनसे० गानोत्सुकाय० गानभूमये० गानसीम्ने० गुणोज्ज्वलाय० गानांगज्ञानवते० गानमानवते० गानपेशलाय० गानवत्सलणयाय० गानसमुद्राय० गानभूषणाय० गानसिंधवे० गानपराय० गानप्राणाय० गणाश्रयाय० गानैकभुवे० गानहृष्टाय० गानचक्षुषे० गणैकदृशे० गानमत्ताय० गानरुचये० ३२५ गानविदे० गानवित्प्रियाय० गानांतरात्मने० गानाढ्याय० गानभ्राजत्स्वभाववते० गानमायाय० गानधराय० गानविद्याविशोधकाय० गानाहितघ्नाय० गानेंद्राय० गानलीनाय० गतिप्रियाय० गानाधीशाय० गानलयाय० गानाधाराय० गतीश्वराय० गानवन्मानदाय० गानभूतये० गानैकभूतिमते० गानताननताय० गानतानमानविमोहिताय० गुरवे० गुरूदरश्रेणये० गुरुतत्त्वार्थदर्शनाय० गुरुस्तुताय० ३५० गुरुगुणाय० गुरुमायाय० गुरुप्रियाय० गुरुकीर्तये० गुरुभुजाय० गुरुवक्षसे० गुरुप्रभाय० गुरुलक्षणसंपन्नाय० गुरुद्रोहपराङ्मुखाय० गुरुविद्याय० गुरुप्राणाय० गुरुबाहुबलोच्छ्रयाय० गुरुदैत्यप्राणहराय० गुरुदैत्यापहारकाय० गुरुगर्वहराय० गुह्यप्रवराय० गुरुदर्पघ्ने० गुरुगौरवदायिने० गुरुभीत्यपहारकाय० गुरुशुंडाय० गुरुस्कंधाय० गुरुजंघाय० गुरुप्रथाय० गुरुभालाय० गुरुगलाय० ३७५ गुरुश्रिये० गुरुगर्वनुदे० गुरवे० गुरुपीनांसाय० गुरुप्रणयलालसाय० गुरुमुख्याय० गुरुकुलस्थायिने० गुणगुरवे० गुरुसंशयभेत्त्रे० गुरुमानप्रदायकाय० गुरुधर्मसदाराध्याय० गुरुधर्मनिकेतनाय० गुरुदैत्यगलच्छेत्रे० गुरुसैन्याय० गुरुद्युतये० गुरुधर्माग्रगण्याय० गुरुधर्मधुरंधराय० गरि

ष्ठाय० गुरुसंतापशमनाय० गुरुपूजिताय० गुरुधर्मधराय० गौरधर्माधाराय० गदापहाय० गुरुशास्त्रविचारज्ञाय० गुरुशास्त्रकृतोद्यमाय० ४०० गुरुशास्त्रार्थनिलयाय० गुरुशास्त्रालयाय० गुरुमंत्राय० गुरुश्रेष्ठाय० गुरुमंत्रफलप्रदाय० गुरुस्त्रीगमनेदोषप्रायश्चित्तनिवारकाय० गुरुसंसारसुखदाय० गुरुसंसारदुःखभिदे० गुरुश्लाघापराय० गौरभानुखंडावतंसभृते० गुरुप्रसन्नमूर्तये० गुरुशापविमोचकाय० गुरुकांतये० गुरुमहते० गुरुशासनपालकाय० गुरुतंत्राय० गुरुप्रज्ञाय० गुरुभाय० गुरुदैवताय० गुरुविक्रमसंचाराय० गुरुदृशे० गुरुविक्रमाय० गुरुक्रमाय० गुरुप्रेष्ठाय० गुरुपाखंडखंडकाय० ४२५ गुरुगर्जितसंपूर्णब्रह्मांडाय० गुरुगर्जिताय० गुरुपुत्रप्रियसखाय० गुरुपुत्रभयापहाय० गुरुपुत्रपरित्रात्रे० गुरुपुत्रवरप्रदाय० गुरुपुत्रार्तिशमनाय० गुरुपुत्राधिनाशनाय० गुरुपुत्रप्राणदाय० गुरुभक्तिपरायणाय० गुरुविज्ञानविभवाय० गौरभानुवरप्रदाय० गौरभानुसुताय० गौरभानुत्रासापहारकाय० गौरभानुप्रियाय० गौरभानवे० गौरववर्धनाय० गौरभानुपरित्रात्रे० गौरभानुसखाय० गौरभानुप्रभवे० गौरभानुमत्प्राणनाशनाय० गौरीतेजःसमुत्पन्नाय० गौरीहृदयनंदनाय० गौरीस्तनंधयाय० गौरीमनोवांछितसिद्धिकृते० ४५० गौराय० गौरगुणाय० गौरप्रकाशाय० गौरभैरवाय० गौरीशनंदनाय० गौरीप्रियपुत्राय० गदाधराय० गौरीवरप्रदाय० गौरीप्रणयाय० गौरवच्छवये० गौरीगणेश्वराय० गौरीप्रवणाय० गौरभावनाय० गौरात्मने० ॥१०३॥
गौरकीर्तये० गौरभावाय० गरिष्ठदृशे० गौतमाय० गौतमीनाथाय० गौतमीप्राणवल्लभाय० गौतमाभीष्टवरदाय० गौतमाभयदायकाय० गौतमप्रणवप्रह्वाय० गौतमाश्रमदुःखघ्ने० गौतमीतीरसंचारिणे० ४७५ गौतमीतीर्थदायकाय० गौतमापत्परि

हराय० गौतमाधिविनाशनाय० गोपतये० गोधनाय० गोपाय० गोपालप्रियदर्शनाय० गोपालाय० गोगणाधीशाय० गोक
श्मलनिवर्तयाय० गोसहस्राय० गोपवराय० गोपगोपीसुखावहाय० गोवर्धनाय० गोपगोपाय० गोप्त्रे० गोकुलवर्धनाय०
गोचराय० गोचराध्यक्षाय० गोचरप्रीतिवृद्धिकृते० गोमिने० गोकष्टसंत्रात्रे० गोसंतापनिवर्तकाय० गोष्ठाय० गोष्ठाश्रयाय०
५०० गोष्ठपतये० गोधनवर्धनाय० गोष्ठप्रियाय० गोष्ठामयाय० गोष्ठमयनिवर्तकाय० गोलोकाय० गोलकाय० गोभृते०
गोभर्त्रे० गोसुखावहाय० गोदुहे० गोधुग्गणप्रेष्ठाय० गोदोग्ध्रे० गोपयःप्रियाय० गोत्राय० गोत्रपतये० गोत्रप्रभवे० गोत्रभ
यापहाय० गोत्रवृद्धिकराय० गोत्रप्रियाय० गोत्रार्तिनाशनाय० गोत्रोद्धारपराय० गोत्रप्रभवाय० गोत्रदेवतायै० गोत्रवि
ख्यातनाम्ने० ५२५ गोत्रिणे० गोत्रप्रपालकाय० गोत्रसेतवे० गोत्रकेतवे० गोत्रहेतवे० गतक्लमाय० गोत्रत्राणकराय० गोत्र
पतये० गोत्रेशपूजिताय० गोत्रविदे० गोत्रभित्त्रात्रे० गोत्रभिद्वरदायकाय० गोत्रभित्पूजितपदाय० गोत्रभिच्छत्रुसूदनाय०
गोत्रभित्प्रीतिदाय० गोत्रभिदे० गोत्रपालकाय० गोत्रभिद्गीतचरिताय० गोत्रभिद्राज्यरक्षकाय० गोत्रभिद्वरदायिने० गोत्र
भित्प्राणनिश्चयाय० गोत्रभिद्भयसंहर्त्रे० गोत्रभिन्मानदायकाय० गोत्रभिद्गोपनपराय० गोत्रभित्सैन्यनायकाय० ५५०
गोत्राधिपप्रियाय० गोत्रपुत्रप्रीताय० गिरिप्रियाय० ग्रंथज्ञाय० ग्रंथकृते० ग्रंथग्रंथिदाय० ग्रंथविघ्नघ्ने० ग्रंथादये० ग्रंथसं
चाराय० ग्रंथश्रवणलोलुपाय० ग्रंथाधीनक्रियाय० ग्रंथप्रियाय० ग्रंथार्थतत्त्वविदे० ग्रंथसंशयसंछेदिने० ग्रंथवक्त्राय० ग्रहा
ग्रण्यै० ग्रंथगीतगुणाय० ग्रंथगीताय० ग्रंथादिपूजिताय० ग्रंथारंभस्तुताय० ग्रंथग्राहिणे० ग्रंथार्थपारदृशे० ग्रंथदृशे० ग्रंथ

विज्ञानाय० ग्रंथसंदर्शशोधकाय० ५७५ ग्रंथकृत्पूजिताय० ग्रंथकराय० ग्रंथपरायणाय० ग्रंथपारायणपराय० ग्रंथसंदेहभंजकाय० ग्रंथकृद्वरदात्रे० ग्रंथकृते० ग्रंथवंदिताय० ग्रंथानुरक्ताय० ग्रंथज्ञाय० ग्रंथानुग्रहदायकाय० ग्रंथांतरात्मने० ग्रंथार्थपंडिताय० ग्रंथसौहृदाय० ग्रंथपारंगमाय० ग्रंथगुणविदे० ग्रंथविग्रहाय० ग्रंथसेतवे० ग्रंथहेतवे० ग्रंथकेतवे० ग्रहाग्रगाय० ग्रंथपूज्याय० ग्रंथगेयाय० ग्रंथग्रथनलालसाय० ग्रंथभूमये० ६०० ग्रहश्रेष्ठाय० ग्रहकेतवे० ग्रहाश्रयाय० ग्रंथकाराय० ग्रंथकारमान्याय० ग्रंथप्रसारकाय० ग्रंथश्रमज्ञाय० ग्रंथांगाय० ग्रंथभ्रमनिवारकाय० ग्रंथप्रवणसर्वांगाय० ग्रंथप्रणयतत्पराय० गीताय० गीतगुणाय० गीतकीर्तये० गीतविशारदाय० गीतस्फीतये० गीतगतिप्रणयिने० गीतचंचुराय० गीतप्रसन्नाय० गीतात्मने० गीतलोलाय० गतस्पृहाय० गीताश्रयाय० गीतभयाय० गीततत्त्वार्थकोविदाय० ६२५ गीतसंशयसंछेत्रे० गीतसंगीतशासनाय० गीतार्थज्ञाय० गीततत्त्वाय० गीतातत्त्वाय० गीताश्रयाय० गीतासाराय० गीतकृतये० गीतविघ्नविनाशनाय० गीतासक्ताय० गीतलीनाय० गीताविगतसंज्वराय० गीतैकदृशे० गीतभूतये० गीताप्रीताय० गीताललसाय० गीतवाद्यपटवे० गीतप्रभवे० गीतार्थतत्त्वविदे० गीतागीतविवेकज्ञाय० गीतप्रवणचेतनाय० गतभिये० गतविद्वेषाय० गतसंसारबंधनाय० गतमायाय० ६५० गतत्रासाय० गतदुःखाय० गतज्वराय० गतासुहृदे० गताज्ञानाय० गतदुष्टाशयाय० गताय० गतार्तये० गतसंकल्पाय० गतदुष्टविचेष्टिताय० गताहंकारसंचाराय० गतदर्पाय० गताहिताय० गतविघ्नाय० गतभयाय० गतागतनिवारकाय० गतव्यथाय० गतापायाय० गतदोषाय० गतेःपराय० गतसर्वविकाराय० गज

गर्जितकुंजराय० गतकंपितभूपृष्ठाय० गतरुषे० गतकल्मषाय० ६७५ गतदैन्याय० गतस्तैन्याय० गतमानाय० गतश्रमाय०
गतक्रोधाय० गतग्लानये० गतम्लानये० गतभ्रमाय० गताभावाय० गताभवाय० गततत्त्वार्थसंशयाय० गयासुरशिरश्छेत्रे०
गयासुरवरप्रदाय० गयावासाय० गयानाथाय० गयावासिनमस्कृताय० गयातीर्थफलाध्यक्षाय० गयायात्राफलप्रदाय०
गयामयाय० गयाक्षेत्राय० गयाक्षेत्रनिवासकृते० गयावासिस्तुताय० गायन्मधुव्रतलसत्कटाय० गायकाय० गायकवराय०
७०० गायकेष्टफलप्रदाय० गायकप्रणयिने० गात्रे० गायकाभयदायकाय० गायकप्रवणस्वांताय० गायकप्रथमाय० गाय
कोद्गीतसंप्रीताय० गायकोत्कटविघ्नघ्ने० गायगेयाय० गायकेशाय० गायकांतरसंचाराय० गायकप्रियदाय० गायकाधीन
विग्रहाय० गेयाय० गेयगुणाय० गेयचरिताय० गेयतत्त्वविदे० गायकत्रासघ्ने० ग्रंथाय० ग्रंथतत्त्वविवेचकाय० गाढानु
रागाय० गाढांगाय० गाढगंगाजलोद्वहाय० गाढावगाढजलधये० गाढप्रज्ञाय० ७२५ गतामयाय० गाढप्रत्यर्थिसैन्याय०
गाढानुग्रहतत्पराय० गाढाश्लेषरसाभिज्ञाय० गाढनिर्वृतिसाधकाय० गंगाधरेष्टवरदाय० गंगाधरभयापहाय० गंगाधरगुरवे०
गंगाधरध्यानपरायणाय० गंगाधरस्तुताय० गंगाधराराध्याय० गतस्मयाय० गंगाधरप्रियाय० गंगाधराय० गंगांबुसुंदराय०
गंगाजलरसास्वादचतुराय० गंगानिरताय० गंगाजलप्रणयवते० गंगातीरविहाराय० गंगाप्रियाय० गंगाजलावगाहनपराय०
गंधमादनसंवासाय० गंधमादनकेलिकृते० गंधानुलिप्तसर्वांगाय० गंधलुभ्यन्मधुव्रताय० ७५० गंधाय० गंधर्वराजाय० गंधर्व
